श्रीः ।

जातकसंग्रहः ।

धोलेडाग्रामनिवासि-देशप्रसिद्ध-ज्योतिर्वित्श्रीलक्ष्मणदासनौनिधिरामाभ्यां नानाग्रंथेभ्यः समुद्धृतः ।

स च

पं० कालुरामशर्मद्वारा संशोध्य

खेमराजश्रीकृष्णदासइत्यनेन

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितः ।

संवत् १९५२ शके १८१७.

श्रीः ।

जातकसंग्रहस्य सूचीपत्रम् ।

इति सूचीपत्रम् ।

श्रीः ।

जातकसंग्रहः ।

॥ श्रीगणेशाय नमः ॥ ॥ अथ द्वादशभावफलानां फलानि निरूप्यंते ॥ नत्वाश्रियंभवानींचशारदांबुद्धिवर्द्धनीम् ॥ करोम्यहं स्वबोधायभावाध्यायंयथामति ॥ १ ॥ तत्रभावफलालोकनेविधिः ॥ भिन्नंद्वादशधाविरच्यविलसच्चक्रं चतत्रन्यसेल्लग्नाद्द्वादशराशयोतिविशदा वामांगभागेक्रमात् ॥ अंक्यास्तत्र नभश्वराः स्फुटतरा राशौचयत्रस्थितास्तेभ्यः साधुफलंत्वसाधुसुधिया वाच्यंहिहोरागमात् ॥ २ ॥ अथतनुभावविचारमाह ॥ तत्रकिंविचार्य्यमित्युक्तं जातकाभरणे ॥ रूपंतथावर्णविनिर्णयश्च चिह्नानिजातिर्वयसः प्रमाणम् ॥ सुखानिदुःखान्यपिसाहसंचलग्नेविलोक्यंखलुसर्वमेतत् ॥ ३ ॥ तत्रादौसामान्यविचारेतनुभावोपरिग्रहाणां दृग्युतिफलान्याह तत्रसर्वग्रहदृष्टिफलम् ॥ विलोकितेसर्वग्रहैर्विलग्ने लीलाविलासैः सहितोबलीयान् ॥ कुलेनृपालोविपुलायुरेव भयेनमुक्तोरिकुलस्यहंता ॥ ४ ॥ अथलग्नस्थसौम्यत्रयेणराजयोगंपापत्रयेण दरिद्रयोगंचाह ॥ सौम्यास्त्रयोलग्नगता यदिस्युः कुर्वंतिजातंनृपतिंविनीतम् ॥ पापास्त्रयोदुःखदरिद्रशोकैर्युतंनितांतं बहुभक्षकंच ॥ ५ ॥ अथलग्नादरिद्मदा ७ ष्ट ८ मस्थैः शुभैः राजयोगमाह ॥ लग्नात् द्यूनषडष्टभेषुशुभदाः पापैरयुक्तेक्षिता मंत्री दंडपतिः क्षितेरधिपतिः स्त्रीणांबहूनांपतिः ॥ दीर्घायुर्गदवर्जितोगतभयः सौंदर्य्यसौख्यान्वितः सच्छीलोयवनेश्वरैर्निगदितोम-

र्यः प्रसन्नः सदा ॥ ६ ॥ अथलग्नस्थग्रहाणांफलानि । तत्रादौ रविफलम् ॥ गर्गजातके ॥ प्रचंडरूपोविकलेक्षणश्च प्रयेन्निशांशः किलबुद्धदाक्षः ॥ कंठेग्रहःस्यान्मदरक्तनेत्रो भानौतनुस्थेरुधिरेक्षणः स्यात् ॥ ७ ॥ अन्यच्च । तनुस्थानगतेसूर्येदृष्टेवाकोपवान्भवेत् ॥ वातपित्तभवाबाधाशरीरेचास्यजायते ॥ ८ ॥ पाषाणादिप्रहारेणकं शिरसिजायते ॥ कंठदेशेगुदेवापिव्रणोवाथतिलोभवेत् ॥ ९ ॥ बाल्यभावेहिजातस्य पीडादुःखान्यनेकशः ॥ विचार्य्यग्रहभावंचतथान्यदपिचोच्यते ॥ १० ॥ अथलग्नस्थचंद्रफलम् ॥ पूर्णेशीतकौ लग्ने सुरूपो धनवान्मृदुः ॥ असंपूर्णेतुमलिनोमंदवीर्य्योभवेत्सदा ॥ ११ ॥ अथक्षीणोपिराशिवशाच्छुभस्तदाह ॥ गो २ मेष १ कर्कटे ४ लग्नेचंद्रस्थेरूपवान्धनी ॥ जडताव्याधिदारिद्र्यंशेषर्क्षे कुरुतेशशी ॥ १२ ॥ अन्यच्च । तनुस्थानेस्थितेचंद्रेदृष्टिभिर्वाविलोकिते ॥ शिरस्यार्तिर्वातबाधाशीततागौरवर्णता ॥ १३ ॥ श्वासः कासो हि जातस्य तनौ वातभ्रमोभवेत् ॥ अश्वादिपशुघातंचहृदयेराजचौरतः ॥ १४ ॥ अथतनुस्थभौमफलम् ॥ गु रोगीश्लथन्नाभौकंडूकुष्ठादिनांकितः ॥ मध्यदेशेभवेद् व्यंगः सवाच्योलग्नगेकुजे ॥ १५ ॥ अन्यच्च । तनुस्थानस्थितेभौमे दृष्टिभिर्वाविलोकिते ॥ लोहाश्मादिकृतापीडाक्रोधोत्यंतस्तनौभवेत् ॥ १६ ॥ रक्तपीडाशिशुत्वेचवातरक्तश्चजायते ॥ मस्तकेकंठमध्येचगुह्येवापि व्रणंभवेत् ॥ १७ ॥ अथलग्नस्थबुधफलम् ॥ सुमूर्त्तिर्निपुणःशांतोमेधावीविप्रियंवदः ॥ विद्वान्दयालुरत्यर्थंविनाक्रूरंबुधेतनौ ॥ १८ ॥ अन्यच्च । तनौबुधेलोकितेचभिन्नवर्णंशरीरकम् ॥ स्त्रीसुखंमध्यभागे

चवांतपीडातनौभवेत् ॥ १९ ॥ विस्फोटादिभवंदुःखंमशकोथ तिलोथवा ॥ गुल्मोदरविकारोवास्वल्पाहारोपिजायते ॥ २० ॥ अथतनुस्थगुरुफलम् ॥ कविः सुगीतः प्रियदर्शनः शुचिर्दाताऽथभोक्तानृपपूजितश्च ॥ सुखीचदेवार्चनतत्परश्चधनीभवेद्देवगुरौतनुस्थे ॥ २१ ॥ अन्यच्च । तनुस्थानगतेजीवेगौरवर्णतनुर्भवेत् ॥ वातश्लेष्मशरीरेच बाल्येचसुखसंपदः ॥ २२ ॥ मिथ्यापवादजा पीडाशत्रूणांविषदायिका ॥ राज्यतोमान्यमतुलं धनप्राप्तिरनेकधा ॥ ॥ २३ ॥ क्रूरदृष्टिसमायोगेन्यथाकाचित्प्रजायते ॥ योयोविघ्नः समुत्पन्नः ससद्यश्चविनश्यति ॥ २४ ॥ अथतनुस्थभृगुफलम् ॥ वाचालः शिल्पशीलाढ्योविनीतोगीततत्परः ॥ काव्यशास्त्रविनोदीचधार्मिकोलग्नगेभृगौ ॥ २५ ॥ अन्यच्च । तनुस्थानस्थितेशुक्रे दृष्टिभिर्वाविलोकिते ॥ गौरवर्णोभवेद्देहोवातपित्तसमन्वितः ॥ २६ ॥ कटिपार्श्वोदरेगुह्ये व्रणोवाथतिलोथवा ॥ श्वश्रूंगिभ्योवायुतोवा पीडादेहेप्रजायते ॥ २७ ॥ अथतनुस्थशनिफलम् ॥ कंडूतिपूर्णांगकफप्रवृत्तिर्लग्नेशनौस्यात्सततंनराणाम् ॥ हीनाधिकांगत्वमधप्रदेशेकर्णांतरेवातगदःसदैव ॥ २८ ॥ लग्नेमंदेथवादृष्टेकृशदेहश्च [illegible]खितः ॥ मूर्खश्चमदनाचारोभिन्नवर्णस्तनौभवेत् ॥ २९ ॥ [illegible]हादिभिःशिरःपीडाआत्मचिंतानिरंतरम् ॥ यादृक्फलंशनौप्रोक्तराहौतादृक्फलंभवेत् ॥ ३० ॥ तुलाकोदंडमीनानांलग्नसंस्थे शनैश्चरे ॥ करोतिभूपतिंजातमन्यराशौगतायुषम् ॥ ३१ ॥ अथ [त]नुस्थराहुफलम् ॥ सर्वांगरोगीविकलःकुमूर्त्तिःकुवेषधारीकुनखीकुकर्मा ॥ अधार्मिकःसाहसकर्मदक्षोरक्तेक्षणश्चंद्ररिपौतनुस्थे ॥ ३२ ॥

अन्यत् । राहौलग्नगतेजातःसंचयंयत्रकुत्रचित् ॥ सिंहकर्किणि मेषस्थेस्वर्णलाभायमंगलम् ॥ ३३ ॥ अथकेतुफलम् ॥ यस्यलग्नोपगःकेतुस्तस्यभार्याविनश्यति ॥ बाहुरोगस्तथाव्याधिः मिथ्यावादीचजायते ॥ ३४ ॥ अथलग्नस्थैर्ग्रहैःप्रकृतिः ॥ सोमोवासोमपुत्रोवाराहुकेतुशनैश्चराः ॥ यस्यलग्नेस्थितास्तस्यां दोलितप्रकृतिर्भवेत् ॥ ३५ ॥ कविर्गुरुर्भानुभौमौस्थिरप्रकृतिदायकाः ॥ राहुमंदौचयत्रस्थौतत्रस्यात्कृष्णलांछनम् ॥ ३६ ॥ अथलग्नपादायुराह ॥ सौम्योलग्नपतिर्लग्नेलग्नंवायदिवीक्षिते ॥ गतक्लेशश्चिरायुश्चसुखीलोकस्तदाभवेत् ॥ ३७ ॥ लग्नंलग्नपतिर्वापिदुर्बलोस्तमितोपिवा ॥ तथाफलंचसामान्यंवक्तव्यंग्रहभावतः ॥ ३८ ॥ लग्नेवाथनवांशेवायेग्रहाश्चप्रकीर्तिताः ॥ ज्ञात्वातेषांस्वरूपंचफलंसम्यग्निरूप्यते ॥ ३९ ॥ इतिसामान्यविचारः ॥ अथविशेषविचारः ॥ स्वामिसौम्यदृष्टियुतवशात् उक्तंच ॥ योयोभावःस्वामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृद्धिः ॥ पापैरेवंतस्यभावस्यहानिर्निर्देष्टव्यापृच्छतांजन्मतोवा ॥ ४० ॥ अपूर्वोपन्यस्तबलवशेनभावस्यहानिर्वृद्धिर्वाच्यातदुक्तंगर्गजातके ॥ नीचस्थोरिपुगेहस्थोग्रहोभावविनाशकृत् ॥ उदासीनग्रहोमध्योमित्रस्वर्क्षत्रिकोणगः ॥ ४१ ॥ स्वोच्चगश्चग्रहोऽवश्यंभाववृद्धिकरःस्मृतः ॥ व्ययाष्टषष्ठभावेषुवैपरीत्यत्वमावहेत् ॥ ४२ ॥ पश्यन्ग्रहःस्वलग्नंसर्वंविदधातिसौख्यमर्थंच ॥ प्रायोनृपतिप्रियत्वंपापीपापंशुभःसौख्यम् ॥ ४३ ॥ स्वगृहोच्चसौम्यवर्गेग्रहः फलंपुष्टमेवविदधाति ॥ नीचास्तारिपुगृहस्थोविगतफलंकीर्तितंमुनिभिः ॥ ४४ ॥

अथजातस्यकांश्चिदायुरादियोगानाह ॥ सन्ध्याद्वयेजनिमतोत्रयदेन्दुहोराराश्यन्तगैःखलखगैर्निधनंशिशोः स्यात् ॥ केन्द्रैः सपापविधुभिः सकलैस्तथैवकामांगयोरपिमृतिःखलकर्त्तरीचेत् ॥ ॥ ४५ ॥ स्मरांगयोःक्रूरखगावसद्युतः शशीनदृष्टश्चशुभैस्तदाक्षयः ॥ शुभोनकेन्द्रैर्व्ययगे विधौ कृशे खलैश्चतन्वष्टमगैर्द्रुतं मृतिः ॥ ४६ ॥ षष्ठाष्टमेब्जेसुखगे चराहौ दुःस्थेमृतिः सद्यइहेश्वरोच्चैः ॥ वर्षेणकेन्द्रे सखलेथयद्यन्योन्यर्क्षगौस्तोस्त्रगुरू शिवाब्दैः ॥ ४७ ॥ सक्रूरोब्जोव्ययमृतिमदांगेष्वकेंद्रस्थसौम्यैर्नो दृष्टोसौ शिशुमृतिकरोथाष्टमारिस्थितोब्जः ॥ दृष्टःक्रूरैरहनिजननं यस्यकृष्णेचपक्षेशुक्लेसद्भिर्निशिजनिरवत्यत्रतंनान्यथोह्यम् ॥ ४८ ॥ तनाविन उतोडुपेन शुभयुक्तदृष्टे मृतिस्त्रिकोणमृतिगैःखलैर्बलयुतैर्नृणां स्यात्तथा ॥ व्ययांकतनुमृत्युगैरगुरुदृग्भिरार्क्यर्केविध्वसृग्भिरथदुर्विधौसुतनवाद्यगांत्यांगगे ॥ ४९ ॥ तनोररिविनाशगेखलखगैर्विधौवीक्षिते मृतिःशुभदृशासमाष्टकमतश्चमिश्रैर्दलम् ॥ खपूरिभगतेष्टमेखलदृशैकवर्षः शिशूरवौनृपदिगब्दकःखलखगेक्षिते केन्द्रगे ॥ ५० ॥ यमेर्कविधुसंयुतेनवसमाश्चमासोऽखिलैः षडष्टमगतैःखलैरथषडष्टगेकर्कगे ॥ शशीक्षितवुधे चतुर्थशरदिक्षयः स्याच्छिशोः सितोष्णगुयमाइमेखलयुतास्त्रयोमृत्यवे ॥ ५१ ॥ रवौ कुजर्क्षेशनिगेहगेपिवा बहूग्रदृष्टोगुरुरन्तकृत्खगः ॥ शुभैरदृष्टाअशुभेक्षिताःखलामदाष्टगाःसाम्बशिशुक्षयंकराः ॥ ५२ ॥ होरास्वामीपापदृष्टोऽष्टमस्थोजन्मेशाढ्यश्चेन्मृतिर्वेदमासैः ॥ एवंकामेपापयुग्जन्मपाढ्योहोरेशश्चेत्क्रूरदृष्टोष्टमासैः ॥ ५३ ॥ सर्वपापनिरीक्षि-

तोगुरुरष्टमेनशुभेक्षितोरिष्टकृत्कुजगेहगोध्रुवमेववाकुटिलःशनिः ॥ केन्द्रनाशरिपुस्थितःकुजगेहगोबलिनाऽसृजा वीक्षितश्चसमात्रयेण विशेषतः शिशुहानिदः ॥ ५४ ॥ शनिस्तनोरष्टमगस्तुकष्टदस्त्रि कोणगोनीचइनोपितादृशः ॥ कुजेष्टमेसत्यथषष्ठमृत्युगेखलेक्षितेङ्गे ऽधिसमायुरात्मजः ॥ ५५ ॥ षष्ठनाशगतोबुधःशशिभेक्षयायवि धोर्दशावेदहायनतोथषष्ठलयव्ययस्थशुभग्रहैः ॥ वीक्षितोहरिकर्क गोमृतिदोऽशुभेक्षणतःसितः षट्समाभिरथद्रुतं जनितस्यशिरव्युदो क्षयः ॥ ५६ ॥ तनौदृकाणायदिपाशपक्षिणां खलान्विताःसप्तम- वत्सरेमृतिः ॥ खलास्त्रिकोणेनशुभेक्षिताःशुभाःषडष्टगाश्चेद्गजवत्स- रेक्षयः ॥ ५७ ॥ तनौस्मरेखलग्रहेखलेक्षितान्वितेङ्गपे ॥ विधौ तनौचजातकोत्रसप्तवर्षजीवनः॥ ५८॥ त्रिकेऽस्तगौजन्मतनुप्रभूयदा तदांशिशोराशिमिताब्दतश्च्युतिः॥ बुधर्क्षगोब्जोर्ककुजान्वितः शुभे- रवीक्षितोब्दे नवमेक्षयङ्करः ॥५९॥ अन्तिमांशगताःखेटाअत्यल्पा- युःप्रदामताः ॥ स्वमित्रगृहतुंगस्थोबह्वायुःखेचरोभवेत् ॥ ६० ॥ अथात्रतनुविचारेपूर्वंरूपंकथितंतदाहवराहः ॥ लग्ननवांशपतु ल्यतनुःस्याद्वीर्ययुतग्रहतुल्यतनुर्वा ॥ चंद्रसमेतनवांशपवर्णःकादिवि- लग्नविभक्तभगात्रः ॥ ६१ ॥ दिवार्कशुक्रौपितृमातृसंज्ञकौशनैश्चरे- न्दूनिशितद्विपर्ययात् ॥ पितृव्यमातृष्वसृसंज्ञितौचतावथौजयुग्मर्क्ष- गतौतयोःशुभौ ।६२।रवींद्रवीर्येपितृमातृतुल्योयत्रिंशकेकोंस्यगणो ग्रहस्य॥ तनूनवांशेशसमस्तुमूर्त्याबलिष्ठखेटप्रतिमोपिवास्यात् ६३ अथचिह्नबोधार्थमंगन्यासउदयभास्करे ॥ अथशिरोक्षिकर्ण- कर्णनसाकपोलहनुवक्त्रमितित्रिलवादिमे ॥ अधिभुजांशभुजद्वय-

कुक्ष्युरोजठरनाभ्यभिधाखिलवेद्विके ॥ ६४ ॥ तदनुबस्तिरुपस्थगु-
देथवावृषणमूरुकजानुपदाःक्रमात् ॥ त्रिलवकर्तृतयेथतनोः पुरापर-
दलेंगमुदक्षमदक्षिणं ॥ ६६ ॥ इहखलैर्व्रणदष्टयुतेक्षितेमशकपूर्वकल-
क्षणमादिशेत् ॥ स्वभलवस्थिरगेसहजोन्यथात्वपरथात्ररवौखलुका
ष्ठजः ॥ ६६ ॥ शशिनिश्रृंगिजलोत्थभवोकुजेऽनलविशस्त्रभवः
शनितोश्मजः ॥ पवनजश्वशुभैःशुभजोथयत्पदगताखिलाश्वबुधा-
न्विताः ॥ ६७ ॥ भनियमाद्व्रणचिह्नकरोयदारिपुखलोव्रणकृत्सशु
भेकृत् ॥ सशुभदृक्तिलकृच्चतथालघौलघुभगेंगमणुत्वपरे
परः ॥ ६८ ॥ अथगुणाः ॥ रविखराम ३० लवांशपतेर्गुणोभवतिसत्व
जादिग्रहैर्कृतः ॥ चंद्रार्कजीवाज्ञसितौकुजार्कीयथाक्रमसत्वरज-
स्तमांसि ॥ ६९ ॥ अथयोगैश्चिह्नमाह ॥ जातकमुक्तावल्याम् ॥
लग्नात्सप्तमगोभौमः शुक्रोवापिबृहस्पतिः ॥ चिह्नंमूर्ध्निस्थितंज्ञेयंजात
कस्यनसंशयः ॥ ७० ॥ यदाशुक्रोथवाभौमोलग्नस्थोपिनिशाकरः ॥
द्वादशाब्देभवेत्तस्यमस्तकेचिह्नदर्शनम् ॥ ७१ ॥ जायास्थानेयदारा
हुर्मंत्रीवापितनुस्थितः ॥ वामेभुजेभवेच्चिह्नंतिलमाषादिकंस्फुटम् ७२
कुजेसौम्येथवालग्नेराहुः षष्ठत्रिकोणगः ॥ लिंगेगुदेभवेच्चिह्नंतिलमाषा-
दिकंस्फुटम् ॥ ७३ ॥ त्रिकोणेपिभवेच्छुक्रोजीवसौम्यौमूर्तिस्थितौ ॥
पातालहिबुकेमंदेकुक्षौचिह्नंसमादिशेत् ॥ ७४ ॥ धर्मस्थानेयदाशुक्रे
त्वष्टमेपिदिवाकरे ॥ कर्मगौराहुमंदौचेन्नाभौचिह्नंसमादिशेत् ॥ ७५ ॥
व्ययस्थानेयदामंत्रीबुधोपित्रिषडायगः ॥ सहजस्थोयदाशुक्रोहृदिचि
ह्नंसमादिशेत् ॥ ७६ ॥ सहजस्थोयदाशुक्रोमंत्रीवात्रिषडायगः ॥
धर्मस्थानेनिशानाथेगुदेगोलकमादिशेत् ॥ ७८ ॥ यवनः ॥ धनाश्रि-

तेभूतनयेसुखेथवा सौरेव्ययस्थेरिनवांशसंस्थे ॥ उन्मत्तरूपोत्रभवे न्मनुष्यःसर्वत्रनिंद्यःकृतधिङ्मतिश्च ॥ ७८ ॥ वर्णार्चितांगःसततंस्व रूपः प्रतापयुक्तःपिशुनस्वभावः ॥ शनैश्चरेमृत्युगतेव्ययस्थेभौमेभवे त्पापरतोमनुष्यः ॥ ७९ ॥ सौम्येविलग्नेशुभनेत्रवक्त्रःशुभांशवक्ष शुभजेनवांशे ॥ चंद्रस्यहोराशुभबाहुदात्रीत्रिंशांशके सौम्यभवेत् शीलः ॥ ८० ॥ सूर्य्यांशकेसौम्यसमुद्भवेचनरोभवेच्छोभनजानुपा र्श्वः ॥ लग्नंशुभालोकितमिष्टवीर्य्यमोजोविधत्तेसततंनराणाम् ॥ ८१ ॥ इतिचिह्नज्ञानम् ॥ अथपृच्छायांलग्नाज्जातिर्ज्ञेया । उक्तंच । लग्नपोवालग्नगोवायादृशोहिभवेद्ग्रहः ॥ सवर्णस्तत्समाचारोमान वोभविताभुवि ॥ ८२ ॥ अथपृच्छायामेवलग्नाद्वयःप्रमाणं वाच्यम् ॥ उक्तंच ॥ पृच्छाकालेयथावाच्यंजन्मकालेपितत्तथा ॥ यथालग्नगतेभौमेसवृद्धोपियुवाथवा ॥ ८३ ॥ तथालग्नगतेसौम्ये युवाबालायतेकिल ॥ शशिशुक्रौयदालग्नेनातिवृद्धोनवैयुवा ॥ ८४ ॥ स्थविरौराहुमार्त्तंडौतथाजीवशनैश्चरौ ॥ स्थविरौसबलौयस्यग्रहौ स्यातांविलग्नगौ ॥ ८५ ॥ प्रकृत्यासभवेद्वृद्धोमान्यःसर्वजनेषुच ॥ इतिवयसःप्रमाणम् ॥ अथलग्नादायुः ॥ सौम्येलग्नपतौवापिसौम्यै र्वालग्नगैस्तदा ॥ चिरायुर्जायतेमर्त्योवीतक्लेशःसुखीसदा ॥ ८६ ॥ क्रूरेलग्नपतौनष्टेक्रूरालग्नगताग्रहाः ॥ अल्पायुषंप्रकुर्वंतिनात्रकार्या विचारणा ॥ ८७ ॥ अथसुखदुःखान्याहग्रहयोगवशात् ॥ उदयभास्करात् ॥ तनुपतिःसबलोष्ट ८ षडंद्द्त्य १२ गस्तनुसु खंनषडंद्द्त्य १२ मृती ८ ट्स्वभे ॥ तनुसुखंनयदाविबलेंगपेवपुषि पापखगेचरुजाधिकः ॥ ८८ ॥ तनुपतिःस्वगृहेबुधजीवभार्गवयु

चश्चतुष्टयगोथवा ॥ भवतितुंगगृहेयदिसौम्यभेहितदशासुखरा-
ज्ययशोर्थभाक् ॥ ८९ ॥ सुरुचिरः सुकृतिः शुचिसत्यवान् य-
दिदिधुश्चक्रियेकलशेशनिः ॥ धनुषिभानुरदेवगुरुर्मृगेनिजभुजार्जित
वित्तयशस्तदा ॥ ९० ॥ यदिसमस्तचतुष्टयगाः खलाः धनग-
ताश्चपरेकुलहृत्स्वहृत् ॥ तनुगतोयदिवासुत ५ गोगुरुर्दश १०
विधुःसुमतिर्नृपतिर्दमी ॥ ९१ ॥ क्रियगतोभृगुजोयदिवांगनातुल-
गुरुश्चबुधःशुभवीक्षितः ॥ अलिगतश्चतुरःप्रभटःसुधीःकुलपतिर्मुदि-
तःसमुदारदः ॥९२॥ यदिरविर्मदनेचमृतौ ८ शनिः सुरगुरुश्चध-
नेपरभृत्यकः ॥ रविविधूनवमेव्ययगेत्वगौनृपसमीपचरःसततंभवेत्
॥ ९३ ॥ गुरुरवीमृतिभे ८ रविजःखभे १० खशिखि ३० वर्ष-
मितौचनृपार्थभाक् ॥ कुजरवी रिपुभे कुटिले८ शनौहिमकरेचसु-
खे ४ नृपदर्शकः ॥ ९४ ॥ धन २ शनौशशिभेगुरुचंद्रयोः दश-
गयोश्चभवेत्क्रयविक्रयी ॥ निजगृहोच्चसुरद्विषिकेंद्रषट्व्ययनवा-
त्मजगेबहुदःसुखी ॥ ९५ ॥ शशिनिसप्तमकोषगतेर्कजेवपुषिशू-
रंतरोबहुपुत्रवान् ॥ गुरुरविव्ययगोवरपूजितः परभटश्चकुलेकुलरं-
ध्रकृत् ॥ ९६ ॥ सुरगुरुर्मृतिगोभृगुजोथवापरभटोगजराजविपा-
तकृत् ॥ अगुगुरूभवनेशनिरष्टमेयदिभवेत्सुभटोबहुयुद्धवित् ॥
॥ ९७ ॥ यदिगुरुर्मदनव्ययगोरविर्नवमगःकुसुतोमृतिगःसुधीः ॥
यदिचभानुगुरूसुत ५ धामगौभवतिशास्त्रपटुर्धनधान्यवान्॥९८॥
यदिचतुष्टयगोभृगुजोगुरुर्विदपिवासधनःश्रुतिपारगः ॥ मदनगेहिम-
गौससितेगुरौर्दशमधर्मगतेविदिलेखकः ॥ ९९ ॥ विधुविदोःशनि-
भास्करयोर्यदेज्यसितपोर्व्ययधजोबहुलोभकः ॥ यदिशनिर्मदनेऽव-

निजस्त्वगुर्मृतिनवांत्यसुखेगुरुतल्पगः ॥ १०० ॥ विधुभतोद्वितये तपनस्ततोशनिरतोऽवनिजोयदितस्करः॥ बुधकुजौसबलौरिपुभावगौयदिविकृत्यकरःकिलतस्करः ॥ १०१ ॥ मृगकुजश्चकुलीरशनिर्यदाभवति दस्युविधेरसिखंडितः ॥ मिथुनमीनधनुःकलशे खला अशनतोमरणायकुचेष्टितैः ॥ १०२ ॥ वपुषिवित्रिलवेतिचतुष्टयेभृगुसुतेनृपजोप्यथनीचकृत् ॥ मदकुजःख १० विधुर्द्वितयेरवेर्यदिशनिश्चतदोनतनुर्नरः ॥ १०३ ॥ यदिपरस्परनंदलवोपगौरविविधूमिलितौचदरिद्रगः ॥ यदिखलांतरगोविधुरर्कजःस्मरगतोविकलःक्षयगुल्मयोः ॥ १०४ ॥ प्रबलमंदकुजार्कनिशाचरास्त्रिकधनेक्षिरुजोनिलकोपतः ॥ त्रिसुतलाभखलानशुभेक्षिताःश्रुतिहराःस्मरयाश्वशुभावहाः ॥ १०५॥ कुरदनोयदिवारदनच्छदक्षतधरोनियतंहितदाभवेत् ॥ यदिकुजोभृगुजोपिधनेव्ययेश्रुतिहरोत्रविधुर्यदिदृग्घरः ॥ १०६ ॥ यदिशनिःकुजभेरविभेपिवाखलयुतोभुजदंडविखंडकृत्॥ यदिशनिःसभृगूरिपुभेगतोरिपुदृशैकुभुजोपदखंडदः ॥ १०७ ॥ यदितमोर्ककुजेंद्वभिधामृतौ ८ सकलहस्तपदप्रतिखंडितः ॥ यदितमःशनिभेरविभेशशीभवतिशीर्षहतिःपरशुक्षते ॥ १०८ ॥ निधनअर्कविधूचशिरश्छिदेयादिखलत्रययुग्पुभोविधुः॥ विशुभदृक्चविदृग्यदिकर्कटेशुभदृशारहितौशनिशीतगू॥ ॥ १०९ ॥ यदिविधुःखलभेर्ककुजेक्षितेद्विजहरःसशनिर्यदिगोघ्नकः॥ यदिखगत्रितयंत्रिपदस्थितंभवतिशूलइतिदृढशूलकृत् ॥ ११० ॥ अन्यच्च ॥ कुजेस्मरेभाग्यगतेदिनेशेसितेष्टमेऽल्पायुरिहप्रजातः॥ धनेसितेज्जेतनुगेज्ञरव्योर्व्ययेसुतेबांधवबन्धभाक्स्यात् ॥ ११

त्रिंखलयुग्रविजोविसितांगिराप्रकुरुतेलघुतांहिशुभायुषोः ॥ यदि तनौभृगुजोप्यथवाशनिर्भवतिसिंहगतोक्षिहरस्तदा ॥ ११२ ॥ व्ययरविर्यदिदक्षिणनेत्रहाहिमकरोव्ययगस्त्वपराक्षिहृत् ॥ सुररिपुर्वपुषींदुररौभवेद्यदिमृगीमुखरोगनिपीडितः ॥ ११३ ॥ खमदनव्ययगा यदिपामरा बहुलकष्टकराश्चविधुर्मृतौ ॥ अहिकुजार्कयुतोरविजोयदारुधिरतापकरःसद्नीक्षितः ॥ ११४ ॥ खलतनौ तनुपेचखलार्दितेदृढतरामपवातनिपीडितः ॥ रविविधूभवभेतनुगेत्वगौविकुनखाब्दमितौहिजलोदरी ॥ ११५ ॥ गुरुकवीकुजभेव्ययगे विधौत्रितयगेचकुजेसितकुष्ठवान् ॥ अगुकुजौसुखगौसविधूशरद्वय२५समाशुचमंडलकुष्ठदौ॥ ११६॥ रविकुजौमदनेतनुगेविधौचिपिटिकादिककष्टसमन्वितः ॥ स्मरगृहेर्कबुधेंद्वभिधाःसुखेतदपरानृप १६ वत्सरदद्रुदाः ॥११७॥ सगुरुशुक्रबुधा निधने स्थिता घन२१मितेब्दगणे त्रिमलार्त्तिदाः ॥ गुरुशनीहिमृतौहिमगूरिपौ बुधसितौनवमेतनुचित्रता ॥ ११८ ॥ गुरुररौशनिरष्टमगो रविर्यदिचकर्किणिभौमदृशाग्निभीः ॥ यदिविधुः स्मरगः सहजे कुजोधृति१८समासुतरोः पतनंभवेत् ॥ ११९ ॥ अशुभभेहिगुरौशुभभेभृगौनग७मितेशरदिस्फुटकोद्गमः ॥ कविभशोत्थगुरौखलवक्रता यदिशिलाहतिकृद्भव११वत्सरे ॥ १२० ॥ यदितनौग्रसितेंदुरसद्ग्रहानवधियो हि पिशाचजनुःप्रदाः ॥ यदिरविर्विधुवन्नयनापहो यदि गुरुस्तनुगोमदनेकुजः ॥ १२१ ॥ मदरतोयदिलग्नगतोगुरुः स्मरशनिर्बहुवातविकारदः॥ वृषकुलीरमृगालिषुकोणगेष्वशुभदृष्टियुतेषु चकुष्ठवान् ॥ १२२ ॥ पापांतरालेचभवेत्कलावान् किलार्कसू-

नुर्मदनालयस्थः ॥ कलेवरंस्याद्विकलंचतस्यश्वासक्षयप्लीहकगु
ल्मरोगैः ॥ १२३ ॥ सुतस्थितोवायदिमूर्तिवर्त्तीबृहस्पती राज्य
गतः शशांकः॥ नरस्तपस्वी विजितेंद्रियश्चस्याद्राजसोबुद्धिविरा
जमानः॥ १२४ ॥ एतेहियोगाः कथितामुनींद्रैश्चांद्रंबलंयस्यनभश्च
रस्य॥कल्प्यंफलंतस्यविपाककालेसुनिर्मलायस्यमतिस्तुतेन १२५
॥ अथतनुभावेमेषादिराशिफलंवृद्धयवनः॥मेषोदयेरक्ततनुर्म
नुष्यः सदाल्पबुद्धिः परनिर्जितश्च ॥ पित्ताधिकः सर्वजनोपसेव्य
सर्वाशनोबुद्धिविचक्षणश्च ॥ १२६ ॥ वृषोदयेश्वेततनुर्मनुष्यःश्ले
ष्माधिकः क्रोधपरः कृतघ्नः ॥ समंदबुद्धिः स्थिरतासमेतः पराजि
तःस्त्रीभृतकः सदैव ॥ १२७ ॥ तृतीयलग्नेपुरुषोतिगौर स्त्रीरक्त
चित्तोनृपपीडितांगः ॥ शश्वत्प्रसन्नःप्रियवाग्विनीतः सुमूर्द्धजोगीत
विचक्षणश्च ॥ १२८ ॥ कर्कोदयेगौरवपुर्मनुष्यः पित्ताधिक
कल्पतनुः प्रगल्भः ॥ जलावगाहानुरतोतिबुद्धिः शुचिःक्षमीधर्म
रतोतिसेव्यः॥ १२९ ॥ सिंहोदयेपांडुतनुर्मनुष्यःपित्तानिलाभ्यांपरि
पीडितांगः ॥ प्रियामिषोरण्यचरः सुतीक्ष्णः शूरःप्रगल्भःसुतरांनि
रीहः ॥ १३० ॥ कन्याविलग्नेकफपित्तयुक्तो भवेन्मनुष्य
शुभकांतिभाजः ॥ श्लेष्माऽग्रजः स्त्रीविजितोतिभीरुर्मार्याधिक
कामकदर्थितांगः ॥ १३१ ॥ तुलाविलग्नेचभवेन्मनुष्यः श्लेष्मा
धिकः सत्यपरः सदैव॥ पुण्यप्रियःपार्थिवमात्रभक्तः सुरार्चनेतत्प
रएवकल्पः ॥ १३२ ॥ लग्नेष्टमेकोपपरोनसत्योभवेन्मनुष्योनृप
पूजितांगः ॥ गुणान्वितः शास्त्रकथानुरक्तः प्रमर्दकः शत्रुगणस्य
नित्यम् ॥ १३३ ॥ धनोदयेराजयुतोमनुष्यः कार्येप्रसक्तोद्विज

देवभक्तः॥तुरंगयुक्तःसुहृदैःप्रयुक्तस्तुरंगजंघश्चभवेत्सदैव ॥१३४॥ मृगोदयेतोषरतः सुवृत्तोभीरुः सदापुण्यविधौपरश्च ॥ श्लेष्मानिलाभ्यांपरिपीडितांगः सुदीर्घगात्रः परवंचकश्च ॥ १३५ ॥ घटोदये सुस्थिरतासमेतो वाताधिकस्तोयनिषेवणोत्सुकः ॥ सुहृत्सुगात्रः प्रमदास्वभीष्टः शिष्टानुरक्तोजनवल्लभश्च ॥ १३६ ॥ मीनोदयेतोयरतोमनुष्योभवेद्विनीतः सुरतानुकूलः॥सुपंडितःस्त्रीदयितः प्रचंडः पित्ताधिकःकीर्तिसमन्वितश्च ॥१३७॥इतिराशिफलम् ॥ अथ तनुभावस्वामिनोद्वादशभावेषुफलम् ॥ तत्रवृद्धयवनः ॥ लग्नाधिपतिर्लग्नेनीरोगंदीर्घजीवितंकुरुते ॥ बलवंतंदृढगात्रंरूपयुतंबहुप्रतिष्ठितंचैव ॥ १३८ ॥ लग्नपतिर्धनभवनेधनवंतंविपुलजीवितंस्थूलम्॥स्थानप्रधानमीशंसत्कर्मरतंनरंकुरुते॥१३९॥ सहजगतोलग्नपतिःसद्बंधुप्रवरमित्रपरिकलितम् ॥ धर्मरतंदातारंशूरसबलंकरोतिनरम् ॥ १४० ॥ लग्नेशस्तुर्यगतोनृपप्रियंप्रचुरजीवितंकुरुते ॥ लब्धियुतंबहुमित्रंपित्रोर्बहुभक्तिभाजनंकुरुते ॥ ॥ १४१ ॥ पंचमगोलग्नपतिःससुतंसत्यागमीश्वरंविदितम् ॥ बहुजीवितंसुशीलंसुकर्मनिरतंनरंतनुते ॥ १४२ ॥ रिपुभवनेलग्नेशेनीरोगंभूमिलाभयुतंसबले ॥ कृपणंधनिनमरिघ्नंसुकर्मपक्षान्वितंकुरुते ॥ १४३ ॥ प्रथमपतौसप्तमगेतेजस्वीशीलवान्भवेत्पुरुषः ॥ तद्भार्यापिसुशीलाज्ञयाकलितासुरूपाच ॥ १४४ ॥ लग्नपतौत्वष्टमगेकृपणोधनसंचकःसुदीर्घायुः ॥ क्रूरेखचरेक्रूरःसौम्येवपुषाभवेत्सौम्यः ॥ १४५ ॥ मूर्तिपतिर्यदिनवमेतदाभवेत्प्रचुरबांधवःसुकृतिः ॥ समचित्तश्चसुशीलःसुकृतीख्यातस्तुतेजस्वी

॥ १४६ ॥ प्रथमेशेदशमस्थेनृपमित्रःपंडितःसुशीलश्च ॥ गुरुमातृपूजनमतिर्नृपतिसमृद्धःपुमान्भवति ॥ १४७ ॥ एकादशगस्तनुपःसुजीवितंसुतसमन्वितंविदितम् ॥ तेजःकलितंकुरुतेपुरुषंवलिनंनसीदतिचेत् ॥ १४८ ॥ द्वादशगेलग्नपतौपटुवाग्वाचंकरोतिकर्णहितम् ॥ सहगोत्रकैरमिलितंविदेशगंवित्तभोक्तारम् ॥ १४९ ॥ इतितनुभावाध्यायः ॥ १ ॥ अथधनभावः॥ तत्रकिंविचार्यमित्युक्तंजातकाभरणे ॥स्वर्णादिधातुःक्रयविक्रयश्चरत्नानिकोशोपिचसंग्रहश्च ॥ एतत्समस्तंपरिचिंतनीयं धनाभिधानेभवनेसुधीभिः ॥ १ ॥ अथात्रसामान्यविचारेणधनभावेग्रहयुतदृष्टितायाःफलम् ॥ तत्रादौरवेः ॥ धनस्थानगते सूर्य्येदृष्टिभिर्वाविलोकिते ॥ चौरैर्नृपैर्धनंनीतंधनंस्वल्पंगृहेभवेत् ॥ २ ॥ ॥ गर्गमतेन ॥ धनभावगतेसूर्य्येधननाशमहर्निशम् ॥ करोतिनिर्धनंचाथताम्रवित्तंददातिच ॥ ३ ॥ ॥ अन्यत् ॥ धनेदिनेशोतिधनानिनूनंकरोतिमंदेनचनेक्षितश्चेत् ॥ शुभाभिधानाधनभावसंस्थानानाधनाभ्यागमनानिकुर्य्युः ॥ ४ ॥ ॥ अथ धने चंद्रयुतिदृष्टिफलंगर्गजातके॥रौप्यंकांचनयुक्तंचमणिरत्नधनंभवेत् ॥ कर्पूरचंदनामोदीधनेकुमुदबांधवे ॥ ५ ॥ अन्यत् जातकरत्ने ॥ धनेचंद्रे धनीलोकेदृष्टिभिर्वाविलोकिते ॥ भगिन्यास्तस्यकन्यायाद्रव्यनाशोपिजायते ॥ ६ ॥ अथभौमफलम् गर्गजातके ॥ कृषिकोविक्रयीभोगीप्रवास्यरुणवित्तवान् ॥ धातुवादीमतेर्नाशो द्यूतकारःकुजेधने ॥ ७ ॥ जातकरत्ने ॥ धनेभौमेथवादृष्टे धनहानिःप्रजायते ॥ पीडादेहेचनेत्रेचभार्याबंधुजनैःकलिः ॥ ८ ॥

अथबुधफलम् ॥ बुधेधनेलोकितेवाधनाढ्योराजपूजितः ॥ पटुभा-षीधनेनष्टेपुनरन्यच्चलभ्यते ॥ ९ ॥ गर्गः ॥ धनंददातिबहुधानाशयेच्चं-द्रवीक्षितः ॥ त्वग्दोषंकुरुतेनित्यंसोमपुत्रःकुटुंबगः ॥ १० ॥ अथधनस्थगुरुफलम् ॥ गर्गः ॥ लक्ष्मीवान्नित्यमुत्साहीधन-स्थेदेवतागुरौ ॥ बुधदृष्टेचनिःस्वःस्यादितिसत्यंप्रभाषितम् ॥ ११ ॥ ॥जातकरत्ने ॥ गुरौधनेथवादृष्टेधनधान्यसुखंभवेत् ॥ विद्याविनय-संपन्नोमान्यः सर्वस्यजायते ॥ १२॥ अथभृगुफलमाह गर्गः ॥ विद्यार्जितधनोनित्यं स्त्रीधनैरथवाधनी ॥ शुभदृष्टः शुभक्षेत्रेबुध-दृष्टेभृगौधनी ॥ १३ ॥ जातकरत्ने ॥ धनेशुक्रेवीक्षितेवाधनवां-श्चबहुश्रुतः ॥ मुखेचललितावाणीसभायांपटुतातथा ॥ १४ ॥ शत्रुक्रूरैर्युतेदृष्टेधनहानिः प्रजायते ॥ राजतश्चौरतोवापिमार्गेविघ्नः प्रजायते ॥ १५॥ अथशनिफलंगर्गः ॥ काष्ठांगाराल्लोहधनःकुका-र्यान्धनसंचयः ॥ नीचविद्यानुरक्तश्चदीनोवामंदगोधने ॥ १६ ॥ जातकरत्ने ॥ धनेमंदेधनैर्हीनोनिष्ठुरोदुःखितोभवेत् ॥ मित्रसौ-म्यैर्युतेदृष्टेधर्मसत्यदयान्वितः ॥ १७ ॥ पापैर्युक्तेक्षितेवित्तेशत्रुयु-क्तेक्षितेपिवा ॥ धनक्षयोभवेन्नित्यंशुभेलब्धेश्वरेशुभम् ॥ १८ ॥ मृतवत्साभगिन्यादिर्गर्भस्रावादिकंवदेत् ॥ प्रतिवेश्मादिबालानां विपत्तिरपिकथ्यते ॥ १९ ॥ अथधनस्थराहुफलम् । गर्गः ॥ मत्स्यमांसधनेनित्यंनखचर्मादिविक्रयी ॥ जीविकाचौरकृत्याच्चरा-हौधनगतेनरः ॥ २० ॥ अथकेतुः ॥ द्वितीयभवनेकेतुर्धनहानिः प्रयच्छति ॥ नीचसंगीचदुष्टात्मासुखसौभाग्यवर्जितः ॥ २१ ॥ शुभाधनगताःकुर्युर्वाग्मिनंप्रियभोजनम् ॥ क्रूराःकुर्युर्विशेषेणकद-

न्नंबहुभाषिणम् ॥ २२ ॥ इतिसामान्यविचारः ॥ अथविशेषविचारो जातकसारे ॥ धनस्वामीचसत्खेटैर्युग्दृष्टोधनवृद्धिदः॥ क्षीणेंदुःपापयुग्दृष्टोविनास्वर्क्षंधनापहः ॥ २३ ॥ सारावल्याम्॥ रवितनयभौमरवयः कुटुंबसंस्थाविलोकनाद्वापि ॥ कुर्वंतिधनविनाशंक्षीणेंदुनिरीक्षिताविशेषेण ॥ २४ ॥ भौमेंदूधनसंस्थौत्वग्दोषदरिद्रताकरौकथितौ ॥ मंदस्तुधनस्थानेमहार्थयुक्तंबुधेक्षितः कुरुते ॥ २५ ॥ रविरपि निधनंजनयतियमेक्षितः शस्यतेऽन्यदृष्टश्च ॥ सौम्याः कुटुंबसंस्था बहुप्रकारं धनंदद्युः ॥ २६ ॥ बुधदृष्टस्त्रिदशगुरुः कुटुंबराशौचविश्वतांकुरुते ॥ सोमसुतोपिशशिनानिरीक्षितोहंतिसमस्तधनम् ॥ २७ ॥ चंद्रोपिधनस्थानेक्षीणोपिबुधवीक्षितः सदाकुरुते॥ पूर्वार्जितार्थनाशंनिरोधमपिचान्यवित्तस्य ॥ २८ ॥ शुक्रः कुटुंबराशौसूर्य्येंदुनिरीक्षितोधनंदाता ॥ सौम्यगृहेशुभदृष्टः सएवधनदः सदाज्ञेयः ॥ २९ ॥ ग्रंथांतरे ॥ धनस्थानगतेजीवेधनीभवतिबालकः ॥ बुधस्तत्रैवभोगीस्यात् शुक्रेभूमिपतिर्भवेत् ॥ ३० ॥ धनस्थानेयदाचंद्रःपंचमस्थोयदारविः ॥ तदाधनक्षयंविंद्याद्दशवर्षाणिपंचच ॥ ३१ ॥ संकेतनिधौ ॥ स्वोच्चेबुधेतनुगतेससितेम्बरेऽजेसेज्यमदेचसुतआर्कयसूजोर्नृपालः ॥ चेदम्बरायतनुगाविधुमंदपूज्याज्ञारौधनेरविसितौहिबुकेधनीस्यात् ॥ ३२ ॥ गृहेस्वोच्चेकेंद्रेनरपतिसमः स्यात्समुदितेतनोरर्केज्यौचेत्सुतभवनगौशाश्वधनवान् ॥ बलीसौम्योलग्नेसधनपतिकेन्द्रेचशुभकृत्खलःषष्ठेकेंद्रेसशुभइहविद्यार्थसहितः ॥ ३३ ॥ अन्ययोगांतरं केनास्यधनप्राप्तिः ॥ उदयभास्करे॥ तनुगतोविधुतोंबुनि ४ वारविः सुखपदः

ज्ञनकांद्द्रविणप्रदः ॥ यदितनौसदिवाकरखे १० श्वरोऽधिपतियोग-
दृशः पितृकोषवान् ॥ ३४ ॥ हरि ५ बुधोयदिवाघट ११ वाक्प-
तिर्वपुषितत्पुरुषत्रयजंधनम् ॥ समृदुचेद्धनभेत्यधिकारवद्बहुतदास्य
वधूर्धनभृद्भवेत् ॥ ३५ ॥ अथांधयोगानाह ॥ यदिधनांत्यपती २
१२ त्रिक ६ । ८ । १२ गौसितांगपयुतौचतदानयनक्षतिः ॥
यदिविधुः ससितः सखलोधनेविनयनो यदिसेंदुभृगुस्त्रिके ॥ ३६ ॥
निशितदांधउतार्कसितान्वितस्तनुपतिर्जननांधकरस्तदा ॥ पितृसु-
ताऽनुजमातृकुटुंबिनीपतयएवमिताहितथाफलाः ॥ ३७ ॥ संके
तनिधौ ॥ द्वादशेलग्नतोमीनगश्चेद्रविर्दक्षनेत्रार्तिकृद्वात्रिपोऽन्वा-
क्षिहा॥ पंचमेस्तंगतश्चेत्कुजोवासितः स्यात्तदाचक्षुषाकाणएवस्फु-
टम् ॥ ३८ ॥ सिंहलग्नेसितोवायमोवाव्ययेनेत्रपीडाकरौमानवा-
नांमतौ ॥ स्वव्ययार्यष्टमेषुक्रमाद्भूमिजार्कीन्दुसूर्येषुतत्तद्भुजाक्ष्णोः
क्षयः ॥ ३९ ॥ इत्यंधयोगाः ॥ अथधनसंख्यायोगानाह ॥
यवनजातके ॥ सहस्रनाथोदिनपः प्रदिष्टोलक्षाधिपोरात्रिकरः स-
दैव ॥ शताधिपोभूतनयस्तथैव कोटीश्वरोचंद्रसुतः सदैव॥ ४० ॥
सर्वाधिराजः सुरराजमंत्रीशुक्रोथशंखंशनिरल्पतुल्यः॥ स्वतुंगगाः
स्युर्यदिसर्वएतेत्वथांतरालेह्यनुपाततः स्यात् ॥ ४१ ॥ अत्रानुपातः
स्थानबलोक्तवत्तदाह ॥ पादोनंचबलं त्रिकोणगृहगेस्वर्क्षेदलंचत्रये
भांशाहाधिपमित्रभेचचरणो मित्रेसमर्क्षेऽष्टमः ॥ ४२ ॥ इतिधनसं-
ख्यायोगः ॥ अथधनस्यव्ययः केनहेतुनाभविष्यतितद्योगा-
नाहवीरजातके ॥ वित्तस्यभवनेस्थैर्य्यंबुधेभानुसमन्विते ॥ प्रियाद-
लितवित्तंस्यात्स्त्रीग्रहेपुरुषान्विते ॥ ४३ ॥ निषादम्लेच्छसंयुक्ते

ग्रहेतत्रसुसंस्थिते॥ वेश्यागंधर्वनाटचेनतद्धनस्यव्ययोभवेत् ॥ ४४॥ पूर्वदेवेज्यदेवेज्योधनभावेसमागतौ ॥ व्ययंधनस्यकुरुतः नित्यंभूसुरस्वःसुरैः ॥ ४५ ॥ अथधनस्थैर्ग्रहैरोगचिह्नान्याह ॥ विषेणवाथशस्त्रेण तथारक्तप्रकोपतः ॥ तन्मूर्तिर्विहितालोकेभौमोयद्धनसंस्थितः ॥ ४६ ॥ मुखेवाप्यथवानेत्रे दक्षिणांसेचकर्णके ॥ व्रणंवाथविघातोवाक्रूरैःस्याद्धनगैर्ग्रहैः ॥ ४७ ॥ शनौवासैंहिकेयेवातत्रस्थेग्रहजारुजा ॥ चंद्रेणशीतजादोषाःसन्निपातसमाश्रयाः ॥ ४८ ॥ दंतुरोदंतरोगीवातत्रस्थेसिंहिकात्मजे ॥ ससौम्यवदनोवाग्मीजीवेतत्रैवसंस्थिते ॥ ४९ ॥ अथधनंकदोदेतितद्योगानाह ॥ धनस्थानेयदाचंद्रःसौम्योवायदिगच्छति ॥ धनेशोवापिलग्नेशोयदोदेतितदाधनम् ॥ ५० ॥ धनाख्यंतच्चभवनंपुरुषस्यमुखंस्मृतम् ॥ सौम्याःकुर्वंतिरूपाढ्यंक्रूरास्तत्ररुजान्वितम् ॥ ॥ ५१ ॥ सुवर्णंविविधंरत्नंशुभंमुक्ताफलैर्युतम् ॥ सर्ववस्तुभवंलाभंसौम्यावर्णान्वितांगिरम् ॥ ५२ ॥ दद्युःसौम्यग्रहास्तत्रसंस्थिताश्चबलान्विताः ॥ लग्ननाथोविशेषेणशुभंपूर्णंप्रयच्छति ॥ ॥ ५३ ॥ सौम्यदृष्टिःशुभाप्रोक्ताक्रूरदृष्टिर्नशोभना ॥ यदिलग्नपतिःक्रूरस्तथाप्येवंनसंशयः ॥ ५४ ॥ यदासूर्य्योमुखेयस्यजातकस्यभवेत्क्वचित् ॥ शैलेयव्याधितंचिह्नंभवेत्तस्यनचान्यथा ॥ ५५॥ नात्यंतधनसंपन्नोमानवोजायतेभुवि ॥ बुधेचैवतथासूर्येभवेत्सेवाप्रियःसदा ॥ ५६ ॥ एतेयोगाःपृच्छायामप्यवलोकनीयाः ॥ इतिविशेषविचारः॥ अथधनभावेराशिफलम्॥यवनः॥ आद्येधनगतेपुंसांधनंपुण्यार्जितंभवेत् ॥ चतुष्पदोत्थंचधनंवंधूत्थंच

यच्छंति ॥ ५७ ॥ वृषेधनस्थेलभतेकृषियत्नेनवैधनम् ॥ चतुष्पदान्नमणिभिर्नित्यंप्राप्नोतिवैभवम् ॥ ५८ ॥ तृतीयेधनगेनित्यं धनंस्त्रीजनितंभवेत् ॥ रौप्योद्भवंकांचनाश्वैर्धनंपुंसामहर्निशम् ॥ ॥ ५९ ॥ कर्केधनगतेनृणांधनंवृक्षजलोद्भवम् ॥ न्यायार्जितंसुभोज्यंचसुतानांप्रीतिदायकम् ॥ ६० ॥ पंचमेधनगेराशौधनमारण्यजंसदा॥सर्वोपकारकंचैवविक्रमोपार्जितंतथा ॥ ६१ ॥ वित्तेंगनागतेराशौधनंभूमिपतेर्भवेत्॥ हिरण्यमुक्तामणिजंगजाश्वादिभिरेवच ॥६२॥ तुलेधनस्थेलभतेधनंपण्यसमुद्भवम् ॥ आहवादिप्रजातंचधनंन्यायार्जितंतथा ॥ ६३ ॥ अलौधनेधनंपण्यंप्रभूतंत्वश्मजंतथा ॥ मृन्मयंमौक्तिकंचैवतथासस्योद्भवंधनम् ॥ ६४ ॥ धनेधन्वीधनंस्थैर्य्यंयशोर्थंचरसोद्भवम् ॥ पश्वादिसंभवंचैवतथाधर्मविधानजम् ॥ ६५ ॥ मृगेधनस्थेचधनंप्रपंचैर्विविधैर्भवेत् ॥ नृपसेवासमुत्थंचकृषिभिश्चविदेशतः ॥६६॥ घटेधनस्थेचधनं प्रभूतंफलपुष्पजम् ॥जलोद्भवंसाधुभोज्यंजनोत्थंचोपकारकैः ॥६७॥ मत्स्येधनस्थेलभतेमनुष्योधनंप्रभूतैर्नियमोपवासैः ॥ विद्याप्रभावान्निधिसंगमाच्चमातापितृभ्यांसमुपार्जितंच ॥ ६८ ॥ अथधनभावस्वामिनोद्वादशभावोपरिफलंवृद्धयवनः॥ द्रव्यपतिर्लग्नगतः कृपणंव्यवसायिनंसुकर्माणम् ॥ धनिकंश्रीपतिविदितंकरोतिनरमतुलभोगयुतम् ॥ ६९ ॥ धनपोधनभावस्थोधनवंतंधर्मकर्मनिरतंच ॥ लाभाधिकंसलोभंकुरुतेपुरुषंसदाऽऽदानम् ॥ ७० ॥ सहजगतेतुधनेशेव्यवसायीकलिकरोकलाहीनः ॥ चौरश्चंचलवित्तो भवतिनरोविनयनयरहितः ॥ ७१ ॥ तुर्य्यगतेद्रविणपतौपितृ-

लाभश्चापरैःसहोपायः ॥ दीर्घायुःक्रूरेष्वपिअथवामरणंविनिर्देश्यः ॥ ७२ ॥ शश्वद्विलसन्नयनंकर्मणिकष्टेरतंप्रसिद्धंच ॥ कृपणंदुःखविघातंतनयगतोद्रव्यपःकुरुते ॥ ७३ ॥ षष्ठगतेद्रविणपतौ धनसंग्रहतत्परंकृतघ्नंच ॥ भूस्वामिनंचखचरेपापेधनवर्जितंसदापुरुषम् ॥ ७४ ॥ धनपेसप्तमगृहगेश्रेष्ठांगनाविलासभोगभाग्भवति ॥ धनसंग्रहणीभार्याक्रूरेखचरेभवेद्वंध्या ॥ ७५ ॥ धनपेचाष्टमभाजि स्वल्पकलिश्चात्मघातकःपुरुषः ॥ उत्पन्नभुग्विलासिपराहिंसकः सदैवदैवपरः ॥ ७६ ॥ धनपेधर्मगृहगेसौम्येदानप्रसिद्धिभाग्भवति ॥ क्रूरेदरिद्रभिक्षुश्चविडंबवृत्तिस्तथामनुजः ॥ ७७ ॥ दशमस्थेचधने शेनरेंद्रमान्योभवेच्चनरपालः ॥ सौम्यग्रहेचमातुःपितुश्चपरिपालकः पुरुषः ॥ ७८ ॥ एकादशगेस्वपतौव्यवहारपरंश्रियःपतिंख्यातम् ॥ प्रतिपालकंचलोकेसततंकुरुतेनरंजातम् ॥ ७९ ॥ द्वादशगेद्रविणपतावष्टकपालीविदेशऋद्धिश्च ॥ दुष्कर्माक्रूरग्रहेसौम्यग्रहेचसंग्रामिकःपुरुषः ॥ ८० ॥ अन्यच्च ॥ धनेशलग्नेशयुताःशुभाश्चेद्धनस्थितास्तत्फलमेवदद्युः शुभाव्यदृष्टेस्वसुखंशुभावाग्निःस्वोऽब्जदृष्टेविदिवात्रपापे ॥ ८१ ॥ वंकृशोऽब्जोधनगोज्ञदृष्टोधनक्षयायैवसितस्तदाल्यै ॥ रोगोत्थचिंताखगोयदार्कः सञ्जीग्रहश्चेत्कटुवाकृशस्वः ॥ ८२ ॥ सज्ञेरवौसेवनकृलस्वोयद्भावपाव्येस्यकरस्थितस्वः ॥ भवेद्यथोदाहरणंसुतेशेखेचरेस्यास्तिसुताकेरस्वम् ॥ ८३ ॥ चेद्भ्रातृपेस्याद्भगिनीकंस्थं मातृष्वसामातुलपेतुवाच्या ॥ राहौधनेदन्तरुजाधनस्थेऽब्जेसन्निपातादिकशीतरोगी ॥ ८४ ॥ तत्रस्थितेक्रूरयुतेसितेस्यात्काणोथवाक्षणाविकृतः स्खलद्गीः ॥ धनव्ययस्थे भृगुजेथवास्कर्

व्यथाब्जेतुदृशोर्विकारः ॥ ८५ ॥ जीवेकोशेसाधिकारेथवाज्ञेवाग्मीसस्यान्मानवः सौम्यवक्त्रः ॥ केतौदीर्घास्योथखेटःस्वगश्चेत्सारिस्तद्वेवास्यमृत्युर्मुखार्त्त्या ॥ ८६ ॥ विधौधनेभीः सलिलात्तथाद्यौराहौधनेवावनिताग्रहाढ्ये ॥ म्लेच्छैर्निषादैर्गणिकाजनैर्वा गान्धर्वनाट्यादिभिरस्वतास्यात् ॥ ८७ ॥ यदास्वपोवाधनगःकुजश्च चेन्निर्बलोऽर्थेग्निनृपैःस्वनाशः ॥ रक्तप्रकोपाद्विषशस्त्रघातान्नरस्य मृत्युःक्षितिजेसपापे ॥ ८८ ॥ इतिधनभावविचारः ॥२॥ अथ भ्रातृभावः ॥ तत्रकिंविचार्य्यमित्युक्तंजातकाभरणे ॥ सहोदराणामथकिंकराणां पराक्रमाणांसहजाद्विचारः ॥ विचारणा जातकशास्त्रविद्भिस्तृतीयभावेनियमेनकार्या ॥ १ ॥ अन्यच्च ॥ बाहुस्तृतीयंसहजाख्यमत्रत्वम्बापितृव्याम्बकमातुलादेः॥ दास्यादिकानांश्रुतिविक्रमादेर्भ्रातुः फलंवाच्यमतः सुधीभिः ॥२॥ अथ सामान्यविचारेणभ्रातृभावस्यांऽस्तिनास्तिविचारो यवनमतेन॥ सहजेसर्वपापाढ्येपापर्क्षेभ्रातरोनहि ॥ सौम्यर्क्षेसौम्यखेटाढ्येबहवःस्युः सहोदराः ॥३ ॥ अन्यच्च॥ सत्सम्प्रयुक्तं सहजेशुभर्क्षे दृशासतांभ्रातृसुखार्थसिद्ध्यै॥ कुजेक्षितस्तत्रशनिःसहोत्थक्षयायशुक्रेज्यदृशाशुभंस्यात्॥ ४ ॥ स्वर्क्षेजीवेभ्रातृगेभ्रातृसौख्यंमन्दे भ्रातृस्थे तुभाग्याधिकःस्यात्॥ बाहौराहौसार्कजेदुर्नखत्वंदक्षेहस्तेदारुघातोनिलार्त्तिः ॥५॥ एवंकुजेर्केचतदास्थिभंगःस्याद्दुष्करत्वंविकृतिर्नसौम्ये ॥ भौमेन्दुदृष्टाः सहजेनवांशायावन्मितास्तत्समसोदराः स्युः ॥ ६ ॥ भानौभाग्येस्वर्क्षगेभ्रातृनाशश्चेज्जीवेदेकोनुजोराज-

तुल्यः। दुष्टैर्दृष्टोऽब्जोऽखिलान्हन्तिबाहौज्येष्ठानर्कोंऽस्तोनुजांश्छन्यु स्तान्॥ ७॥ भुजेकुजेक्रूरदृशायतांकितंक्षताच्चपित्तादनुजेगलेरुजा॥ सशत्रवस्तत्रखलाभुजव्यथागरुन्मरुद्द्यूतपराबलाबलात् ॥ ८॥ द्यूनेर्कजेऽहौनवमेस्नआयगेस्त्रहोत्थहानिः सहजेशनावपि ॥ बुधेज्य शुक्राः सहजेतुतत्सुखंद्वयोःक्षयोदुष्टयुतीक्षणान्नृणाम् ॥ ९ ॥ च न्द्रेतुभाग्ये सहजेऽर्कजश्चेद्वागौशुभैर्दृष्टयुतेतृतीये ॥ तद्वद्विनश्येद्भ गिनीत्रयंवैचिह्नंतुबाह्वोरथवापिकुक्षौ ॥ १० ॥ सोदरीराहुदृष्टेसि तेभ्रातृगेदुर्विषात्स्याद्व्यसुस्तत्रचेन्मन्ददृक् ॥ सर्पभीरप्युदीर्या कर्णेखलैःकर्णमांद्यं परंषष्ठतुल्यंफलम् ॥ ११ ॥ अथग्रहाणांयु तिदृष्टिफलं जातकरत्ने तत्रादौरवेःफलम् ॥ भ्रातृस्थानेस्थि सूर्य्येभ्रातृसौख्यंनजायते॥ कुटुंबैःभ्रातृभिःसार्द्धंकलहःस्वर्क्षगेसुख म्॥ १२॥ भ्रातरश्चोत्तमा ज्ञेयाश्चत्वारोथत्रयोथवा। भगिन्यौचोत्त द्वेचाविनिष्टंचार्भकत्रयम्॥ १३॥ क्रूरैर्युक्तेथवादृष्टेमृतोभ्राताचकथ्य न ॥ भगिनीचमृताकाचिद्वंध्यावाविधवाभवेत् ॥ १४ ॥ ए द्वौवामृतोभ्राताविषशस्त्रादियोगतः ॥ अपत्यदुःखंवक्तव्यंभगिन्य भ्रातुरेवच ॥ १५॥ अथचन्द्रफलम्॥ भ्रातृस्थानेस्थितेचंद्रेभ्रा तृसौख्यंसमादिशेत् ॥ नीरोगौभ्रातरौद्वौचभगिनीत्रयमेवच । ॥ १६ ॥ अथभौमफलम् ॥ भ्रातृस्थानगतेभौमेभ्रातृसौख्यं सुदुर्लभम् ॥ दृष्टेचगुरुचंद्राभ्यांभ्रातैकःस्याच्छुभप्रदः ॥ १७॥ भगिन्यौसुभगेद्वेच क्रूरेणनिधनंगते ॥ कुमृत्युनाभ्रातरौद्वौमृतौश स्त्रादिभिस्तथा ॥ १८ ॥ अथबुधफलम्॥ बुधेचसहजस्थाने

ष्टिभिर्वाविलोकिते ॥ भ्रातॄणांभगिनीनांचसुखंतस्यमहद्वदेत् ॥ ॥ १९ ॥ भ्रातरःपंचविघंतेशत्रुदृष्टयामृतिंवदेत् ॥ चतस्रःपंचवाज्ञेयाः स्वसारः. शुभलक्षणाः ॥ कुजेनशनिनादृष्टेतासांवंध्यत्वमीष्यते ॥ ॥ २० ॥ अथगुरुफलम् ॥ भ्रातृस्थानेगुरौभ्रातृभगिनीभ्योसुखंवदेत् ॥ भ्रातरःपंचचत्वारःक्रूरदृष्टयाविपत्तयः ॥ क्रूरैश्चशत्रुभिर्दृष्टे स्वल्पंभ्रातृसुखंभवेत् ॥ २१ ॥ अथभृगुफलम् ॥ भ्रातृस्थाने भृगोःपुत्रेभगिन्योबहुलाःस्मृताः ॥ भ्रातरश्चत्रयःप्रोक्ताःक्रूरेणनिधनं गताः ॥ २२ ॥ क्रूरेणवीक्षितेयुक्तेभ्रातरस्त्वन्यमातृजाः ॥ कश्चिन्नष्टोगतःकश्चित्कश्चित्तस्यचवर्त्तते ॥ २३ ॥ अथशनिफलम् ॥ तृतीयस्थेसूर्य्यपुत्रेसिंहिकातनयेथवा ॥ भ्रातृजन्यंसुखंनास्तिदृष्टिभिर्वाविलोकिते ॥ २४ ॥ क्रूरैर्युक्तास्तत्रदृष्टारविराहुधरासुताः ॥ शस्त्रेणनिहतोभ्रातापत्नीचास्यासमादिशेत् ॥ २५ ॥ अथविशेषविचारः ॥ तत्रादौबांधवानांसुखदुःखविचारः ॥ यदाचतत्पतिर्जीवोथवाजीवोविलग्नगः ॥ बांधवानांसुखंतस्यबहुलंजायतेतदा ॥ २६ ॥ तथा तृतीयगेमंदेसनरोभाग्यवान्भवेत् ॥ भवेद्दोषस्थितापीडाशरीरे तस्यसर्वदा ॥ २७ ॥ सिंहिकापुत्रसंयुक्तोयदातत्रभवेच्छनिः ॥ कुनखित्वंकाष्ठघातंकुर्याद्दक्षिणहस्तके ॥ २८ ॥ शुक्रोवाचंद्रमा वापि बुधोवातत्रसंस्थितः ॥ स्वस्रूबाहुल्यतांतस्यकुर्वंतिहिनसंशयः ॥ २९ ॥ यदातत्रगताःक्रूराबांधवास्तस्यदुःखिताः ॥ भवंतिकृपणाजायाभवित्रीनात्रसंशयः ॥ ३० ॥ नवमेचतृतीयेचषष्ठे क्रूरा यदाग्रहाः ॥ भ्रातॄणांचसुखंतस्यनाधिकंभविताखलु ॥ ३१ ॥ सहजस्थोयदामंदश्चंद्रेणवीक्षितोभवेत् ॥ तदाचतस्यजातस्यभार्या

दुश्चारिणींविदुः॥ ३२॥ तृतीयंपापभवनंपापग्रहयुतंयदा॥नातिशि
ष्टिर्भवेत्तस्यपुरापिपातकीमहान् ॥ ३३ ॥ चंद्रभ्रात्रीशलग्नेशावंशै
सौम्यास्तदानुजाः ॥ ३४ ॥ अथभ्रातृहयोगानाह ॥ अग्रेजाता
विर्हंतिपश्चाज्जातान्शनैश्वरः ॥ जातंजातंकुजोहंतिनतिष्ठतिनजीव
ति ॥ ३५ ॥ कुजदृष्टोसहजगोमंदोभ्रातृविनाशकृत् ॥ बुध
सहजगोभौमवीक्षितः सहजार्तिदः ॥ ३६ ॥ धनस्थानेयदाभौम
शनैश्वरसमन्वितः ॥ सहजेचभवेद्राहुर्भ्रातातस्यनजीवति ॥ ३७॥
कुजशनीत्रितयेसुखभेपिवासहजनाशकरौविमलौनचेत् ॥ य
शशीत्रितयेसविधुंतुदःसहजहानिकरोधनधान्यदः ॥ ३८ ॥
इतिभ्रातृहयोगाः ॥ अथभ्रातृसुखयोगानाह ॥ धनवान्निर्धना
कारःकृपणोभ्रातृसंयुतः॥कुटुंबीनृपपूज्यश्चसहजेदेवतागुरौ॥ ३९॥
सहजस्थानगोदत्तेगौरांगींभगिनींभृगुः ॥ ततोजडंचक्रूरंचमंद
कुरुतेनरम् ॥ ४० ॥ अथान्यद्भ्रातृहयोगाः ॥ भ्रातृगोमंद
कुर्याद्भ्रातृस्वसृविनाशनम् ॥ नृपतुल्यंचसुखिनंसततंकुरुतेनरम्
॥ ४१ ॥ भ्रातृगोहंतिवाव्यंगमथवाभ्रातरंतमः ॥ लक्ष्मीश्वरंरि
हीनंचिरंचतनुतेनरम् ॥ ४२ ॥ दिवामणौपुण्यगृहेस्वगेहेसंदेह
वानुजजीवितस्य ॥ एकःकदाचिच्चिरजीवितश्चेद्भ्राताभवेद्भूपति
समेतः ॥ ४३ ॥ अथमातृहयोगाः ॥ चंद्रमा यदिपापानांत्रि
तयेनप्रदृश्यते ॥ मातृनाशोभवेत्तस्ययदिनोवीक्षितःशुभैः॥ ४४॥
हजंप्रतिनश्चातिसहजस्थानगः कुजः॥ भूमिराज्यास्पदंपुत्रंदीर्घायुं
प्रयच्छति ॥ ४५ ॥ अस्तः पापयुतस्त्रिस्थः स्वसारंहंतिचंद्रजः॥
अर्थाल्पंविबलंकुर्यात्सएवाशुभवीक्षितः ॥ ४६ ॥ अन्य

उदयभास्करे ॥ यदिशनिस्तनुगः कुजवीक्षितः सहजहृद्गुरुशुक्रदृशाशुभः ॥ यदिनिशापतिवर्गयुतोऽनुजः ३ सकुजदृक्सहजस्सरुजस्तदा ॥ ४७ ॥ यदिकुजानुजपौत्रिकगोहिवास्वभसहोदरपीबुधवीक्षितः ॥ विसहजोयदिकेंद्रगतोऽनुजाधिकसुखं यदिवागुरुदृष्टयुक् ॥ ४८ ॥ अथभ्रातृसंख्यायोगानाह ॥ गर्गः ॥ यावंतोनवभागाः स्युः सहजेऽर्ककुजेक्षिताः ॥ तत्संख्याः सहजाज्ञेया अन्यैर्दृष्टास्तुयोषितः ॥४९॥ स्वक्षोच्चगतैः खेटैः द्वित्रिगुण्यंविनिर्दिशेत् ॥ ५० ॥ अथग्रहयोगैः संख्यामाह ॥ सहजस्थोयदाराहुर्धनस्थानेबृहस्पतिः ॥ बुधेनचसमायुक्तस्तस्यबंधुत्रयंभवेत् ॥ ५१ ॥ कविबुधौत्रितयेहिमगुर्व्यये भवतिसप्तसहोदरसोदराः ॥ ५२ ॥ सहजाचंद्रराश्यंतंगतैःखेटैस्तुसंख्यका ॥ तृतीयांकादृष्टिवशान्मृताःपापग्रहैस्तुते ॥ ५३ ॥ अथबधिरयोगदंतहानियोगावाह ॥ त्रिभवकोणगतास्तपनार्कजामृतिकरानशुभान्वितवीक्षिताः ॥ श्रुतिहराधनगायदितेतदादशनहानिकरानियतंमताः ॥ ५४ ॥ अथतृतीयस्थरव्यादिग्रहाणांमित्रसंख्यायवनेनोक्ता ॥ असंख्यमित्रःसविताप्रदिष्टोदशाधिपःशीतमयूखनित्यम् ॥ सहस्रमित्रःक्षितिजोबुधश्चशताधिपोदेवपुरोहितश्च ॥ ५५ ॥ अशीतिनाथोभृगुनंदनश्चसौरस्तुभौमेनसमंप्रदिष्टः ॥ स्वतुंगराशौयदिवर्तमानाःसर्वोनुपातस्यवशाद्ददंति ॥ ५६ ॥ अन्यच्चशौनकः॥पुंवीर्य्येखचरेतृतीयभवनेदृष्टेचपूर्णेथवापश्चात्पुत्रसमुद्भवंनिगदितंपूर्वंहिकन्योद्भवम् ॥ सौरिक्षेत्रविनष्टगर्भकरणंविख्यातम्मंत्रीश्वरंभौमेभ्रातृविनाशनंदिनकरेक्षीयेत्ततोबांधवम् ॥ ५७ ॥

दुश्चिक्ये भृगुचंद्रमा बलयुतः पश्चात्सुशीलाः सुताश्चंद्रः पुत्रफलं तदेवक-
थितं भृत्यादिवृद्धिप्रदम् ॥ पुंदृष्टे सहजे ग्रहैर्यदि युते तत्पृष्ठभागेषु चा-
रे गर्भविनाशनं च नियतं मंत्रीश्वरो नान्यथा ॥ ५८ ॥ यवनः । सह-
जगतकुजार्कौ वाक्पतिर्वासुतेशः भवति बलयुतश्चेद्भ्रातृपश्चोद्भवैः ।
भृगुशशिशशिपुत्राः पंचमे कन्यका वा शनिभवति कदाचिज्जायते ग-
र्भपातः ॥ ५९ ॥ सत्याचार्य्यः ॥ जीवे वा क्षितिपुत्र-
विक्रमगते भानौ यदा संस्थिते पश्चात्संततिपुत्रजन्म कथितं चंद्रज्ञशुक्रे
सुता ॥ सौरिर्गर्भविनाशनं प्रकुरुते नीचान्विते नेष्टकृच्चंद्राद्वा सह-
जे ग्रहैर्युतदृशे केचिद्ब्रुवंते बुधाः ॥ ६० ॥ अथ तृतीयभावे
शशिफलं वृद्धयवनः ॥ आद्ये राशौ तृतीयस्थे मित्रं द्विजकुलो-
द्भवम् ॥ परोपकारे प्रवणं बहुविन्नृपपूजितम् ॥ ६१ ॥ वृषे तृ-
तीये लभते मित्रं च प्रबलं नृपम् ॥ सुवित्तं भूपशुनिधिं सुकविं ब्राह्मणानु-
गम् ॥ ६२ ॥ तृतीयराशौ सहजे मित्रं वैश्यं लभेच्छुभम् ।
कृषिकृद्धर्मसंयुक्तं सुशीलं च सतां मतम् ॥ ६३ ॥ चतुर्थराशौ त्रि-
ये कुर्यान्मैत्रीं द्विजैः सह ॥ शांतैः सुधर्मैः सुनयैर्देवाराधनतत्परैः ।
॥ ६४ ॥ सिंहे तृतीये लभते मित्रं शूद्रं वधात्मकम् ॥ वाचालं प्र-
वित्ताढ्यं प्रचंडं जनगर्हितम् ॥ ६५ ॥ षष्ठे तृतीये लभते मैत्रीं स्त्री-
भिः सुशोभनैः ॥ विशेषतो धर्मरतो गुरुभक्तश्च जायते ॥ ६६ ॥
तृतीयस्थे तुलाराशौ मैत्री पापरतैर्भवेत् ॥ लौल्यैर्लौल्यकथा-
कैः कुकर्मस्थैर्निरंतरम् ॥ ६७ ॥ अलौ तृतीयभवने भवेन्मैत्री क-
लिप्रियैः ॥ म्लेच्छैः रौद्रैः कृतघ्नैश्च निर्लज्जैः पापसंयुतैः ॥ ६८ ॥
चापे तृतीये लभते मैत्रीं शूरैर्धनान्वितैः ॥ धर्मज्ञैः कोविदै राजसे-

कैश्चकृपाकरैः ॥ ६९ ॥ कुंभेतृतीयेभवनेभवेन्मैत्रीक्षमाधिकैः ॥ कृतज्ञैः सत्यसंयुक्तैः सुशीलैः शास्त्रवित्तमैः ॥ ७० ॥ मीनेतृतीयेलभतेमैत्री दास्यरतैः सदा ॥ कुभक्षकैः कुशीलैश्चखलैर्गीतप्रियैरपि ॥ ७१ ॥ अथसहजेशस्यभावेषुफलम् ॥ सहजपतौलग्नगतेवाग्वादीलंपटः स्वजनभेदी ॥ सेवापरः कुमित्रोक्रूरोवाभवतिपुरुषश्च ॥ ७२ ॥ धनगृहगेसहजेशेभिक्षुर्विधनोऽल्पजीवितः पुरुषः ॥ बंधुविरोधीक्रूरेसौम्यपुनरीश्वरः सबलश्च ॥७३॥ सहजगतः सहजपतिः समसत्वंसुहृदंशुभं सुजनम् ॥ देवगुरुपूजनकं नृपलाभपरंनरं कुरुते ॥ ७४ ॥ भ्रातृपतौतुर्यगते पितृमोदसुखकृदुदयकृत्तेषाम् ॥ मात्रासहवैरकरं पितृपैत्रभक्षकोनरोजातः ॥ ॥ ७५ ॥ दुश्चिक्येशेसुतगे सुबांधवःसतुसहोदरैःपाल्यः॥ दीर्घायुर्भवतिनरःपरोपकारीनिरंतरंपुरुषः ॥ ७६ ॥ षष्ठगतेसहजपतौ बंधुविरोधीनयनरोगीच ॥ भूलाभीभवतिभृशंकदाचिदपिरोगकलितश्च ॥ ७७ ॥ सहजपतौ सप्तमगेनरस्यभार्याभवेत्सुवररूपा ॥ सौभाग्यवती युवतिःक्रूरेदेवरगृहेयाति ॥ ७८ ॥ भ्रातृप्रभुरष्टमगःसहजमृतसोदरंनरंकुरुते ॥ क्रूरेबाहुव्यंगंपुरुषं जीवतियद्यष्टवर्षाणि ॥ ७९ ॥ धर्मगतेसहजपतौक्रूरेबंधुजितस्तथासौम्ये ॥ सद्बांधवश्चसुकृतिःसोदरभक्तोभवेन्मनुजः॥ ८० ॥ दुश्चिक्येशेदशमेनृपपूज्योभ्रातृबंधुपरिभक्तः ॥ उत्तमबंधुसुमान्यो विनिश्चितोजायतेमनुजः ॥ ८१ ॥ लाभस्थःसहजेशःसुबांधवंराज्यप्रियंनरंकुरुते ॥ पुरुषंबंधुषुपूज्यंसेवाभिधायिनंभोगनिरतंच ॥ ८२ ॥ व्ययगेदुश्चिक्येशेमित्रविरोधीसुबंधुसंतापी॥

दूरेवासितबंधुंविदेशशीलंनरंकुरुते ॥ ८३ ॥ इतिभ्रातृभा: वः ॥ ३ ॥ अथसुहृद्भावः ॥ तत्रकिंविचार्य्यमित्युक्तं जातकाभरणे ॥ सुहृद्गृहग्रामचतुष्पदोवाक्षेत्रोद्यमालोकनकंचतु र्थे॥ दृष्टेशुभानांशुभयोगतोत्रभवेत्फलब्धिर्नियमेनतेषाम् ॥ अन्यच्च॥ पुरगृहेष्टचतुष्पदबंधुभूर्जनकमातृविचारणमंबुभे ॥ सुखधृतांगनव श्वशुरं तथाकरणमत्रविचारणमंबुभे ॥ २ ॥ अन्यच्च ॥ सु खंचतुर्थंक्षितिवाहनादेर्वापीतडागप्रहिभूरुहादेः ॥ क्षेत्रेष्टमित्रालय बंधुमातृवक्षःस्थलादेश्चफलंविचार्यम् ॥ ३ ॥ अथात्रसामान्य विचारेणसुखस्थानांरव्यादीनांफलानि तत्रादौरवेः फलम् ॥ गर्गः ॥ बंधून्निहंतिसविता बंधुस्थानगतोनृणाम् ॥ सततंकारे त्तापंछिन्नवाहनमेवच ॥ ४ ॥ जनयेद्बहुसौख्यानिसंग्रामेप्यपलाय नम् ॥ कृशंचबहुभार्याढ्यंमानिनंकुरुतेरविः ॥ ५ ॥ अथचंद्रफ लम् ॥ भृत्यभार्यावाहनानां हर्म्यवाहनसंपदः ॥ बंधौकुमुदबं चेद्भवंतिसततंनृणाम् ॥ ६ ॥ अथभौमफलम् ॥ बंधुहीनंक जोबंधौभूम्याजीवोनरःसदा ॥ प्रवासीपंकिलेदेशेभवनेवासकर्दमे ॥ ७ ॥ अथबुधफलम् ॥ बहुमित्रोबहुधनो बंधौपापविनाश धः ॥ नानारसविलासीचसपापेत्वन्यथाफलम् ॥ ८ ॥ अथगुरु फलम् ॥ भवंतिबालमित्राणि यस्यमित्रगतोगुरुः ॥ दिव्यमाल्य वरक्रीडानानावाहनयोग्यता ॥ ९ ॥ अथभृगुफलम् ॥ परदारि तविचित्रीवासवासीविलासीबहुविधिबहुभोगीराजपूज्यश्चिरायुः वरपरिकरभार्याभार्गवेबंधुसंस्थेभवतिमनुजवर्गः सर्वदाविक्रमीच ॥ १० ॥ अथशनिफलम् ॥ भग्नासनग्रहोनित्यंविकलोदुःखपी

डितः ॥ स्थानभ्रंशमवाप्नोतिसौरेबंधुगतेनरः ॥ ११ ॥ अथराहुफलम् ॥ बंधुस्थानगतोराहुर्बंधुपीडाकरोभवेत् ॥ गविकर्किणि मेषेचसचबंधुप्रदोभवेत् ॥ १२ ॥ अथकेतुफलम् ॥ चतुर्थेभवनेकेतुर्मातृपित्रोस्तुकष्टकत् ॥ अतिचिंतामहाकष्टंसुहृद्भिःसुखवर्जितम् ॥ १३ ॥ अथात्रसुखभवनादेवसर्वसुखंतेनविशेषतो विचार्य्यम्। उक्तंचजातकसुधासिंधौ ॥ ग्रामेवानगरेवापिस्वस्थानेसौख्यकारणम् ॥ चतुर्थगैर्विलोक्यंवैग्रहैर्बलयुतैःसदा॥ १४ ॥ अथात्रसुखेशग्रहवशात् पूर्वग्रहसुखदुःखयोगानाह यवनः ॥ चतुर्थेशश्चतुर्थेवायदासूर्योव्यवस्थितः॥ अदृष्टंचगृहंतस्यविदग्धंचापिजायते ॥ १५ ॥ सोमेनवंचविज्ञेयंदग्धंभग्नंचभूमिजे ॥ चित्रं बुधेचविज्ञेयं सुदृढंचबृहस्पतौ ॥ १६ ॥ मनोहरंतथाशुक्रे जीर्णं राहुशनैश्चरे ॥ चतुर्थगैःप्रवक्तव्यं बलिष्ठैर्भास्करादिभिः ॥ १७ ॥ अथगृहेद्रव्यज्ञानमाह ॥ चंद्रेशुक्रेचतत्रस्थेधनंरौप्यमयंबहु ॥ प्रचुरंचतथाधान्यंरसाश्चबहुलागृहे ॥ १८ ॥ ॥ भवंतिनात्रसंदेहोलग्नपैस्तैर्विशेषतः॥ बुधेस्वर्णंगृहेतस्यजीवेरत्नान्वितंबहु १९॥ सूर्येमौक्तिकबाहुल्यं तथाकांस्येविशेषतः ॥ भौमेशस्त्रयुतंताम्रंशनौलोहंतथायुधम् ॥ २० ॥ अथपित्रोः सुखदुःखयोगानाह॥ तत्रस्थैःसौम्यखेटैश्चपितुस्तस्यसुखंभवेत् ॥ मंगलश्चयदासूर्य्यश्चतुर्थेबलिनौयदि॥ पित्तज्वरोवाव्रणरुक्तज्जनन्यैसमादिशेत् ॥ २१॥ शनिर्यदासचंद्रोवारविणावासमन्वितः ॥ मातुः शरीरदोषोत्थंव्यथांसकथयेत्सदा ॥ २२ ॥ सैंहिकेयेनसौरेणजनन्यांबांधवोमृतः जलेनचोर्ध्वपातेनस्वात्मनावातथापिहि ॥ २३॥ अथास्यपाता-

लसंज्ञा तेनकूपाऽऽकरादिविचारयोगानाह ॥प्रश्नेवाजन्मलग्ने
द्वापातालेचंद्रभार्गवौ ॥ तदाकूपादिकार्येषुक्षारंतोयंविनिर्दिशेत् ॥
॥ २४ ॥ सैंहिकेयेशनौतीक्ष्णंजीवश्चाप्यमृतोपमम् ॥ रवौभौ
च तत्रस्थेकष्टलभ्यंजलंभवेत् ॥ २५ ॥ बुधश्चसर्वकार्येषुमिश्र
मिश्रफलप्रदः ॥ अस्तंगतोयदानाथश्चतुर्थभवनस्यच ॥ शुभंफ
लंतदासर्वंविपरीतंभवेद्ध्रुवम् ॥ २६ ॥ अस्तंगतश्चतुर्थेशश्चतुर्थं
चपश्यति ॥ तदापितुर्गृहंहित्वाजातोदेशांतरं व्रजेत् ॥ २७ ॥
सौम्याःसर्वेचतुर्थस्थाःपापाश्चान्यत्रसंस्थिताः ॥ तदागृहेहिजातस्य
पूर्वजंधनमुच्यते ॥ २८ ॥ अथविशेषविचारो यवनमतेन ॥
स्वस्वामिशुभयुग्दृष्टंचतुर्थंमित्रसौख्यदम् ॥ संदृष्टोबुधभौमाभ्यांकु
रुतेत्रसुहृत्क्षयम् ॥ २९ ॥ चंद्राद्विलग्नाच्चरविश्चतुर्थेकुर्यात्पि
तृव्यस्यगृहास्पदंत्वम् ॥ शुक्रस्तुदाराश्रयसौख्यवृत्तं स्रग्वस्त्र
भाग्यगृहंविदध्यात् ॥ ३१ ॥ बुधस्तुपत्न्याहितबंधुसौख्यं बंधु
परावासकृताधिवासम् ॥ पापान्वितोज्ञोऽन्यगृहाटनानांकुजो
जोदासगृहेशयानाम् ॥ ३२ ॥ पापश्चतुर्थेपरवेश्मसंस्थस्तदीक्षितो
ऽन्यैःशुभदैरदृष्टः ॥ करोत्यसंख्यानपरीत्थतापं प्रायस्तुबंधूद्भवमे
दुःखम् ॥ ३३ ॥ गर्गः ॥ जीवेक्षितेशुभंशुक्रज्ञारदृष्टेसुहृत्क्षयः ॥ सु
क्रूरयुतेमातुःक्लेशकृत्सशुभेशुभम् ॥ ३४ ॥ अथान्ययोगाना
उदयभास्करात् ॥ अधिपसौम्ययुतेक्षितमंबुभेसुखकरंनियतंस
लं तथा ॥ अथचतुर्थलवाश्चयदुन्मितावुधदृशा हितदुन्मितभा
लाः ॥ ३५ ॥ अनृजुतुंगगतैस्त्रिगुणान्मितिः भवतितन्मृतिवा
मलास्तगैः ॥ अथसुखेशसमंश्वशुरंवदेत्तनुसुखेहिततःप्रियतां

योः ॥ ३६ ॥ अथमातृहयोगानाह उदयभास्करे ॥ सहज-
पापनिरीक्षितचंद्रमा विशुभहग्जननीमरणप्रदः ॥ सुख ४ ख १० यो-
श्चरिपु ६ व्यय १२ योःशशीखलयुतःपितृमातृहरःक्रमात् ॥ ३७ ॥
त्रिमितवर्षगणैरथवातयोःगतबलेसहजेपितथाफले ॥ विधुररौद्र ६ च
मृतौशनिराय ११ गोधरणिजोष्टसमासुविमातृकृत् ॥ ३८ ॥
यदितनौ १ गुरुभूमिसुतोधने २ सुररिपुःसहजेजननीहरः ॥ हरि ५ कु
जःप्रमदा ६ भृगुजस्तुलाशनिरगुर्मिथुनेचविमातृकृत् ॥ ३९ ॥
यदिखभे १० दितिजोजनकांबिकासुखहरोऽर्के १२ समासुचतौह-
रेत् ॥ व्ययविधुर्यदिवैरि ६ खलोंबुगो ४ धरणिजश्चतदाजननींहरेत्
॥ ४० ॥ व्ययरिपुस्थखलैर्जननीभयंगगन १० तुर्य्यगतैश्चपितु-
र्भयम् ॥ मदनगस्तपनोनिजतुंगगस्तदपरत्रविधुर्जननीहरः ॥ ४१ ॥
अथमातृसुखयोगः ॥ विधुभतोमदने ७ यदिवाक्पतिर्भवति
चेंदुयुतोजननीसुखम् ॥ ४२ ॥ अथपितृहयोगाः ॥ रिपु ६
विधौचशनौवपुषि १ स्मरे ७ धरणिजेजनितःपितृहानिदः ॥ सुर-
रिपुर्गुरुभेरिपुगोंगगोंबुनिचवापितृहात्रिभुजा ३ ब्दके ॥ ४३ ॥ सुररि-
पुर्व्ययगोऽवनिजःखभे १० स्मरे ७ रविः पितृकष्टकरस्तदा ॥ ग-
गनगोऽवनिजोयदिवैरिभे पितृविपत्तिकरःपरथाशुभः ॥ ४४ ॥ यदि
शनिस्तनुगश्चविधौरिपौ ६ मदनगश्चकुजोपितृनाशकः ॥ ४५ ॥
॥ अथगंडांतः ॥ हयमघानिर्ऋतिप्रथमंघटीत्रयमहर्निशिसंधि-
सुसंभवे ॥ पितृवपुर्जननीमृतिदंक्रमात् परिणयेमृतिकृच
गमेर्थहृत् ॥ ३८ ॥ इतिगंडांतफलम् ॥ अथवंशहयोगा-
नाह ॥ तनुधनव्ययसप्तमगैःखलैर्भवतिवंशविनाशकरःशिशुः ॥ य-

दिचतुष्कचतुष्टयगाःखलाधन २खलश्चकुलद्रविणांतकृत् ॥४७
ख १० तपसो ९ हिंमगुर्मदनेसितोंबुनि ४ खलोयदिवंशविनाश
कृत् ॥ ४८ ॥ अन्यच्च ॥ तनौयमेऽब्जेचरिपौ बुधेस्तेपितुःक्षयो
थाकिल केन्द्रगाश्चेत् ॥ क्रूराधनेवापितथात्रिकोणेवंशक्षयायैषदी
द्रयोगः ॥४९ ॥ अथवाहनसुखयोगानाह ॥ सुखपतौस्वभगेस
वेश्वरेशुभयुतोभटपोयदिवाहपः ॥ वपुषिजीवदृशानृपपूजितोयं
सुखेट् सुखदृग्भव ११ गस्तदा ॥ ५० ॥ अमितयानसुवाहनद
दोयदिसुखेट्स्वभगस्तनुपान्वितः ॥ अलमचिंतितमंदिरदःसुहृत्
खकरःपरधामगतोनचेत् ॥५१॥ ग्रहदाहयोगाः ॥ अथदशां
खलाहियदुन्मितास्त्रिकगताश्चनिजांत्यपसंयुताः ॥ ज्वलनदग्ध
हाश्चतदुन्मितानुरतिकष्टकराःसततंमताः ॥ ५२ ॥ यदिकुजों
नि ४ वैरि ६ गृहेंबु ४ पःसरिपुदृग्गृहदाहकरोमतः ॥ य
कुजोयदिवारविरंबु ४ गोविभृगुचंद्रदशागृहदाहकृत् ॥ ५३
अथवाहननाशयोगानाह। अथचतुर्थखलाश्चयदुन्मिताःशुभदृ
रहितांहितदुन्मिताः ॥ विरतयोहितवाहनवाजिनां यदिमूर्तिव्ययग
सुखदर्शिनः ॥ ५४ ॥ खलखगाश्चतथायदिसप्तपोगतभलत्रिक
सुखहानिदः ॥ यदिसपापविधुर्हिचतुष्टयेकशतरः स्वदिनैर्जनन
हरः ॥ ५५ ॥ द्विरदगोरथवच्छिबिकोष्ट्रकाश्वमहिषाद्यधिप
रवितःक्रमात् ॥ द्विवहवोयदिसप्तमगाःखगाः स्वगृहतुंगगताःश
टाधिपः ॥ ५६ ॥ यदिशुभौव्ययकोशगतौतनौतनुपतौ यदिवा
ककेंद्रयोः ॥ तनुपतिर्यदिवोचत्रिकोणभंश्रयतिसंपतियुक्शिबिका
ति ॥ ५७ ॥ गुरुलवःस्वगृहेचतदोष्ट्रवांस्तनुभवाधिपजीवदृशातथा

चंद्रिखगास्तनुतःप्रमदावधिप्लवपतिर्बहुभिर्जलगैस्तथा ॥५८॥ तनुगतेनृलवेकिलगीतविद्धिमकरेचतथांवुनितत्सुखम् ॥ नयनयोरसनास्पदनासिकाश्रुतिमनस्सुतथात्वचिलिंगके ॥ ५९ ॥ अधिकतैर्बहुधार्कमुखैःसुखंदशमगैःपरथापरथाभवेत् ॥६०॥ अथसुखप्रमाणयोगानाह यवनमतेन ॥ अनंतसौख्यंसुरराजमंत्री राजाधिपःसोमसुतःसितश्च ॥ सहस्रकःशीतमयूखमालीसर्वाधिपःसूर्य्यशनैश्चरश्च ॥ ६१ ॥ स्वतुंगसंस्थास्त्वनुपाततश्चसौख्यानियच्छंतिसदाग्रहेंद्राः ॥ नीचाश्रिताहीनबलाभवंतिषड्वर्गशुद्धाश्चयथास्वतुंगे ॥ ॥६२॥ अंथतुर्यभावेशाशिफलंयवनमतेन ॥ मेषेसुखस्थेलभतेनरःसौख्यंचतुष्पदैः ॥ स्त्रीभोगैरन्नपानाद्यैःस्वभुजोपार्ज्जितैर्धनैः ॥ ॥ ६३ ॥ वृषेसुखस्थेलभतेनासौख्यंविविधैर्नरैः ॥ सौर्येणसेवयाराज्ञांविप्रैर्यमव्रतैस्तथा ॥ ६४ ॥ तृतीयराशौसुखगेसुखानिस्त्रीकृतानिच ॥ जलावगाहैर्वन्यैश्चबहुपुष्पांबरैस्तथा ॥ ६५ ॥ कर्केसुखस्थेलभतेजलजैरुद्भवंसुखम् ॥ वहुकूपतडागोत्थंभूम्यारामास्पदादिकम् ॥ ६६ ॥ सिंहेसुखस्थेतुसुखंप्राप्नोतिमनुजोहठात् ॥ दरिद्रशीलवैपर्य्यात्कुमित्राद्वनसंश्रयात् ॥ ६७ ॥ कन्यागृहे वंधुग्रहेसौख्यंसुप्रमदाजनात् ॥ नृपसेवान्नपानाच्च उद्यमाद्धनसेवनात् ॥ ६८ ॥ तुलेसुखस्थेलभतेसुखंपैशुन्यजंसदा ॥ चौर्यैर्युद्धैर्मोहनैश्चतथाहास्यानुकीर्तनैः ॥ ६९ ॥ अलौसुखस्थेमनुजोजलजैस्तुलभेतत्सुखम् ॥ विषशस्त्रास्त्रजैश्चैवधनंनीचस्यसेवया ॥ ७० ॥ चापेसुखगतेतद्वद्धनंसंगरसेवया ॥ नृपसेवानुरक्तैश्चवचोभिर्युद्धकीर्तनैः ॥७१॥ मृगेसुखस्थेसुखभाक्तोयाच्चैवजलाशयात् ॥ पित्रोपचारैरारामा-

द्वाप्यादितटसेवनात् ॥ ७२ ॥ घटेसुखस्थे स्त्रीसंगात्सुखंचैवध-नंबहु॥मिष्टान्नपानैः पुष्पाद्यैः सुवाक्यैःकपटानुगैः॥ ७३ ॥ मीनेसुख-स्थेतुसुखंमनुष्योप्राप्नोतिसौख्यंजलसंश्रयेण ॥ सुखंतथादेवसमुद्भवै-श्चस्थानैःसुवस्त्रैःसुधनैर्विचित्रैः॥ ७४ ॥ इतिराशिफलम्॥ अथसु-खेशस्यभावेषुफलंवृद्धयवनः ॥ तुर्य्यपतौलग्नगतेपितृपुत्रौस्नेह-लौमिथः कुरुते॥ पितृपक्षवैरिकलितं पितृनाम्नासुप्रसिद्धंच॥ ७५॥ पातालपेधनस्थेक्रूरखगेपितृविरोधकृच्चशुभे ॥ पितृपालकःप्रसिद्धः पितालभेन्नैवतल्लक्ष्मीम्॥ ७६ ॥ तुर्येशेसहजगतेपितृमातृच्छेदकंवि-दितपितरम्॥ पित्रासहकलहकरंपितृबांधवपालकं विदितम् ७७॥ तुर्येगतेतुर्यपतौपितरिक्षितिपाधिनाथमानरतम् ॥ पितृलाभपरो भवतिस्वधर्मनिरतःसुखीभवति ॥ ७८॥ सुतगेतुर्यगृहेशेपितृलाभा-द्भोगवान्मनुजः॥ दीर्घायुर्भवतिनरोक्षितिपतिसिद्धस्तुलाभदोपुत्रात् ॥ ७९ ॥ हिबुकपतौरिपुसंस्थेपितृद्रव्यनाशकोपितरिवैरी। पितृदोष-करेक्रूरेसौम्येधनसंचकस्तनयः॥ ८० ॥ अंबुपतौसप्तमगेक्रूरेश्वशुरंसु-खान्नपालयति॥ सौम्येपालयतिपुमान्बलयुक्तंकुलपतिंकुरुते।८१। छिद्रगतेतुर्य्यपतौ क्रूरंरोगान्वितंदरिद्रंवा ॥ दुष्कर्मपरंमृत्युःप्रिय-मथवामानवंकुरुते ॥ ८२ ॥ सुकृतेतुर्य्यपतावपिसत्संगीसमस्तवि-द्यावान् ॥ पितृधर्मसंग्रहकृत्पितृतीर्थापेक्षकोमनुजः ॥ ८३ ॥ पातालेशंबरगेपापेसुतोमातरंत्यजति ॥ कन्यादयितःसौम्यैःपुनर-न्यसेवाकरोपुरुषः ॥ ८४ ॥ लाभगतेतुर्य्यपतौ पितृपालकोविदे-शगोचाढ्यः ॥ पापेतत्पतिखेटेत्वन्यपितुर्जन्मनिर्देश्यम् ॥ ८५ ॥ द्वादशगेतुर्य्यपतौमृतंपितरोवाविदेशगोवाच्यः ॥ पुत्रस्यपापखेटे

त्वंन्यपितुर्जन्मनिर्देश्यम् ॥८६॥ इतितुर्य्यभावः ॥४॥ अथसुतभावः ॥ तत्रसुतभावेकिंविचार्य्यमित्युक्तंजातकाभरणे ॥ बुद्धिप्रबंधात्मजमंत्रविद्याविनेयगर्भस्थितिनित्यसंस्थः ॥ सुताभिधानेभवनेनराणां होरागमज्ञैःपरिचिंतनीयम् ॥ १ ॥ अथात्रसामान्यविचारेणपंचमस्थितार्कादीनांफलानि ॥ तत्रादौरवेः फलम् ॥ पंचमेस्थिरगेहेस्याद्रविःप्रथमपुत्रहा ॥ नहंतिचरभेपुत्रानन्यर्क्षेपुत्रघातकः ॥ २ ॥ अथचंद्रफलम् ॥ पंचमेरजनीनाथोकन्यापत्यमपुत्रकम् ॥ क्षीणःपापयुतोवापिजनयेच्चंचलांसुताम् ॥३॥ अथभौमफ०॥रिपुदृष्टोरिपुक्षेत्रेनीचोवापापसंयुतः ॥ भूमिजःपुत्रशोकार्त्तिंकरोतिनियतंनृणाम् ॥ ४ ॥ अथबुधफ०॥ पंचमस्थश्चंद्रपुत्रः संतानंप्रकरोतिहि ॥ अस्तंगतः शत्रुदृष्टश्चोत्पन्नस्यविनाशकः ॥५॥ अथगुरुफ० ॥ समृद्धोबहुपुत्रश्चदाताभोक्तागुणान्वितः ॥ धनीमानीचसततंसुतस्थेदेवतागुरौ ॥ ६ ॥ अथभृगुफलम् ॥ सुतसुखविविधोपचितंपरमधनंपंडितंशुक्रः ॥ कुरुतेपंचमराशौमंत्रिणमथदंडनेतारम् ॥ ७ ॥ अथशनिः ॥ सुतभवनगतोरिमंदिरस्थोसकलसुतान्विनिहंतिमंदगामी ॥ समुदितकिरणःस्वतुंगभस्थःकथमपिजनयेत्सुतीक्ष्णमेकपुत्रम् ॥८॥ अथराहुफ० तनयंदीनमलिनंसुतर्क्षेरचयेत्तमः ॥ यदिचंद्रगृहंतत्स्यात्तदानींसंततिर्भवेत् ॥ ९ ॥ सिंहकुलीरसंस्थेराहुः पुत्रेथपुत्रिणंकुरुते ॥ अन्यस्मिन्नपिराशौपुत्रविहीनोभवेन्मनुजः ॥ १० ॥ पुत्रेकेतुःप्रजाहानिः विद्याज्ञानविवर्जितः ॥ भयत्रासंसदादुःखीविदेशगमनेरतः॥ ११ ॥ तातांबिकासोदरमातुलाश्चमातामहाःपितृपिताचसू-

नु ॥ सूर्यादिखेटैः खलुपंचमस्थैर्नश्यंतिनूनंमुनयोवदंति ॥ १२ ॥
अथसुतस्थरवेरुपरिग्रहाणांदृष्टिफलानि ॥ सुतस्थानगतेसूर्ये
क्रूरैर्दृष्टेथवातथा॥ सुस्थिराचभवेद्बुद्धिः प्रजास्वल्पाप्रजायते॥ १३॥
लोहानलभवापीडाशनिदृष्ट्याह्यपत्यजा ॥ गर्भस्रावोभौमदृष्ट्यागर्भ
पातश्चराहुणा ॥ १४ ॥ एवंद्विपाददृष्टिश्चमृतापत्यत्वकारणम् ।
केतुनाकाकवंध्यत्वंराहुणाचानपत्यता ॥ १५ ॥ बुधेक्षितेसु
सूर्य्येंद्वौ पुत्रौपंचकन्यकाः ॥ कुजदृष्ट्यापुत्रनाशोराहुणाकन्यका
मृति ॥ १६ ॥ केतुदृष्ट्यागर्भपातःपुंस्त्रीग्रहविचारतः॥ क्रूराक्रू
विचारैश्चसंख्यानाशश्चसंततेः ॥ १७ ॥ सुतस्थानस्थितेमंदेदृष्टे
क्रूरखेचरैः ॥ उदरे जायतेपीडालोहजावह्निजातथा ॥ १८ ॥
अथपंचमस्थराहोर्ग्रहयुतदृष्टिफलानि ॥ सुतस्थानस्थितेरा
भार्य्यापुष्पेणवर्ज्जिता॥ सूर्ययुक्तेसूर्य्यदृष्टेजायतेचानपत्यता॥ १९
चंद्रयुक्तेक्षितेराहौकिंचित्सूत्यानपत्यता॥ भौमदृष्ट्यापुत्रनाशोग
स्रावस्तथैवच ॥ १६ ॥ बुधयुक्तेक्षितेकन्याजायतेचापिनश्यं
॥ २० ॥ गुरुणैकःशुभःपुत्रोमृतश्चैकोविवाहितः ॥ १७ ॥ भृगु
कः शुभःपुत्रोजलेचैकोमृतोभवेत् ॥ सुतैर्वियोगंमंदेनकन्यैकाम
च्छगामिनी ॥ २१ ॥ इतिसामान्यविचारः ॥ अथविशेषवि
चारः ॥ मतिसुबंधनमात्मजकौशलाध्ययनमंत्रकलासुतभा
देत् ॥ २२ ॥ अतोत्रविचारेपूर्वंमतिरुक्तातद्विचारः सूर्य
जातके॥ पंचमेर्केस्थिराबुद्धिश्चंद्रेचंचलचित्तता ॥ उग्रबुद्धिर्भू
पुत्रेबुधेजीवेशुभामतिः ॥ २३॥ मृदुःपुत्रेभृगौबुद्धिर्कुटिलाराहु
योः ॥ सुदेवसेवासौम्येच बहुदेवाचपापके ॥ २४ ॥ शुभग्रहेसा

मेप्रपंचीचाशुभग्रहे॥युतिदृष्टिवशाद्वापिपंचमेफलमादिशेत्॥२६॥ इतिमतिः॥ एवंशुभग्रहैर्नयवान्चाशुभग्रहैरनयवान्॥अथात्मजविचारस्तत्रादौसंतानसंभवाऽसंभवविचार जातकाभरणे॥ सुताभिधानंभवनंशुभानांयोगेनदृष्ट्यासहितंविलोक्यम्॥ संतानयोगंप्रवदेन्मनीषीविपर्ययत्वेहिविपर्ययःस्यात् ॥ २६ ॥ संतानभावोनिजनाथदृष्टःसंतानलब्धिंशुभदृष्टयुक्तः॥करोतिपुंसामशुभैश्चदृष्टः स्वस्वाम्यदृष्टोविपरीतमेव॥२७॥अन्यच्च॥शुभसुतभवनंशुभयुतदृष्टंसुतर्क्षमिहयेषाम्॥तेषांप्रसवः पुंसांभवत्यवश्यंनविपरीतम्।२८॥ ग्रंथांतरेण ॥यावत्संख्याग्रहाणांसुतभवनगतापूर्णदृष्टिर्युतावातावत्संख्याप्रसूतिर्भवतिबलयुताः पुंग्रहाः पुत्रजन्म ॥ पुत्राःशुक्रश्चचंद्रोहिमसुतरविजोगर्भहानिंकरोतिकिंचिच्चंद्राद्विचार्य्यंमुनिवरकथितंतद्विचिंत्यंनवांशे ॥ २९ ॥ चंद्रेसुतंभंपातेपुरुषांशेओजराशिके भवति ॥ सूर्य्येणदृश्यमानेबहुपुत्रभाक्क्लेशसूतिश्च ॥ ३० ॥ सौम्येस्वक्षेत्रगतेपंचमभेपुत्रभाग्भवति ॥ सिंहस्थितेपिचैवंनवमेवातृतीयभार्यायाम् ॥ ३१ ॥ पापद्वयेनयुक्तेपंचमभवनेबहुप्रजालाभः ॥ चंद्रेपंचमभवनेदत्ताप्तिर्हीनवीर्य्यकेसौम्ये ॥ तद्वद्वलोपपन्नेसुपुत्रवान्विगतरोगश्च ॥ ३२ ॥ पुत्रेशेसुतगेवातत्स्थेखेटेबलोपेते॥ सत्पुत्रवान्सुबुद्धिः पुण्याचारोभवेज्जातः ॥ ३३ ॥ इतिपुत्रप्राप्तियोगाः॥अथसंतानसंख्यायोगानाहवैष्णवतंत्रे॥ संतानभावांकसमानसंख्यासत्संततिः सत्खचरेसुतस्थे ॥ नीचोच्चमित्रारिग्रहस्थितानांदृष्टिःशुभानांशुभमर्भकानाम् ॥३४॥ उद-

यभास्करे॥सुतगृहांकसमापिचसंततिर्भवतिवाथनवांशसमेपिवा॥ ॥ ३५ ॥ ग्रंथांतरेण। संख्यानवांशतुल्याज्ञेयासौम्यैर्युतादृष्टा ॥ शुभदृष्टेतद्विगुणाक्लिष्टापापांशकेथवादृष्टा ॥ ३६ ॥ पंचमभवनस्वामीयत्संख्येशेभवेद्धितत्संख्या ॥ शुक्रनवांशेज्ञेयाबहुलापत्यानिशुक्रदृष्टांशे ॥ ३७ ॥ अथग्रहयोगैः संतानसंख्यायोगानाहवैष्णवतंत्रे ॥ लग्नात्तृतीयभवनेयदिसोमसुतोभवेत् ॥ द्वौपुत्रौकन्यकास्तिस्रोजायंतेनात्रशंसयः ॥ ३८ ॥ घटशनिःसुतगः सुतपंचकीमृगशनिश्चसुतत्रयदस्तथा ॥ ३९ ॥ यदिकुजः शनिवत्रिसुतप्रदोयदिकुजः शनिवत्तनयाप्रदः ॥ ४० ॥ कविविधूजनुर्षीज्यनिरीक्षितावुदितवत्सुतपंचकदौयदि ॥ उपखगौक्रियकर्कवृषोपगौबहुविलंबकरौपरगौनचेत् ॥ ४१ ॥ सुतस्वामीशुभःपापोयद्गेहमनुवर्त्तते ॥ तद्गेहंत्रिगुणंकार्य्यंदशाभिर्भागमाहरेत् ॥ शेषांकतःसुतानांचसंख्यास्याद्विनितात्मजः ॥ ४२ ॥ सुरगुरुर्भवभे ११ नवमेचविद्यादितदाष्ट ८ सुतोबहुजीवितः ॥ त्रिरिपुकर्मकुजेमदनेगुरौनवमगेभृगुजेसुतपंचकी ॥ ४३ ॥ सुतविधुस्सुतगौचकवीज्यकौनिगमवित्सुतकल्पितवैभवः ॥ ४४ ॥ यदिचतुष्टययुग्मगताःशुभारिपुगता रविभौमशनैश्चराः ॥ सुतचतुर्दशकस्यपिताभवेत्सपुरुषोरमणीत्रितयोभजेत् ॥ ४५ ॥ यदितनोस्त्रितयेविधुनंदनोद्विसुतदश्चसुतात्रितयप्रदः ॥ यदिगुरुःसुतपंचकदोभृगुः त्रिसुतदश्चसुताद्वयदस्तथा ॥ ४६ ॥ अथपंचमाधिपवशेनग्रहाणांपुत्रपुत्रीसंख्यांचाह ॥पुत्रैकंदिननाथपंचमपतिः सद्वीर्य्यदृष्टिर्भवेत् पुत्राःपंचवदंतिदेवगुरुणाभौमस्तृतीयंक्रमा-

त् ॥ सौरेसप्तसुता भृगौषट्सुतावेदज्ञचंद्रेद्वयं तद्वच्चैवनवांशकं सुतगृहेसंशोधयेल्लग्नतः ॥ ४७ ॥ सुतभवनसुरेज्योःपूर्णचंद्रेण दृष्टः सुगृहगतनवांशेपंचमेयुक्तदृष्टे ॥ कथयतिसुतपंचभूमिपुत्रस्त्र-यंवादिनकरसुतसंस्थेपुत्रमेकंविदध्यात् ॥ ४८ ॥ सौम्यःसुताष्ट-चिददातिधीस्थोह्यस्तंगतस्तद्विफलंकरोति ॥ सुरेज्यवीर्येसुतरा-शिसंस्थेकन्यासुतेद्वेकथितेमुनीन्द्रैः ॥ ४९ ॥ इतिसंतानयोगाः अथसंतानयोगाः ॥१ ॥ अथपूर्वपुत्रपुत्रीविचारमाह ॥ तनु १ धन २ त्रिषु ३ पंचमपेक्षितस्तनुपतिःप्रथमंसुतजन्मदः ॥ सुक्त-तपंचमलाभवधूगतस्तनुपतिःप्रथमंतनयाप्रदः ॥ ५० ॥ लग्नात्पं-चमसप्तमेदिनपतिः सौरान्वितेवीर्यवानादौपुत्रमिदंचशौनकमतं पश्चाद्भवेत्कन्यका॥ चंद्राद्द्वादशमान १० पंचमरविश्चंद्रेणवीर्यान्वि-तेतत्कन्याप्रथमंनजीवतिकथंपुत्रोनजीवेत्कदा ॥ ५२ ॥ अथवधू-खचरःप्रबलःसुते ५ स्मरगृहेरमणीजनिदःपुरा ॥ नरसुतेनरनाथ-कवीक्षितेप्रथममेवसुतस्यजनुर्भवेत् ॥ ५३ ॥ सुतगृहेशुभदृष्टि-युतेर्बलाद्भवतिसंततिरत्रनचान्यथा ॥ सुतगृहोनिजनाथनिरीक्षितः सशुभदृष्टयुतःसदपत्यदः ॥ ५४ ॥ द्वितनुगाविधुभौमसिताःपुरा ददतिसंततिमेवयदात्विमे ॥ धनुगतानकदाप्यथपंचमेक्षकनृदार-खगैःप्रमिताःक्रमात् ॥ ५५ ॥ द्विदेहसंस्थाभृगुभौमचंद्राःसंतानमा-द्यौ जनयंतिनूनम् ॥ एतेपुनर्धन्विगतानकुर्युःपश्चात्तथांतेगदितंमहद्भिः ॥ ५६ ॥ सुतसुताःस्युरिहैवसतांदृशोद्विगुणदास्त्वसुतापरथा-फलाः ॥ उभयथायदिमिश्रफलप्रदायदिसुतेगुरुभं ९।१२ सुतसौख्यहृत् ॥ ५७ ॥ अथकस्यामवस्थायांपुत्रप्राप्ति-

स्तदाह बादरायणसंहितायाम् ॥ पुत्रंलभतेबाल्येलग्नेसंस्थ शुभश्चपश्येद्वा ॥ दशमेशुभस्तुकुर्यात् यौवनकालेनृणांपुत्रम् । ॥ ५८ ॥ जायायांयौवनांते पुत्रं कुर्याच्छुभस्तुपश्येद्वा॥यदिसू शुभखेटोवार्धक्येपुत्रसंभवं कुरुते ॥ ५९ ॥ अथबहुकालांत पुत्रप्राप्तियोगानाह ॥सारावल्याम् ॥ भौमेविलग्नजातेचाष्टमरा शिस्थितेदिनेशसुते ॥ सूर्येवाथसुतर्क्षे पुत्रःकालांतरेभवति॥६० बहुग्रहसहितेलग्नेलाभसंस्थेनिशाधिपे ॥ पूर्णेगुरुसितसंस्थैःपापै पुत्रःकालांतरे भवति ॥ ६१ ॥ लग्नेदिनकृत्तनये अष्टमसंस्थेगु चयदि ॥ भौमेपंचमराशौपुत्रंकालांतरेविंद्यात् ॥ ६२ ॥ अ पुत्रप्राप्तेरन्यावधिराह ॥ यवनः ॥सुतलग्नेशदारेशलग्नेशानांय तदा॥संगमस्तुतदापुत्रलाभःस्याद्यवनोदितम् ॥६३॥ लग्नपुत्रक त्रेशयोगेयदिदशाभवेत् ॥ सुतयुक्तर्क्षकेशेन पुत्रसिद्धिस्तदाभवे ॥ ६४ ॥ सुतपतिगुर्वोरथवातद्युतराश्यंशपानांवा ॥ बलस तस्यदशायाः परिपाकेवाभवेत्सुतप्राप्तिः ॥ ६५ ॥ अन्यच्चत धनइत्यवधिः॥अथपंचमस्थराशिवशात्पूर्वंपुत्रपुत्रीयोगान ह बादरायणसंहितायाम् ॥ वृश्चिकझषकर्कटका येषामप भावमापन्नाः॥ बहुलापत्याज्ञेयाकन्यापूर्वप्रजाश्चापि ॥६६॥ न्यावृषोमृगोवायेषांसुतभावगोनृणांकुर्युः ॥ कन्यानामुत्पत्तिं हदृष्टायुतानृणांकुर्युः ॥६७॥ घटभून्मिथुनंप्रसवेसुतभावेयस्ययो मुपजातम् ॥ जनयतितस्यचबहुलान्पुत्रान्स्वल्पायुषोनीचान् ॥ ६८ ॥ यस्यतुलाधरराशिस्तनयस्थानेकथंचिदुद्गच्छेत् एकः श्रेष्ठःपुत्रोयद्यपिशुभगःप्रसूयतेनूनम् ॥६९॥ अथस्वल्प

पत्ययोगानाह ॥ धनस्थानंयदाक्रूरंक्रूरग्रहनिरीक्षितम् ॥ नप-
श्यतिनिजंक्षेत्रंतदाल्पप्रसवोभवेत् ॥ ७० ॥ भार्याधिपेसुतस्थे
भार्यानाशोथवाल्पपुत्रोवा॥पापखगेवक्तव्यंसौम्येखेटेतुविपरीतम्।
॥ ७१ ॥ भौमेशशिवेश्मस्थेद्वितीयपाणिग्रहेसुतंविंद्यात् ॥ तत्र-
स्थेपिशशांके स्वल्पापत्योबहुस्त्रीकः॥ ७२॥ इंदोर्वेश्मनिजीवेपुत्रस्थे
दारिकाबहुलंस्यात्॥ सौम्येचाल्पसुतत्वंशुक्रेबहुपुत्रभाक्तृतीयभा-
र्यायाम्॥ ७३॥ अथबहुकन्याप्रसवयोगानाह॥ सारावल्याम्॥
सितशशिवर्गेधीस्थेताभ्यांदृष्टेथवायुक्ते ॥ प्रायेणकन्यकास्यात्सम-
राशिगणेपितत्तथावाच्यम् ॥ ७४ ॥ चंद्रेसुतसंजातेरविगेहेदारि-
काबहुलंस्यात् ॥ कन्यायांहिमरश्मौतथैववाच्यंतुह्विबुकेवा ॥
॥ ७५ ॥ एकादशेयदाक्रूरःपंचमेशुक्रशीतगू ॥ प्रथमंकन्यका-
जन्ममातातस्यसकष्टका ॥७६॥ अथसंतानावरोधयोगानाह॥
सारावल्याम्॥ पापैर्बलिभिर्युक्तेपापर्क्षेपंचमेयदाराशौ ॥जातः पु-
रुषोऽपुत्रःसौम्यग्रहदर्शनातीते ॥ ७७ ॥ सुतपतिरस्तगतोवापाप-
युतःपापनिरीक्षितोवापि ॥ संततिबाधांकुरुतेकेंद्रेकोणेद्विलाभगेचं-
द्रे ॥७८॥ धनजनसुतहीनः पंचमस्थैश्चपापैर्भवतिहिकृतएवक्ष्मा-
सुतेतत्रजाते ॥ दिवसकरसुतेस्याद्व्याधिभिस्तप्तदेहःसुरगुरुबुधशुक्रैः
सौख्यसंपद्धनाढ्यः ॥७९॥ ऋतुस्तुशुक्रोविज्ञेयः रेतोभौमःप्रकीर्ति-
तः॥ ऋतुंरेतोनपश्येतरेतसंनऋतुस्तथा ॥ अप्रसूतोभवेज्जातःपरिणी-
तीबहुस्त्रियः।८०।ऋतुरेतससंपर्काज्जायतेविषमांगके॥क्रूरसंपुटमा-
दायवंध्याभवतिनिश्चितम् ॥ ८१ ॥ अस्तंगतेपंचमेशेपापाक्रांते
त्वदुर्बले॥नापत्यंजायतेदैवाज्जातोपिम्रियतेशिशुः॥८२॥ यवनः॥

सूर्यार्किभौमैकतमाश्रितेनतद्वीक्षितेतद्गृहभावयोगे ॥ एषांगृहस्थेचकुजेऽल्पवीर्येसमुद्भवः कीर्तितमप्रजानाम् ॥ ८३ ॥ सौम्यदृष्टिविहीनेचपापैर्बलिभिरन्विते॥पापभेपंचमेतत्रह्यनपत्योभवेन्नरः॥ ॥ ८४ ॥ सुतारिरिःफगः पापःसंतानाधिपतिर्यदि ॥ पुत्राऽभावोभवेत्तस्ययदिजीवोनपश्यति ॥ ८५ ॥ ओजेसमर्क्षेऋतुरेतसंस्थेसौर्य्यर्कदृष्टेसुतवर्जितः स्यात्॥ ज्ञेज्येक्षितेचैवसकृत्सुतंचप्राप्नोतिवृद्धत्ववयस्थजातः ॥ ८६ ॥ ऋतुश्चकथितोभौमोरेतःशुक्रःप्रकीर्तितः ॥ यद्वर्षेपश्यतश्चोभौतद्वर्षेगर्भसंभवः ॥ ८७ ॥ लग्नेशशिनिविनष्टे सूर्यप्राप्तेगुरौशशिक्षेत्रे॥पापैस्त्रिकोणसंस्थैःपुत्रसुखात्पूर्वमेवनिधनंस्यात्॥८६॥ पापर्क्षेपंचमेराशौपापैर्बलिभिरन्विते॥सौम्यग्रहैरसंदृष्टेपुत्राभावोभवेन्नृणाम् ॥ ८९ ॥ रिपुदृष्टोरिपुक्षेत्रेनीचेवापंचमेस्थितः॥ भूमिजःपुत्रशोकार्तंकरोतिनियतंनरम्॥९०॥इत्यादिबहवोयोगाःस्युः॥अथात्रदंपत्योर्मध्येकस्यपापेनावरोधस्तद्विचारोजातकरत्ने॥अपत्यसंभवंदुःखंयथापुंसस्तथास्त्रियाः॥ पूर्वजन्मकृतंकर्मद्वयोरेवततोभवेत् ॥ ९१ ॥ अथापत्यसंभवंदुःखंपंचधातदाह । वियोगान्मरणात् क्लैव्यात्तथाचाप्रसवादपि । देशांतरेचगमनात्पुत्रदुःखंहिपंचधा ॥ ९२ ॥ अथदंपत्योःपूर्वकर्मविचारणेविधिः ॥ विलिख्यनामदंपत्योःसप्तसप्तसमन्वितम्। त्रिभिश्चैवहरेद्भागंशेषांकेनविचारयेत् ॥ ९३ ॥ एकेनपुरुषोदोषोद्वाभ्यांनारीप्रकीर्त्तिता ॥ शून्येस्त्रीपुंसयोःकर्ममिलितंहिनिगद्यते ॥ ९४ ॥ अन्यच्च ॥ लग्नधीस्थानतःपुंसोयूनधीस्थानतःस्त्रियाः॥क्रूरग्रहसमायोगादेवंदोषोविचार्य्यते ॥९५॥ अथग्रहभावदृ

ष्टिवशात्फलतारतम्यमाह॥एकपादंद्विपादंचत्रिपादंसकलंचवा विचार्य्यंदृष्टिंचादृष्टिंवक्तव्यंग्रहभावतः ॥ ९६ ॥ अथवंध्यायोगानाहवैष्णवतंत्रे ॥ स्वर्क्षस्थितौरंध्रगतौयमार्कौंप्रष्टुःस्त्रियंसंदिशतश्चवंध्याम् ॥ छिद्रस्थितौचंद्रबुधौसदोषांवाकाकवंध्यांददतोंगनांवै ॥ ९७ ॥ मृतप्रजांछिद्रगयोःसितेज्ययोःगर्भस्रवांभूमिसुतोष्टमस्थः ॥ छिद्रेश्वरेछिद्रगतेबलान्वितेपुष्पंनविंदत्यबलासुगर्भदम् ॥९८॥ अन्यच्च ॥ जातकदीपे॥ नोसूर्य्येतनुगेऽर्कजेद्युनगते वामंदसूर्य्यौद्युने कर्मेंदुनगुरुःप्रपश्यतियदानोगर्भिणीजायते ॥ दृश्येऽर्द्धेरविसूर्य्यजौद्विषिविधौद्यूनेचचोग्रेस्थितोनोसूतेऽथरिपौ शनिक्षितिसूतौतोयर्क्षगौनोद्भवः ॥ ९९ ॥ सुतस्थानेत्रिपापेषुत्रिपापैर्यदिवीक्षिते ॥ उभौस्त्रीपुरुषौवंध्यौविज्ञेयौशत्रुवीक्षितौ ॥१००॥ अथमृतवत्सायोगानाह ॥ वाचस्पतिर्दिनकरःक्षितिनंदनोवानीचोविरश्मिरिपुराशिगतःसुतस्थः ॥ जातंसुतंझटितिनाशमुपैतिनूनंमंद्राद्यदंतिमुनिगर्गपराशराद्याः ॥ १०१ ॥ पंचमराशौपापेजातंजातंविनाशयेत्पुत्रम् ॥ सप्तमराशौपापोद्विभार्य्येबादरायणेनोक्ते ॥ ॥ १०२ ॥ भौमेनराहुणावापियुक्तःस्यात्पंचमेश्वरः ॥ राहुभौमांतरस्थोवापुत्रनाशकरोभवेत् ॥ १०३ ॥ नीचस्थेशत्रुगेहेरविकिरणयुतेनिर्जितेपापयुक्ते सौम्येदृष्टिविवर्ज्जितेसुतगृहेतत्पेतथैवस्थिते॥ शुक्रेभौमेपियुक्तेविषमगृहयुतेचंद्रदृष्ट्याविहीने एवंयोगद्वयेनुःसुतमरणकरंतस्यभार्यापिवंध्या ॥ १०४ ॥ नीचांशांशोपगतेजिंतेस्यात्काव्येकुजेजन्ममृतप्रजानाम् ॥ शुक्रेंदुभस्थेचसुतप्रजात्रांशेषांशकेशेषुमृतप्रजानाम् ॥ १०५ ॥ पापःपंचमसंस्थःपुत्र

विनाशंकरोतिबलहीनः ॥ सौम्यःशुभंविधत्तेबलसहितश्चाष्टमाधि-
पंहित्वा ॥ १०६ ॥ पंचमेनवमस्थानेचतुर्थेचयदाग्रहाः ॥ औ
जाताविनश्यंतिपश्चाज्जीवंतिवैसुताः ॥ १०७ ॥ जीवेमकरं
तेपंचमभेआत्मजंमृतिंदद्यात् ॥ मीनस्थितेपिचैवंनवमेशुभसंस्थिते
ऽल्पजीवीच ॥ १०९ ॥ जीवस्थितस्यराशेःपंचमभेपापसंयुक्ते ।
पुत्रविनाशंविंद्यात् सौम्यक्षेत्रंतुशुभदंस्यात् ॥ ११० ॥ राहौपं
चमभवनेविसुतःपुण्येनपरिहीनः ॥ भौमयुतेसुतमरणंदृष्टेस्त्रीराशिं
भवेत्स्त्रीकः ॥ १११ ॥ पुत्रभावेकुजक्षेत्रेजातंजातंविनाशयेत् ।
गुरुशुक्रयुतश्चापिनचसर्वग्रहेक्षितम् ॥ ११२ ॥ अथास्यके
कारणेनसंततिमरणंतदाह ॥ जातकरत्ने ॥ पुत्रस्थानादष्टमस्थे
सूर्येपीडाज्वराद्भवेत् ॥ चंद्रेचजलशीताभ्यांशस्त्रेणक्षितिनंदने
॥ ११३॥ बुधेचशीतलादोषाद्गुरौचविषसर्पतः ॥ पश्वादिभिर्दैत्य
पूज्येशनौबालग्रहैर्मृतिः॥ ११४ ॥ राहौवृक्षादिभिःकेतौविकारैः
डनंभवेत् ॥ ११५ ॥ अथबालानांकस्यामवस्थायांमरणं
दाहजातकरत्ने ॥ प्रसवांतेमृतिः सूर्य्येषण्मासात्परतोष्टमे ॥ चं
पौगंडकेनष्टः कुजेसद्योमृतःशिशुः॥ ११६ ॥ विधौविवाहतोनष्टः
शोरेचबृहस्पतौ ॥ यौवनेदैत्यपूज्येचमध्यभागात्परेशनौ॥ ११७
राहौगर्भेमृतोबालः केतौशस्त्रैः प्रपीडितः॥ बलाबलंग्रहाणांचवि
य्यैवंनिगद्यते ॥ ११८॥ अथसंतानावरोधवतः पुंसऔरसा
दशपुत्राणांमध्येकेनसुखंभविष्यति तदाहसारावल्याम् ॥
र्वर्केवर्गेपुत्रर्क्षेशुभर्क्षेवाशुभस्थिते ॥ लग्नाधिपेवासबलेनृणांपुत्रा
औरसाः ॥ ११९॥ एकतमेगुरुवर्गेसुतराशावौरसोभवेत्पुत्रः ॥

ग्नाचंद्रादथवाबलयोगाद्वीक्षितेपिवासौम्यैः ॥ १२० ॥ सौरर्क्षेसौरगणेबुधदृष्टेगुरुकुजांऽर्कदृग्घीने ॥ क्षेत्रजपुत्रंजनयतिबौधेगणेप्रिरंविजयुग्दृष्टे ॥ १२१ ॥ मांदसुतर्क्षमिंदुनिरीक्षितेयदिशनैश्वरेण ॥ दत्तकपुत्रोत्पत्तिः क्रीतश्चबुधेनचैवस्यात् ॥ १२२ ॥ सप्तमभागे कौजेसौरयुतेपंचमेसदाभवने ॥ कृत्रिमपुत्रंविंद्यात् शेषग्रहदर्शनान्मुक्ते ॥ १२३ ॥ सर्वेपंचमराशौसौरेः सूर्य्येणवात्रसंयुक्ते ॥ लोहितदृष्टेवाच्यंजातस्यसुतोधनप्रसवः ॥ १२४ ॥ चंद्रेभौमांशगतेधीस्थेमंदाऽवलोकितेभवति ॥ गूढोत्पन्नःपुत्रःशेषग्रहदर्शनाऽयाते ॥ १२५ ॥ शनिवर्गस्थेचंद्रेशनियुक्तेपंचमेसदाभवने ॥ शुक्ररविभ्यांदृष्टेपुत्रः पौनर्भवोभवति ॥ १२६ ॥ तस्मिन्नेवचभवनेशशिवर्गस्थेनिरीक्षितेरविणा ॥ पुरुषस्यभवतिपुत्रःपरिविद्धश्चेतिमुनिवचनात् ॥ १२७ ॥ वर्गेरविचंद्रमसोः सुतगेहेचंद्रसूर्य्यसंयुक्ते ॥ शुक्रेणदृष्टमात्रेपुत्रः कथितःसहोढश्च ॥ १२८ ॥ सितबलिसुतभेसितवीक्षितेबहुलसंततिरेवमपींदुतः ॥ सुतपनंदलवोन्मितसंततिर्भवतिदास्युदराच्चधृतोदरात् ॥ १२९ ॥ अथगर्भक्षययोगानाह॥पंचमाधीश्वरस्यांशाः यावद्भिः पापखेचरैः॥ वीक्षितेतावंतागर्भाविलीयंतेशुभैःशुभाः ॥ १३० ॥ पंचमैकादशेभौमेशशिनात्रनिरीक्षिते॥गर्भपातभवंदुःखंमृतापत्यभयंभवेत् ॥ १३१॥ सुत्रेकलत्रेचभवंतिपापा महीसुतोमृत्युगतोयदिस्यात् ॥ गर्भस्रवंतंस्थभवेचपत्न्याः ग्रहप्रमाणंप्रवदंतिधीराः ॥ १३२ ॥ कर्कालिमीनांशगतेसुतेस्तेशुक्रेतनौसौरिसुतौ सुखंन ॥ तस्यापिपत्नींचवदंतिवंध्यांगर्भस्रवांपापखगैर्मदस्थैः ॥ १३३॥ अथैषामवरोधकर्तृ-

णांग्रहाणामुपायंबादरायणसंहितायांपूर्वरव्यादित्रयाणामु-
पायमाह।आदित्येव्रतवेदपाठकरणं जाप्यंतथात्र्यंबकंचाश्वत्थवट
वृक्षपूजनतथादानंचवेदोदितम् ॥सत्पुत्रंलभतेतथैवहरिवंशेनश्रुतेकें
स्थितेनष्टेंदौहरिवासरेबहुविधिंसंतर्पयेद्ब्राह्मणान् ।१३४।गावःश्वेत
हिरण्यवस्त्रसहितंमुक्ताफलैःसंयुतं पात्राणामखिलंचधान्यसहितंदे
द्विजेभ्यस्तदा ॥कृत्वावेदपुराणशास्त्रविधिनाभानुर्यदापंचमेनित्यंपा
र्थिवपूजनंव्रतकरंपुत्रर्क्षगेभूमिजे ॥ १३५ ॥ अथान्यत् ॥ हरि
वंशेनरविःशशीशिवव्रताद्भौमस्तुगौर्य्यर्चनात् सौम्यःसंपुटकांस्य
पात्रकनकैर्जीवस्तुपित्रर्चनात् ॥ शुक्रोगोःप्रतिपालनात्प्रकुलो
सौरिस्तुमृत्युजयात्कन्यादानमखात्तमस्तुकपिलादानाच्छिखीसंत
तिम् ॥ १३६ ॥ अथवंध्याद्यष्टधावंध्यानांपापनिवारणा
र्थमुपायाः॥ बलघातीचपुरुषोमृतवत्सःप्रजायते॥ ब्राह्मण्योद्वाह
नेतेनकर्तव्यंतस्यशुद्धये ॥ १३७ ॥ श्रवणंहरिवंशस्यकर्तव्यं
यथाविधि ॥ महारुद्रस्यजाप्यंवाकारयेच्चयथाविधि ॥१३८
एकादशस्वर्णनिष्काःप्रदातव्याश्चदक्षिणा ॥ पदान्येकादशतथाद
र्वायाश्चाहुतिंसृजेत् ॥ १३९ ॥ स्नापयेद्दंपतीवापिमंत्रैर्वारुणदैव
तैः ॥ एकादशषडंगैश्चरुद्रीसमभिधीयते ॥ १४० ॥ एकादशभि
रेताभिःप्रोक्तोरुद्रोमनीषिभिः ॥ रुद्रैकादशभिश्चापिमहारुद्रःप्रकी
र्तितः ॥ १४१ ॥ एकादशमहारुद्रैर्महारुद्रीनिगद्यते ॥ एकादश
भिरेताभिरतिरुद्रीनिगद्यते ॥ १४२ ॥ अत्यंतोग्रस्यपापस्यनाशः
सर्वस्यजायते ॥ शीतलैःसलिलैःशुद्धैर्वस्त्रपूतैःसचंदनैः ॥१४३
लक्षसंख्यैर्घटैर्भक्त्यास्नापयेच्चमहेश्वरम् ॥ लक्षपुष्पैरर्चयित्वाभू

द्दीपादिभिस्तथा ॥ १४४ ॥ करवीरार्कधत्तूरचंपकैर्मल्लिभिः सह ॥ नैवेद्यंविविधंदद्यात्पक्वान्नंविविधंतथा ॥ १४५ ॥ भोजयेच्चमुदायुक्तश्चतुर्दशधरासुरान् ॥ चतुर्दशीव्रतंकुर्यान्निर्जलंवास्त्रियासह ॥ १४६ ॥ उद्यापनंचरेत्पूर्वंपश्चाद्व्रतंसमाचरेत् ॥ एकंधर्मघटंदद्याद्ब्रह्मविष्णुशिवात्मकम् ॥ १४७ ॥ एवंवर्षव्रतंकुर्यात्सुत्रःपुत्रवान्भवेत् ॥ मृतपुत्रोपिचाप्नोति पुत्रंवैदीर्घजीविनम् ॥ ॥ १४८ ॥ सुशीलांविप्रकन्यांवायथाविधिविवाहयेत् ॥ स्वशक्त्याचद्वयंकुर्याद्वित्तंशाठ्यंनकारयेत् ॥ १४९ ॥ सूर्य्यवारेव्रतंकुर्यादथवाजलवर्जितम् । अष्टकादिपितृश्राद्धहीनोनिःशंकघातकः। १५०। प्राणिनामनिशंद्वेषीविप्राणांद्वेषकोपिवा ॥ भक्षकोमृगशावानांनरक्रांतेन्यजन्मनि ॥ १५१ ॥ मृतपुत्रः चर्मकीलव्याधियुक्तोभवेन्नरः॥ दुर्मनाश्चवैजायेततस्यैवंनिष्कृतिःपरा॥ १५२॥ कृच्छ्रचांद्रायणंकुर्याद्धोमंकुष्मांडसंज्ञकम् ॥ ग्रहणेचस्वर्णदानंभूमिदानंतथापरम् ॥ ॥ १५३ ॥ कन्यादानंचपंचम्यांश्राद्धंकुर्वीतयत्नतः ॥ सहस्रनामजापीचभवेदेवंविमुच्यते ॥ १५४ ॥ नानाग्रंथान्समालोक्यमदनेनसुधीमता॥ कृतोजनुःसंग्रहोयंविज्ञैःसंसेव्यतेसदा ॥ १५५॥ अन्यच्च ॥ ज्ञशुक्रदोषेशिवपूजनात्सुतःशशीज्ययोरौषधयन्त्रमन्त्रतः।अग्नेःसुतांगांशिखिनश्चयच्छतोयमारयोःस्याद्गिरिशाभिषेचनात् ॥ । १५६। रवेस्तुदोषेहरिवंशसंश्रवात्सोमेतुसन्तानमुकुंदवन्दनात्॥ सुतोद्भवःस्यात्क्षितिजार्कयोर्व्रतेकृतेविधानान्मदनव्रतेध्रुवम् १५७। इतिदुष्टग्रहाणामुपायाः ॥ अथसुतभावेमेषादिराशिफलम्॥ मेषेसुतस्थेलभतेमनुष्यःप्रायेणपुत्रान्विधनांस्तथाच॥ क्रूरान्सुखेना-

विकृतानपत्यान्मोहानुरक्तान्कुचरित्रयुक्तान् ॥ १५८ ॥ सुतस्थेजननेमनुष्यः प्राप्नोत्यपत्यानिमनोहराणि ॥ सुशीलयुक्तानिगुणाधिकानिप्रभासमेतानिबलाधिकानि ॥ १५९ ॥ कर्केसुतक्षेजनयेन्मनुष्यः पुत्रान्प्रसिद्धासुतलालसांश्च ॥ विस्तीर्णकीर्तीमहानुभावान्धनेनयुक्तान्विनयेनयुक्तान् ॥ १६० ॥ सिंहेसुतस्थेजनयेन्मनुष्यः क्रूरस्वभावांस्तपयेनकांतान् ॥ मांसप्रियान्स्वजनान्सुतीव्रान्विदेशभाजान्क्षुधयासमेतान् ॥ १६१ कन्यायदापंचमगातदास्युःकन्यानराणांस्वजनैर्विहीना ॥ पतिप्रियापत्यपराप्रगल्भाप्रशांतकादिर्गुणभूषणाश्च ॥ १६२ ॥ तुलेयदापंचमगोनराणांतदासुशीलानिमनोहराणि ॥ भवंत्यपत्यानिसुरूपकांतिक्रियासमेतानिसुखोक्षितानि ॥ १६३ ॥ कीटेसुतस्थेजनयेद्वियोनौपुत्रान्मनुष्यःसुभगान्सुशीलान् ॥ आढ्यानदोषान्गुणयेनयुक्तान्सदानुरक्तान्निजगोत्रधर्मैः ॥ १६४ ॥ चापेसुतस्थेजनयेन्मनुष्यःसुतान्विचित्राह्वयमार्गयुक्तान् ॥ धानुष्कचापार्जितशत्रुपक्षान् सेवाप्रियान्पार्थिवमानयुक्तान् ॥ १६५ ॥ मृगेसुतस्थेजनयेन्मनुष्यःपुत्रान्मृगेपापमतीन्कुरूपान् ॥ युक्तान्कुकर्मणोलोमधर्मान्क्लीबस्वभावानगभीरचेष्टान् ॥ १६६ ॥ कुंभेसुतस्थिरतासमेतान्गंभीरचेष्टानतिशक्तियुक्तान् ॥ पुत्रान्मनुष्योयेत्प्रसिद्धान्नष्टात्मजान्कष्टमहाप्रसूतान् ॥ १६७ ॥ मीनेसुतस्थेललनानुरक्तान्पुत्रान्मनुष्योलभतेऽल्पवीर्य्यान् ॥ रोगान्वितान्पापरतान्सुरूपान्सहास्यतांस्त्रीवशगान्सदैव ॥ १६८

अथसुतेशस्यभावफलम् ॥ लग्नगतःपंचमपःप्रसिद्धमस्तोक

यपोरिकलितम्॥शास्त्रविदंगीतविदंसुकर्मनिरतंनरंकुरुते ॥१६८॥ पंचमपतिर्धनस्थःक्रूरःखचरोधनोज्झितंकुरुते ॥ गीतादिकाव्यकलितंकष्टभुजंस्थानप्रचुरंच ॥ १६९ ॥ तनयपतिःसहजगतः समधुरवाचंसुबंधुजनविदितम्॥कुरुतेसुतांस्तदीयांस्तनयापालयतितद्वंधून् ॥ १७० ॥ पातालेपंचमपः गुरुभक्तिरतंपितृकर्मनिरतंच॥ गुरुषंजननीभक्तंकुरुतेक्रूरस्तुविपरीतम्॥१७१॥तनयगतस्तनयपतिर्मतिमंतंमानिनंवचनकुशलम् ॥ सुतकलितंप्रचुरधनंख्यातियुतंमानवंकुरुते ॥ १७२ ॥ पंचमपतिस्तुषष्ठेशत्रुप्रियमात्मजैर्हीनम्॥रोगयुतंधनरहितंक्रूरःखचरःकरोतिक्रूरतरम् ॥ १७३ ॥ तनयपतौसप्तमगेसुप्रसूताशुभगाथदैवरता ॥ गुरुभक्ताप्रियवचनासच्छीलातस्यजायतेदयिता ॥ १७४ ॥ सुतपेनिधनगृहस्थेकुत्सितवाङ्गिरालयोमंदः॥ नष्टाव्यंगाःसहजास्तनयाअपिसंभवंतितथा ॥ ॥ १७५ ॥ सुकृतस्थस्तनयपतिःसुबोधविद्याढ्यगीतरतम् ॥ नृपपूजितंस्वरूपंनाटकरसिकंनरंकुरुते ॥ १७६ ॥ तनयपतिर्नृपगृहगोनृपकर्माणंनृपाकलितम् ॥ सत्कर्मरतंप्रवरंजननीकृतसुखाशनंकुरुते ॥ १७७ ॥ सुतनाथेलाभगतेशूरःसुतवान्सुकृत्यकृद्रोगी॥ गीतादिकलासुकलितोनृपलाभीजायतेमनुजः॥१७८॥ पंचमगेद्वादशगेक्रूरेसुतरहितःशुभेससुतः॥सुतसंतापक्रमोविदेशगमनोद्यतोमनुजः ॥ १७९ ॥ इतिपंचमभावः ॥५॥ अथ रिपुभावः ॥ तत्ररिपुभावेकिंचित्यमित्युक्तंजातकाभरणे ॥ वैरिप्रीतिक्रूरकर्मामयानांचिंताशंकामातुलानांविचारः ॥ होरापारावारपारप्रयातैरेतत्सर्वंशत्रुभावेविचिंत्यम् ॥ १ ॥ अत्रचंद्रसौ-

ऱ्यषष्ठस्वामीलग्नेशावस्थितिः शत्रुवृद्धिरोगकुबुद्धिहेतुः चात्रक्रूर रिपुघ्नाः ॥ इतिज्ञेयम् ॥ अथारिभावेग्रहस्थितिफलम् ॥ षष्ठेभावेस्थितेभानावतिकामोदरानलः ॥ बलीख्यातगुणोभूपोदंड नेताथवाभवेत् ॥ २ ॥ लग्नात्षष्ठस्थितेचंद्रेमृदुकायःस्मरानलः। अनेकारिर्भवेत्तीक्ष्णोरिष्टंस्यान्मृत्युरेवच ॥ ३ ॥ बहुदाराग्निपुंस्क स्यात्सुकार्य्योबलवान्कुजे॥ स्वबंधुविजयीजातःप्रधानश्चरिपुस्थि ॥ ४ ॥ विवादीकलहीव्याधियुतोनिष्ठुरवाग्भवेत् ॥ नरपालस् शत्रुःस्याल्लग्नात्षष्ठस्थितेबुधे ॥ ५ ॥ स्वल्पोदराग्निपुंस्कःस्यात् स्त्रीजितोरिपुहागुरौ ॥ लग्नात्षष्ठस्थितेजातोदुर्बलोऽलससंयुतः। ॥ ६ ॥ भीरुर्भूरिरिपुःस्त्रीणामनिष्टोविभवेप्सितः ॥ विक्लवश्चभवे ल्लग्नाद्भार्गवेरिपुराशिगे ॥ ७ ॥ विद्वेषीपक्षक्षपितःशूरोविषमचेष्टि तः ॥ बह्वाशीबहुकाव्यश्चारिदाहोरिपुगेशनौ ॥ ८ ॥ शूरःशुभ प्राज्ञोनृपतुल्योजायतेमनुजः ॥ रिपुभवनस्थोराहुर्जनमान्योऽति विख्यातः ॥ ९ ॥ अन्यच्च ॥ रिपुंकुर्य्यात्कुजःषष्ठेविलग्नाद्रवि वीक्षितः ॥ सौम्ययुक्तेक्षितेभौमेनात्यंतमरिजंभयम् ॥ १० ॥ पं पापाक्रांतेशत्रुभयंभवतिनियमेन ॥ सौम्याक्रांतेसौम्येक्षितेक्षिति तनयेभवतिशत्रुमित्रत्वम् ॥ ११ ॥ यथाहयवनः ॥ षष्ठाश्रिते र्केविषशत्रुदाहःक्षुद्रोपशत्रुव्यसनोपनाशम् ॥ काष्ठाश्मघाताद्वि कीर्णदेहःश्रुतौष्ठवाग्दंतनखक्षतांगम् ॥ १२ ॥ जलोदरेणामयजै कारैश्चंद्रेम्बुजैर्वाकफतप्तदेहः ॥ शरावशोचक्षयरोगकृत्स्यादत्रैव र्य्येणविमिश्रमूर्तिः ॥ १३ ॥ मीनांशकेमेषगृहांशकेवाचंद्रःस्थि तोत्रैवहिपापदृष्टः ॥ किलासकुष्ठादिविनष्टदेहमिष्टेक्षितेकंडुविका

णंच ॥ १४ ॥ षष्ठेश्वरेवृश्चिककर्कटांशेकुजेक्षितेगुप्तरुगार्द्दितांगः ॥ सौरेक्षितेमारुतश्रोणितार्थाद्रूहद्रोगिणंसूर्यग्रहांशकस्थः ॥ १५ ॥ शस्त्रप्रहाराग्निरुगग्निदाहप्रतप्तमिंदुक्षितिसूनुयुक्तः ॥ सौरेतुषष्ठेशविमिश्रमूर्तिर्निहंतिवाताश्मचतुष्पदाद्यैः ॥ १६ ॥ कुजोह्यसृक्शस्त्रपरिक्षतांगंदेशाटनेवानृपदर्शनेच ॥ सारंशिरोऽश्मावनिवातपातवृक्षुज्यपातोपहतंचकुर्य्यात् ॥ १७ ॥ बुधेक्षितः प्रस्खलितः प्रपातलोष्टाहतांगंजितविद्विषंच ॥ ख्यातंरिपुद्वेषभवप्रसक्तमस्वस्थदेहं भृगुसूनुजीवौ ॥ १८ ॥ त्रिकोणकेंद्रोपगतैस्तुसौम्यैः पापा यथोक्तंविनिवर्तयंति ॥ पापेक्षितास्तेतुशुभांशसंस्थाःकुर्वंतिमृत्युंविकलांगकंवा ॥ १९ ॥ क्षेत्रेगृहेंशतुल्यासंख्यातेषांविनिर्दिशेत्प्राज्ञः॥ भावाध्यायेविहिताद्विस्ताराच्चिंतयेच्छेषम् ॥ २० ॥ गर्गमतेन॥ रिपुंहंतिसहास्रांशुः शत्रुः सोपचयेयदि ॥ शत्रुभिर्दृष्टयुक्तोवाबहून् शत्रून्प्रयच्छति ॥ २१ ॥ निधनंकुरुतेचंद्रः पापर्क्षेपापसंयुते ॥ पूर्णः षष्ठेरिघातीचगुरुगेहंगतोयथा ॥ २२ ॥ षष्ठेनीचारिभवनेसंन्यासंकारयेद्बुधः ॥ वर्द्धयेत्त्वन्यथाशत्रुंपुंसांधरणिनंदनः ॥ २३ ॥ रिपून् विजयतेसौम्यः सौम्यैर्दृष्टोथवायुत ॥ नीचःमाप्तश्ववक्रश्चषष्ठर्क्षेरिपुरिष्टकृत् ॥ २४ ॥ स्वगेहेशुभगेहेवाषष्ठेगुरुरमित्रहा ॥ शत्रुगेहेऽरिणादृष्टेशत्रुपीडांददातिसः ॥ २५ ॥ नीचास्तगामीरिपुमंदिरस्थः करोतिवैरंकलहागमंच ॥ अन्यत्रशुक्रोरिपुदर्पहारीस्वर्क्षेतुषष्ठेतुसदातिसिद्धिः ॥ २६ ॥ षष्ठेनीचगतेसौरिर्जनयेन्नीचवैरिणाम् ॥ अन्यथावैरिणंहंतिनिर्वैरंस्वगृहेगतः ॥ १७ ॥ राहुः शत्रुग्रहेकुर्य्याच्छत्रुसंग्राममूर्द्धनि ॥ हंतिसर्वान्यरिष्टानिसर्वग्रहनि-

रीक्षितः ॥ २८ ॥ सौम्यैः वित्तपसंयुक्तेषष्ठेद्विशुभवीक्षिते ॥ कि-
योनामयोगोऽयमाहवेवाहनायुधैः ॥ २९ ॥ षष्ठेक्रूरा नरंकुर्यु
शत्रुपक्षक्षयंकरम् ॥ सौम्याः षष्ठेमहारोगंषष्ठेचंद्रस्त्वरिष्टदः ॥ ३० ॥
अन्यच्च ॥ चंद्रोवाभार्गवोवापियदाजीवबुधौतथा ॥ सबलौशत्रु-
स्यातांतदास्याद्गोधनंबहु ॥ ३१ ॥ बहवोवृषभास्तस्यसंभवं-
गृहेसदा ॥ मार्तंडोमंगलोवापियदितत्रभवेत्किल ॥ ३२ ॥ तदा
जगवकंस्वंस्याद्गौरवंपशुवंधनम् ॥ तत्सर्वंभवितागेहेउष्ट्राणांचगणै-
र्युतम् ॥ ३३ ॥ बलिष्ठेचेतथाराहौशनौकेतौतथैवच ॥ महिषाण
धनंतस्यबहुलंजायतेगृहे ॥ ३४ ॥ सैंहिकेयः शनिश्चैवमातुले
वनेस्थितौ ॥ प्रजाहीनोमातुलः स्यात्कन्यापत्योऽथवातदा ॥ ३५ ॥
गुरुर्भृगुःशशांकोवारिपुगेहेयदाभवेत् ॥ तदाभ्रातृस्वसॄणांचमातु-
लानांमहासुखम् ॥ ३६ ॥ चंद्रशुक्रबुधैर्वाच्यंकन्यापत्योथमातुलः ।
जीवेनपुत्रसंयुक्तः सुखीचसधनः सदा ॥ ३७ ॥ यस्यजीवोभवेत्षष्ठे
वनेतेजसायुतः ॥ शुभंतस्यप्रवक्तव्यंजातस्यपृच्छकस्यवा ॥ ३८ ॥ सौम्य-
योगेक्रूरदृष्टौनसुखंमातुलस्यच ॥ तस्यवंशोद्भवःकोपिगतोदेशांतरंपु-
॥ ३९ ॥ भ्रातृधर्मारिषुक्रूरैःस्वल्पंभ्रातृसुखंभवेत् ॥ ४० ॥ राहुयु-
धरापुत्रेबुधयुक्तावलोकिते ॥ मातृष्वसामृतापत्यारंडादेशांतरंगता ।
॥ ४१ ॥ उदयभास्करात् । यदिरिपौपतिसौम्ययुतेक्षितेति
रुजोभवतिपरथानचेत् ॥ सखलुवैरिपतिस्तनुमृत्युगोव्रणकृदेव-
स्वजनेष्वपि ॥ ४२ ॥ यदिकुजार्कसुतौरिपुगौतदास्वगददोर्भि
तुंगगतौरिपौ ॥ नरतनौरिपुतोपिचगूढरुग्यादिखलाढ्यविधुर्वपु
भरुक् ॥ ४३ ॥ शिरसिभानुरनुष्णगुराननेधरणिजश्चगलेहृदयेबुध-

सुरगुरौचकटौभृगुरक्षिगोथइनजश्वरणाधरपोस्ततः ॥ ४४ ॥ तनुपतिर्यदिभौमबुधर्क्षगःकुजबुधेक्षितकोक्षिविनाशनः ॥ अरिपतिस्तनुगोरिहरोधनेसुतगृहीतधनःकुमतोऽनुजे ॥ ४५ ॥ नगरदुःखनिधिर्दृढनाभिरुग्यदिलयांगपतीरिपुसंस्थितौ ॥ भवतिदक्षिणनेत्ररुजायदाशनिकवीपदरुग्यदिदानवः ॥ ४६ ॥ अधरदंतरुजाथशिखीरिपौतनुपतिर्यदिवाशुभवीक्षितः ॥ कुजबुधर्क्षगतोपिचकुत्रचित्किलतदासनकार्धरुजान्वितः ॥ ४७ ॥ अथषष्ठस्थितानांखगानामवधिवर्षाण्याह हिल्लाजः ॥ सूर्य्यस्त्रिनेत्र २३ शरदिस्वमरौहिमांशुर्मृत्युंकुजो २४ जिनमितेप्रददातिपुत्रम् ॥ सप्तत्रिके ३७ विदरिभंमृतिमीज्यकोखाब्धौ ४० शत्रुभिःसितइलायन २१ शस्त्रमृत्युम् ॥ ४८ ॥ यवनः ॥ दशाधिपस्तीक्ष्णकरःप्रदिष्टःसहस्रनाथोरजनीकरश्च ॥ वक्रार्कजौहीनपरौसदैवदोषाणिचंद्रेणसमाश्चतुंगाः ॥ ४९ ॥ अथरिपुभावेराशिफलम् ॥ वृद्धयवनः ॥ मेषेरिपुस्थेप्रभवंतिपुंसांचतुष्पदास्तीक्ष्णतराःसुरौद्राः ॥ तच्छत्रवोम्लेच्छसमुद्भवाश्चकार्य्यंविनाचैवनरस्यलोके ॥ ५० ॥ चतुष्पदार्थेप्रभवेच्चवैरंसदानराणांवृषभेरिपुस्थे ॥ असत्यमार्गेणतथांङ्गनानांसङ्गान्नितांतंनिजबंधुवर्गे ॥ ५१ ॥ तृतीयराशौरिपुगेनराशांवैरंभवेत्स्त्रीजनितंसदेव ॥ तथानराणांसहितंचपापैर्वणिग्जनैर्नीचजनानुरक्तैः ॥ ५२ ॥ कर्केरिपुस्थेगृहसंभवंचभवेन्मनुष्यंस्यसदातुरस्य ॥ समंद्विजेंद्रेणनराधिपैश्चमहाजनेनैव[illegible]रानुरोधात् ॥ ५३ ॥ सिंहेरिपुस्थेभवनेचवैरंपुत्रैःसमंबंधुजनेननित्यम् ॥ धनोत्थमार्तस्यविनिर्जितस्ययद्वामनुष्यस्यवराङ्गनाभिः ॥ ५४ ॥

कन्यास्थितेशत्रुगृहेस्ववैरंसमंसुताभिःप्रभवेन्नराणाम् ॥ दुश्च-
रिणीभिश्वसदांगनाभिर्वेश्याभिरेवात्रगतत्रपाभिः ॥ ५५
तुलाधरेशत्रुगृहेनरस्यनिधिस्थितिस्थंप्रभवेच्चवैरम् ॥ कथंसुप-
स्यनरस्यसाधोःस्वबंधुवर्गाच्चनिजालयाच्च ॥ ५६ ॥ कौ-
रिपुस्थेप्रभवेच्चवैरंकार्यंसुधर्मस्यनरस्यकुर्यात् ॥ सार्द्धंद्विजैं-
श्वसरीसृपैश्वव्यालैर्मृगैश्चौरगणैर्नराणाम् ॥ ५७ ॥ चापेरिपु-
प्रभवेच्चवैरंशरैःसमेतंचसरावकैश्व ॥ सदामनुष्यैश्वहयैर्गजैश्वपुनर-
थान्यैःपरिवंचनैश्व ॥ ५८ ॥ मृगेरिपुस्थेप्रभवेच्चवैरंसदानरा-
धनसंभवंच॥मित्रैःसमंसाधुमहाजनेनप्रभूतकालंगृहसंभवेन ॥५९
कुंभेरिपुस्थेचतथार्थहेतोर्नराधिपैनैवजलाश्रयैश्व ॥ वापीतडागा-
भिरेवनित्यंक्षेत्रादितोन्यैःपुरुषैःकुवन्यैः ॥ ६० ॥ मीनेरिपुस्थे
भवेन्नराणांवैरंचनित्यंसुतवस्त्रजातम् ॥ स्त्रीहेतुकंस्वीयतयापुराणा-
पिश्रयाणामितरेतरंच ॥ ६१ ॥ अथषष्ठेशभावफलम्
षष्ठेशेलग्नगतेनीरुग्निरुत्सवकुटुंबकष्टकरः ॥ बहुपक्षेरिपुहंता
वतिनरःस्वैरवचनधनः ॥ ६२ ॥ षष्ठपतौद्रविणस्थेदुष्टश्वतुरो
संग्रहवान् ॥ स्थानप्रवरोविदितःसव्याधिस्तनुजहद्धिचत्तः ॥ ६३
षष्ठपतिःसहजस्थःक्रूरःकुरुतेस्वलोककष्टकरम् ॥ जनकरमारमण-
तिंत्वंतिकष्ठग्रामहस्तस्य ॥ ६४ ॥ षष्ठाधिपतिस्तुर्येपितृतने-
वैरिणोमिथःकुरुते ॥ शंकरंजसुतःपितृतोलक्ष्मींलभतेसुचिर-
॥ ६५ ॥ रिपुभवनपतौसुतगेपितृसुतयोर्वैरितामृतिकृंत ॥
रेशुभेचनिधनःपदवीदुष्टश्वतंतत्फलति ॥ ६६ ॥ रिपुभवनपेरिपु-
नीरुग्वैरंसुखीकृपणः॥ नहिजन्मतोऽपिसीदतिस्थानकवासीम-

नुजः ॥ ६७ ॥ अहितपतौसप्तमगेक्रूरेभार्य्याविरोधिनीचंडा ॥ तापकरीत्वथसौमेवंध्यावागर्भपतनपरा ॥ ६८ ॥ रिपुपतिर्मृतिभे गृहिणीमृतिर्विषधराच्चकुजोविषतोबुधः ॥ सपदिचंद्रइनोर्नृपसिंह्योःकविगुरूरिपुलोचनयोरुजम् ॥६९॥ शनेर्ग्रहणिकारुजावातदोषतःस्त्रीमृतिः ॥ शत्रुपतिर्यदिनवमेक्रूरःखचरस्तदाभ्रष्टः ॥ विबुधविरोधीक्रूरोनमन्यतेयाचकंचगुरुम् ॥ ७० ॥ अरिगृहपेदशमस्थेक्रूरेमातरिरिपुस्तदादुष्टः ॥ धर्मसुतपालकमतिर्मातुर्द्वेषीभवेन्मनुजः ॥ ७१ ॥ वैरिपतिर्लाभगतेक्रूरेमरणंविपक्षतोभवति ॥ तस्करकृताचहानिःस्याच्चतुष्पदाल्लाभवान्मनुजः ॥ ७२ ॥ षष्ठपतौ द्वादशगेचतुष्पदधनंधान्ययुतःसदामनुजः ॥चपलोमदांधलक्ष्म्या लक्ष्म्याह्लादपरोनरोभवति ॥ ७३ ॥ अन्यच्च ॥ शत्रुभनाथःशत्रुगृहेचेज्ज्ञातिविरोधःस्यात्सहजोस्य ॥ अन्यजनैःसत्सौहृदवृद्धिर्यानयुतःसद्दीनजनर्द्धिः॥ ७३ ॥शत्रुभनाथेसप्तमआयेवातनुगेहेसाहसवान्स्यात् ॥ पुत्रविहीनोमान्यउदारःसद्गुणकीर्तिर्द्रव्यसमेतः ॥ ७४ ॥ शत्रुभनाथेरिःफमृतिस्थेरोगनिशांतंकोविदवैरी ॥ प्राणिविहिंसातत्परचित्तोथोपरदारासक्तमनस्कः ॥ ७५ ॥ शत्रुभनाथेभाग्यगृहस्थेदारुशिलादेर्विक्रयकर्त्ता ॥ संव्यवहारेक्वापिचहानिःक्वापिच वृद्धिश्चन्द्रकलावत् ॥ ७६ ॥ शत्रुभनाथेव्योम्निधनेवासाहसयुक्तोवश्यजनाढ्यः ॥ कर्मसुनिष्ठावान्सुखयुक्तोनैकनिवासःप्रोक्तनिरुक्तः ॥ ७७ ॥ शत्रुभनाथेभ्रातरितुर्येवातिरुषास्याल्लोहितनेत्रः॥ वापिशुनोद्वेषीचलचित्तोवित्तसमेतःक्वापिमनस्वी ॥ ७८ ॥ शत्रुभनाथेपंचमगेहेचंचलमित्रद्रव्यसुखाढ्यः ॥ प्रीत्यनुकम्पावानति-

सौम्यःस्यान्निजकार्येऽसौनिपुणोपि ॥ ७९ ॥ इत्येवंरिपुभाव
विचारः ॥६॥ अथसप्तमभावस्तत्रकिंविचार्य्यमित्युक्तंजात
काभरणे॥रणांगणश्चापिवणिक्क्रियाश्चजायाविचारोगमनंप्रयाण
म् ॥ शास्त्रप्रवीणैर्हिविचारणीयंकलत्रभावेकिलसर्वमेतत् ॥ १
अत्रचंद्रसौम्यकलत्रेशलग्नेशावस्थितिःकलत्रप्राप्त्यादिहेतु
उक्तंचजातकरत्ने ॥ लग्नाच्चंद्राच्चवीर्याढ्यंकलत्रंसप्तमंयदि
स्वेशसौम्येक्षितंयुक्तंस्त्रीप्राप्त्यैचान्यथानहि ॥ २ ॥ लग्नेंद्वोर्मदने
सितेंदुसहितेदृष्टेथतद्वेगणेस्त्रीबाहुल्यमितेज्यवित्कुजलवेचैकामृ
सोग्रके ॥ व्यंगाधी ५ द्युन ७ धर्म ९ भेसहितयोःशुक्रार्कयोःस्या
त्प्रियासप्तांत्यो ७।१२ दयगैःखलैःक्षयविधौपुत्रे ५ सुतंस्त्रीवि
॥ ३ ॥ अथसामान्यविचारेणमदस्थरव्यादीनांफलानि त
सूर्यफलम् ॥ युवतिभुवनसंस्थेभास्करेस्त्रीविलासीनभवतिसुख
गीचंचलःपापशीलः ॥ उदरसमशरीरोनातिदीर्घोनह्रस्वोकपिल
नरूपःपिंगकेशःकुमूर्तिः ॥४॥ चंद्रफलम् विमलवपुषिचंद्रेसप्त
स्थेमनुष्योरुचिरयुवतिनाथोकांचनाढ्यःसुदेही ॥ शशिनिकृश
रीरेपापगेपापदृष्टेनभवतिसुखभागीरोगिपत्नीपतिःस्यात् ॥ ५
भौमफलम् ॥ मुनिगृहगतभौमेनीचसंस्थेरिगेहेयुवतिमरणदुः
जायतेमानवानाम् ॥ मकरगृहनिजस्थेनान्यपत्नीश्चधत्तेचपल
तिविशालांदुष्टचित्तांविरूपाम् ॥६॥ बुधफलम् ॥ तुरगभाव
तेंहारिणांकजेभवतिचंचलमध्यनिरीक्षितः ॥ विपुलवंशभवःप्रमदा
तिःसचभवेच्छुभगेशशिवंशजे ॥ ७ ॥ गुरुफलम् ॥ युवति
दिरगेसुरयाजकेनयतिभूपतितुल्यसुखंजनः ॥ अमृतराशिसमान

र्चाः सुधीर्भवतिचारुवपुःप्रियदर्शनः ॥ ८ ॥ भृगुफलम् ॥
युवतिमंदिरगेवसतेनरोबहुसुतेनधनेनसमन्वितः ॥ विमलवंशभवः
प्रमदापतिर्भवतिचारुवपुर्मुदितःसुखी ॥ ९ ॥ शनिफलम् ॥
विश्रामभूतांविनिहंतिजायांसूर्यात्मजःसप्तमगश्चरोगान् ॥ धत्तेपु-
नर्दंभधरांगहीनंमित्रस्यवंशोनुवितासुहृतच्च ॥ १० ॥ राहुफलम् ॥
जायास्थराहुर्धनहानिजायांददातिनार्योविविधांश्चभोगान् ॥ पापा-
नुरक्तांकुटिलांकुशीलांददातिशेषैर्बहुभिर्युतश्च ॥ ११ ॥
अन्यच्च ॥ स्यात्सप्तमंबस्तितरिहांगनादेर्वादप्रपायानवणिक्क्रियादेः ।
अन्योन्यमिष्टार्थफलं नृनार्योः पितामहादेश्च फलंविचार्यम् ॥
॥ १२ ॥ शुभेशुभंस्यादशुभेनशोभनं गुरौसिब्जेचबलान्वितेंगना ॥
सुवर्णवर्णाविदिनीलभाकुजेसुशोणभाश्यामतराशनौवगौ ॥ १३ ॥
सूर्येज्ञेयाकालजीर्णाज्ञविध्वोर्बालाशुक्रेयौवनाढ्याकुजेपि ॥ पू-
ज्येरम्यासूनुसूःसद्गुणास्याद्वृद्धैवस्यादर्कजेगौचजाया ॥ १४ ॥
क्लीबाराहौवाशनौस्त्रीस्वभावाशुक्रेब्जेचान्येषुसापुंस्वभावा ॥ सौम्यै
र्युक्तंसौम्यभंसौम्यदृष्टंश्वश्रूपक्षात्स्यात्सुखंचान्यथान्यत् ॥ १५ ॥
वर्गेसितस्यसितदृग्यदि तत्रपत्न्योबह्व्यःसुखायगुरुभेतुमतैकपत्नी ॥
नीचेसितेपिविधुपूज्यसितर्क्षकेत्रशुक्रारदृष्टिसहितेवनितासगर्वा ॥
॥ १६ ॥ द्यूनेयमेसृजितदीक्षणतश्चवातार्ताचंचलासरुधिराकटिचि-
ह्नयुक्ता ॥ साब्जेकुजेमृतिमुपैत्युदरामयेनाक्यग्वोजलक्रिमिरु
जापशुडाकिनीभिः ॥ १७ ॥ द्यूनेशुभैःसुमदनोथखरस्मरोन्यैः
क्लीबैर्नपुंस्त्वमगुनातुनदारयोगः ॥ चेत्स्यान्म्रियेतशुभदृष्टयुतेविल-
म्बाद्रन्ध्रेर्कजेऽसृजिमदेवनिताद्वयंस्यात् ॥ १८ ॥ चन्द्रदृक्-

चेन्मदेचश्चलाचाबलाजीववर्गेज्ञयुग्दृष्टइन्दौतथा ॥ आर्की
ग्वर्गयोस्तत्रतद्दृग्यदादम्पतीचञ्चलौचेत्सितोन्यारतः ॥ १९
मन्देन्द्वारायुक्तदृष्टाविधुर्वामध्येऽसृक्शन्योस्तयोःपुंश्चलत्वम्
सौम्यांशेवाद्यूनपेसौम्यदृष्टे वेश्याकाराकामिनीस्यान्नरस्य ॥ २०
लग्नस्मरव्ययगताअशुभाःसुतेऽब्जेक्षीणेथवाखलभगेचनतद्विवाहः
षष्ठेव्ययेवपुषिवाज्ञरवीतदैकाकोणेद्युनेचविकलैवयदासितारौ
॥२१॥ गण्डान्तर्क्षेद्यूनगेवासितेंगेमन्दे बन्ध्येशः सुतर्क्षेनसच्चेत्
पापाःकामेऽब्जात्तनोर्वानसन्तोमन्देन्द्वोर्द्यूनेपुनर्भूपतिःस्यात्॥ २२
भार्याःस्युर्द्यूनेशनन्दांशसंख्याःखेटेक्षातुल्याश्चगोंशेज्ञशन्योः ॥
रार्क्योरेकैकिकाथारिगेस्त्रेमृत्यौमन्देगौमदेस्त्रीनतिष्ठेत् ॥ २३
जन्मलग्नाद्वधूंकुर्यादुर्भगांसप्तमेरविः ॥ पापर्क्षेनीचगोहन्यात्
पदृष्टयुतोपिवा ॥ २४ ॥ कृशांगींविकलांकुर्य्यात्क्षीणश्चेद्वि
स्तगः ॥ पूर्णःशुभैर्युतोदृष्टःकांतकांताशतप्रदः ॥२५॥ द्वितीया
बलांहन्यान्नीचस्थःशत्रुगेहगः ॥ स्वर्क्षेतुंगेशुभैर्दृष्टःकुजोदत्ते
स्त्रियम् ॥२६॥ वक्रःस्मरस्थोविनिहंतिनारीम्पापर्क्षगामीखलु
दृग्गामी ॥ पुनर्भवावाप्यथवाऽरिरूपाशुभेक्षितस्तुंगसुहृद्भसंस्थः
॥ २७ ॥ द्यूनेद्यूनेश्वरेक्रूरयुक्तेजायाविनश्यति ॥ अथोपायम्
विधिवद्भूमिदानंचपत्नीदानंविशेषतः ॥ दासीदानंततोदद्यात्
दंगोप्रदानक्रम् ॥ २८ ॥ इतिस्त्रीमरणयोगाः ॥ अथद्वि
योगाः ॥ शुक्रशशिभ्यामस्तेसहितेचेदतनयोविभार्य्योवा ॥
पुंभ्यांसंदृष्टौदंपतीपरिणततनूस्तः॥ २९॥ सुतमित्रोनितरुयाद्यो
नेर्कशशिनोभवेत्॥स्त्रीवियुक्स्थिरदेहश्चद्युनेभौमार्कयोर्नरः ॥ ३

स्त्रीयुतःसधनोराजद्वेषीजीवार्कयोर्मदे ॥ निर्धनःपृथुदेहोद्रिचारी स्याढ्यःसितार्कयोः ॥ ३१ ॥ प्रेष्योदारिद्र्ययुङ्नीचोभान्वर्क्योः पदबंधुयुक् ॥ असत्यवाक्कृतेर्ष्यालुर्यूनारेंद्वोःप्रलापयुक् ॥ ३२॥ नृपोवानृपसन्मान्योविदिंद्वोःसत्कविर्द्युने ॥ कन्याढ्योनृपतिःप्राज्ञःसवाणिज्योऽब्जजीवयोः ॥ ३३ ॥ कन्यायुक्चाल्पपुत्रस्वः स्त्रीयुग्द्यूनेसिताब्जयोः ॥ स्त्रीहीनोनगराध्यक्षोद्यूनेऽब्जार्क्योः पुरेचरः ॥ ३४ ॥ मृताद्य१स्त्रीर्विवादाढ्यःशूरोद्यूनेबुधारयोः ॥ शैलांबुवनचारीस्त्रीहीनोजीवारयोर्द्युने ॥ ३५ ॥ स्त्रीहेत्वनर्थयुग्दुष्टाचारोद्यूनारशुक्रयोः ॥ स्त्रीदिष्टोविधनोऽन्यस्त्रीरतोद्यूनार्किभौमयोः ॥ ३६ ॥ स्वाचारःसुकलत्राढ्यःस्वजनाढ्योबुधेज्ययोः ॥ नृपमंत्रीसकल्याणःस्त्रीचेष्टःस्त्रीज्ञशुक्रयोः ॥ ३७ ॥ स्त्रीपुत्रसुखहीनश्चसरुग्धनशनिज्ञयोः ॥ भोगीस्त्रीरत्नसंयुक्तःसकन्योजीवशुक्रयोः ॥ ३८ ॥ मूर्खस्त्रीवैरनष्टस्वःपितृस्वःस्त्रीज्यमंदयोः ॥ वित्तस्त्रीरत्नसौख्याढ्यःशुक्रार्क्योःकीर्तियुग्द्युने ॥ ३९ ॥ इतिमदेद्विग्रहयोगाः ॥ अथस्त्रीप्राप्तिस्त्रीसुखयोगानाह ॥ जातकरत्ने॥लग्नाच्चंद्राच्चवीर्य्याढ्यंकलत्रंसप्तमंयदि॥स्वेष्टसौम्येक्षितंदृष्टंस्त्रीप्राप्त्यैत्वन्यथानसत्॥४०॥अथदंपत्योःप्रीतियोगाः॥ लग्नेश्वरो लग्नगतःस्मरेशोजायास्थितोद्वावथलग्नसंस्थौ। यामित्रगौद्वावथभर्तृवध्वोःप्रेमातिरेकंकुरुतेविशेषात् ॥४१॥शत्रुदृष्ट्याचदंपत्योर्नित्यंत्र्यकंटकोभवेत्॥लग्नेशास्तपयोःसत्यमदृष्ट्याप्रीतिरल्पता ॥४२॥ सतींसुशीलांकुलजांविधत्तेनानाविधस्त्रीस्फुटरश्मिजालः॥पापःशुभोचस्मरगोस्तनीचः करोतिभार्य्यांचपलांविशीलाम्॥४३॥गौरीं

सुरूपांस्फुटपंकजाक्षींसितःशुभर्क्षेशुभदृष्टयुक्तः॥ चिरायुषंभाग्ययु
नरंचकुर्य्याद्गुरुर्दर्पकदर्य्यवासी ॥ ४४ ॥ जायास्थोभार्गवःकुर्य्या
द्बहुरत्नसुताबला ॥ नरंसदासुशीलंचसुंदरंकुलभूषणम् ॥ ४५ ॥
लग्नेशेसप्तमस्थेवाभार्य्यादेशकरः पतिः ॥ लग्नस्थेसप्तमेशेतुभर्तु
देशकृद्वधूः ॥४६॥ मदगतायदिपापखगास्तदादयितयासहनैवसु
लभेत्॥ शुभखगा दयितासुखकारकाः शशिमुखीबहुरूपगुणान्वि
ता ॥४७॥ गुरुसितावपिमंदयुतेक्षितौमदगतौचतुरावनितातदा
स्मितमुखीबहुरूपविभूषणाबहुसुताधनधान्यसमन्विता ॥४८॥ख
लयुतेक्षितमस्तगृहंयदिखलगृहंचखलांतरितस्तथा॥ चपलमत्रक
त्रमथोनरश्चपलदारवशात्परदारयुक्॥४९॥अथस्वस्त्रीतःपुंसो
तियोगः॥शनिकुजौमदगौमदनाधिपोनिधनगोप्रिरिपुव्ययगोथवा।
मरणमेतितदास्वकलत्रतस्त्वथरविर्विषदावनिताभवेत्॥५०॥अ
स्त्रीरूपविचारःकल्याणवर्मा॥शुक्रेंदुजीवशशिजैःसकलैस्त्रि
द्वाभ्यांकलत्रभवनेचतथैककेन॥ एषांगृहेपिचगणेपिविलोकनेवा
तिस्त्रियोर्भवनवर्गखगस्वभावाः॥५१॥ अन्यच्च॥ शुक्रांशपसमा
स्त्रीवर्णरूपगुणैर्युता ॥ मदपांशपतुल्यंहिस्वभाववरणंतथा ॥५२
अथस्त्रीणांसंख्यायोगाहोरासारे ॥. द्युनेशोयतमेंशेस्यात्तावं
वाद्युनेक्षकाः॥ तावंत्यःस्युःस्त्रियोनॄणामेकैवार्किकुजांशके॥५३
तुलावृषभकर्केषुशुक्रेंदुपतिदृष्टयः ॥ राशिसंख्यासमानाहिस्त्रि
प्राप्तिर्निगद्यते ॥५४॥ उदयभास्करात् ॥ मदनगाः ७ विहग
स्व २ पतीक्षिताः स्वमितितुल्यविवाहकरामताः ॥ इह ७ रवीं
दुकुजाःप्रबलाःक्रमाद्रस६ दश १० स्व२ मितप्रमदाप्रदाः॥५५

अंन्यत् ॥ जायास्थानेयदासौम्याःसौम्यैर्वायदिवीक्षितः ॥ जायेशो वाथलग्नेशस्तदाजायासतांमता ॥ ५६ ॥ सप्तमेगुरुसौम्यश्चेत्तदे-कावनिताभवेत् ॥ यामित्रेचंद्रशुक्रौचबहुपत्न्यःप्रजायते ॥ ॥ ५७ ॥ यामित्रेचंद्रसितयोर्वर्गःशुक्रेणवीक्षितः ॥ बहुपत्न्योऽ-थवाशुक्रवर्गश्चेद्बहुवल्लभाः ॥ ५८ ॥ जायाधिपौसूर्यभौमौतदैका-वनिताभवेत् ॥ वेश्याप्रियाभवेत्पुंसांबुधांशेसप्तमाधिपे ॥ ५९ ॥ भवनाधिपांशतुल्याभवंतिनार्य्योनिरीक्षणाद्वापि ॥ एकैकरविकु-जांशेगुरुबुधयोश्चापियामित्रे ॥ ६० ॥ अथास्यसवर्णावान्य-वर्णजाभार्य्येतिविचारो होराप्रदीपे॥जायेशेगुरुशुक्रांशेसवर्णा-बहुवल्लभा ॥ रविभौमशनेरंशेजायेशेन्यूनजातिका ॥ ६१ ॥ शेषांशेसप्तमाधीशेमध्यजातेश्चकामिनी ॥ ६२ ॥ अथान्यस्त्री-वेश्यादिरतियोगाः जातकसारे ॥ भौमांशकगतेशुक्रेभौमक्षे-त्रगतेथवा ॥ भौमेनयुतदृष्टेवापरस्त्रीभोगमिच्छति ॥ ६३ ॥ अ-न्यन्मनुष्यजातके ॥ शुक्रेस्मरेसौरमहीजवर्गेशन्यारदृष्टेऽन्यकल-त्रगामी ॥ तत्रसचंद्रौयदिभूमिजार्कौतदानृनार्य्यौव्याभिचारिणौस्तः ॥६४॥ शनैश्चरेसप्तमगेविलग्नेयदानवांशोधरणीसुतस्य॥ वृद्धांगना सुक्तरतोमनुष्यःसदाभवेत्कामनिपीडितात्मा ॥६५॥ यदा विलग्ने सधनुःशशांकेनवांशकःस्याद्रविनंदनस्य ॥ वेश्यानुरक्तंकुरुतेमनुष्यं सदातुरंपापरतंनृशंसम् ॥ ६६ ॥ अथवियोनिरतियोगः॥ सिं-हांशके सूर्यसुतेविलग्नेवाभौमदृष्टेरविजेस्तसंस्थे ॥ नरोभवेद्वक्रभ-गोत्रयोगेविपर्य्ययंवक्ररतानुरक्तः ॥ ६७ ॥ अथकन्यारतियो-गः पवनजातके॥ कन्यांशकेसौम्यदृशाविहीनः विलग्नसंस्थोभृगु

जोत्रजातः ॥ कन्यारतिंवांछतिपापयुक्तःस्त्रीलंपटःस्यात्सततंविलज्जः ॥ ६८ ॥ तनुशनिश्चशुचिःस्मरगःसितोविशुभदृक्सुतभंवृषलीपतिः ॥ तरणिबंधुरनंग ७ गतोंबरेविधुरजीवदृशावृषलीपतिः ॥६९॥ अथदंपत्योःकाणयोगः उदयभास्करे॥रविविधून्यय १२ वैरि ६ गतोयदैकनयनौरमणीपुरुषौमतौ ॥ यदिशनिर्मदनेहिमदीधितेःकरतलेनहिवीर्य्यपरिच्युतिः ॥ ७० ॥ अथविधौशनिराररयुतेक्षितेपरखगादिवियोनिगुदावशात् ॥ परवधूरतयोगज्रपुंदृशायदिभवेद्धिगुदारमणस्तदा ॥ ७१ ॥ यदिचदृश्यदलेऽर्कशनीरिपौ ६ हिमगुरस्त ७ गतोविदवीक्षितः॥ कुवृषलीपतिरार्किकुजौयदाऽरिसुखयोस्तरुणीकिलगुर्विणी ॥७२॥ अथरंडयोगान्वृद्धवयसिविवाहयोगानाह ॥ यदिसितेंदुसुतौमदनोपगौविलग्नोयदितौशुभवीक्षितौ ॥ वयसिपश्चिमकेरमणीप्रदौधनसुतादिसुखानिप्रदर्शकौ ॥७३ ॥ अथाऽऽमययोगाः॥ मदग्रहंरविपुत्रयुतेक्षितंभवतिगुल्मगुदामयमेहकृत् ॥ रविकुजावपितद्गृहवर्णवद्वहुगदांद्वपुलांछनकारकाः ॥ ७४ ॥ अथविवाहेवर्षज्ञानमुक्तंश्रीगुरुचरणैः॥शुक्राचंद्रात्सप्तमंयद्ग्रहंतत्संख्यातुल्यैर्वत्सरकैर्युतैर्वा ॥ स्यादुद्वाहोवत्सरेतद्दशांतेवंशोरूपंतत्पतेश्चिन्तनीयम्॥ ७५॥ अथस्त्रीपुंसयोर्मध्येप्रथमंकस्यमरणंभविष्यतीतिज्ञानमुक्तंतैरेव ॥ नाम्नोमात्राकृतगुणाद्विगुणाक्षरसंयुताः ॥ तष्टात्रिभिर्द्विशेषेस्त्रीम्रियतेखैकयोःपुमान् ॥ ७६ ॥ अथसप्तमभावेराशिफलम् वृद्धयवनः॥ मेषेस्तसंस्थेचभवेत्कलत्रंक्रूरंनराणांचपलस्वभावम् ॥ पापानुरक्तंकठिनंनृशंसंवित्तप्रियंस्वार्थपरंसदैव ॥७७॥

वृषेस्तसंस्थेचसुरूपदंतंभवेत्कलत्रंप्रणतंप्रशांतम् ॥ पतिव्रतंचारुगुणेनयुक्तंलक्ष्माधिकंब्राह्मणदेवभक्तम् ॥ ७८ ॥ तृतीयराशौचभवेत्कलत्रंकलत्रयुक्तंसधनंसुवृत्तम् ॥ रूपान्वितंसर्वगुणोपपन्नंनवीनवेषंगुरुवर्ज्जितंच ॥ ७९ ॥ कर्केस्तसंस्थेसुमनोहराणिसौभाग्ययुक्तानिगुणान्वितानि ॥ भवंतिसौख्यानिकलत्रकाणिकलंकहीनानिसुसंयतानि ॥ ८० ॥ सिंहेस्तसंस्थेचभवेत्कलत्रं तीक्ष्णस्वभावंचपलंसुदुष्टम् ॥ विहीनवेषंपरवेश्मसंस्थंबह्वाशनंस्वल्पव्रतंकृशंच ॥ ८१ ॥ कन्यास्तसंस्थेचभवंतिदाराःसुरूपदेहास्तनयैर्विहीनाः ॥ सौभाग्यभोगार्थनयेनयुक्ताःप्रियंवदाःसत्यधनप्रगल्भाः ॥ ८२ ॥ तुलेस्तसंस्थेगुणगर्विताङ्गाभवंतिनार्य्योविविधप्रकाराः॥ पण्यप्रियाधर्मरताःसुदंताः प्रभूतपुत्राःप्रथिताविनीताः ॥ ८३ ॥ कीटेस्तसंस्थेचकलासमेताभवंतिभार्य्याःकृपणानराणाम् ॥ सुकुत्सितांग्यः प्रणयेनहीनादौर्भाग्यदोषैर्विविधैःसमेताः ॥ ८४ ॥ चापेस्तसंस्थेचभवेत्कलत्रंसर्वनराणांपुरुषाकृतिंच ॥ सुनिष्ठुरंभक्तिनयेनहीनंप्रशांतिसौख्यंनतिवर्जितंच ॥ ८५ ॥ मृगेस्तसंस्थेचभवेत्कलत्रंनृणांसुदुष्टंविगतस्वभावम् ॥ विस्रस्तलज्जंपरलोकरक्तंयुद्धप्रियंदंभसमन्वितंच ॥ ८६ ॥ घटेस्तसंस्थेचभवेत्कलत्रंस्थिरस्वभावंपतिकर्मदक्षम् ॥ देवद्विजानांसततंप्रहृष्टंधर्मध्वजंसंशयतासमेतम् ॥ ८७ ॥ मीनेस्तसंस्थेचविकारयुक्तंभवेत्कलत्रंकुमतिंकुपुत्रम् ॥ अधर्मशीलंप्रणयेनहीनंसदानराणांकलहप्रियंच॥ ८८ ॥ इतिराशिफलम् ॥ अथसप्तमेशभावफलम्॥ दयितेशोलग्नगतःस्तोकंनिःस्नेहमन्यतरभार्यम् ॥ भोगभुजंरूपयुतंसुस्त्रीकंजनप्रतिलो-

लचित्तंच ॥ ८९ ॥ जायापतौधनस्थेपुष्टादयितासुतोज्झिताभ-
वति ॥ वित्तंचकलत्रकरंसततंदुःखानुषंगंच ॥ ९० ॥ सप्तमपः
सहजगतश्चात्मजवत्सलोदुःखी ॥ देवररतासुरूपागृहिणीक्रूरेतुतद्गृ-
हगे ॥ ९१ ॥ जायेशेतुर्य्यस्थेलोलःपितृवैरिसाधकःस्नेही ॥
अस्यपितादुर्वाक्यस्तद्भार्य्यांपालयेच्चपिता ॥ ९२ ॥ सप्तमपतौ
सुतस्थेसौभाग्ययुतःसुतान्वितःपुरुषः ॥ प्रियसाहसदुष्टमतिस्तत्तनयः
पालयेद्दयिताम् ॥ ९३ ॥ रिपुगृहगःकांतेशःप्रियासहवैरिणंसरु-
ग्भार्य्यम् ॥ वनितासंगाक्षपिणंक्रूरः कुरुतेचमृत्युपदम् ॥ ९४ ॥
सप्तमपेसप्तमगेपरमायुःप्रीतवत्सलःपुरुषः ॥ निर्मलशीलसमेतस्तेज-
स्वीजायतेसततम् ॥ ९५ ॥ रमणीशेनिधनगतेगणिकासुरतपरोगृ-
हेविरतः ॥ विद्वाद्द्वितीयासक्तोनस्त्रीसेवाकरःपुरुषः ॥ ९६ ॥
सुकृतगतेरमणीशेतेजस्वीशिल्पवान्प्रियाप्येवम् ॥ क्रूरेतुखंडरूपा
लग्नेशोवीक्षितेतपः प्रबलः ॥९७॥ गृहिणीपेदशमस्थेनृपदोषीलंप-
टःपुमान्क्रूरः ॥ क्रूरेदुष्टःश्वशुरःख्यातश्चसर्वतोदिक्षु ॥ ९८ ॥ लाभ-
स्थेजायेशेभक्तारूपान्वितासुशीलाच ॥ दयितापरिणीतास्याद्म्रिय-
तेसाचप्रसवसमये ॥ ९९ ॥ सप्तमपेद्वादशगेगृहबंधूज्झिताभवेद्भार्या ॥
लोलासादुष्टाचपुनरुच्चलितस्यपुरुषस्य ॥ १०० ॥ इति सप्तम-
भावः समाप्तः ॥७॥ अथाष्टमोभावः ॥ नद्युत्तारात्यंतवैषम्यदुर्ग
शस्त्रंचापुःसंकटंचेतिसर्वम् ॥ रंध्रस्थानेसर्वदाकल्पनीयं प्राचीनाना-
माज्ञयाजातकज्ञैः ॥ १ ॥ नद्युत्तारेचनौकायांमार्गवैषम्यसंस्थिते ॥ दुर्ग-
स्यवेष्टनेचैवफलं तस्माद्विचिंतयेत् ॥ २॥ वस्तुनाशहतवोपिशत्रुभिः

क्रूरितेभये ॥ अथवायुद्धसमये तथाव्याधिसमुद्भवे ॥ ३ ॥ छिद्रालोकान्यलीकानिचिंतयेच्चाष्टमेबुधः ॥ अष्टमेभवनेक्रूरैरोगार्त्तोम्रियतेध्रुवम् ॥४॥ बंधनान्मुच्यतेवद्धोनरोनात्रविचारणा॥नौकायांचाष्टमेक्रूरेसुखेनायातिपूरिता ॥ ५ ॥ द्वितीयेचाष्टमेक्रूरे युद्धतः कलहश्चिरम् ॥ अष्टमेसंस्थितेक्रूरेदुर्गभंगोनजायते ॥ लग्नपेचविशेषेणदेवेंद्रेपिसमागते ॥ ६ ॥ अथसामान्यविचारेणाऽष्टमस्थरव्यादीनांफलानिगर्गमतेन॥ तुंगर्क्षेह्यष्टमः सूर्य्यः सुखमृत्युंप्रयच्छति॥अन्यत्रदुःखमरणंदत्तेकाष्ठाच्चयातनाम्॥७॥विक्रमस्थेनपापेन क्रूरेणमृत्युगोरविः ॥ युक्तोदृष्टः स्थूलभूरियमदूतोविनाशयेत् ॥ ८ ॥ अथचंद्रफलम् ॥ चंद्रोष्टमेमृत्युकरोनराणांक्षीणोमृतिंयच्छतिबाल्यएव ॥ कालेत्रिदोषज्वरदाहदातानयत्यधः क्षीणतनुर्धरित्र्याम् ॥ ९ ॥ मृत्युंगतोमृत्युकरोमहीजः शस्त्रादिलूतादिभिरग्नितोवा ॥ कुष्ठप्रणाशोगृहिणीप्रपीडानयत्यधोनाशकमानयेच्च ॥ १० ॥ करोतिमृत्युंनिधनस्थितोबुधः सुखेनतीर्थेसुखदेनिराविले ॥ शूलस्यजंघोदररोगपीडा पापोपिधायांतकरोनराणाम् ॥११॥ जीवेमृत्युगतेज्ञानात्सुतीर्थेमरणंभवेत् ॥ शुभर्क्षेस्वगृहेचेत्स्यादन्यत्रमरणंभ्रमात् ॥ १२ ॥ आनृण्यंपितुराधत्तेतीर्थेमरणमेवच ॥ नयेत्पितृकुलंपुण्यंरंध्रगोभृगुनंदनः ॥ १३ ॥ विदेशतोनीचसमीपतोवासौरिर्मृतिंरंध्रगतोविधत्ते ॥ हृच्छोककासामयवह्विषूचीनानाविधंरोगगणंविधाय ॥ १४ ॥ राहुफलम् ॥ दंष्ट्रचौर्य्यापवादेनकुरुतेनिधनंतमः ॥ बहुकिल्विषमाधत्ते धत्तेकष्टात्सयातनाम्॥१५॥इति॥ अथाष्टमस्थरव्यादीनांविशेषफ-

लग्ने वीर्य्यान्वितःपश्यतिमृत्युभंयस्तद्धातुकोपान्मृतिमामनंति ॥ त-
द्युक्तकालाख्यनरस्यगात्रंतस्मिन्प्रदेशेबहुभिर्बहूनाम् ।१६। सूर्य्या-
दिभिर्निधनगैर्निधनंहुताशतोयायुधज्वरजमामयजंक्रमेण ॥ क्षुत्तृट्कृ-
तंचचरभेपरदेशगस्यस्यात्तत्स्थितेस्वविषयेपथिचद्विमूर्तौ ॥ १७ ॥
वह्न्यंबुवायुधतोज्वरामयतृषाक्षुत्तोर्कमुख्यैर्मृती रंध्रस्थैःसबलेक्षका-
च्चनिधनंवारंध्रपत्यंशपात् ॥ पित्ताद्वातकफाच्चापित्तइहात्रिभ्यः क-
फाच्चानिलश्लेष्मभ्यांमरुतोर्कतःसमयतुच्छिद्रांगकेकोपतः ॥ १८॥
छिद्रेशेस्वभगेचतीर्थमरणंलग्नेशयुक्तेतथाजीवाढ्येचसितान्वितेथंच
रभेछिद्रेन्यदेशेविपत् ॥ षष्ठाष्टस्थबुधारयोर्यदितदाचौरोस्यपा-
दौकरौनश्येतांख १० सुखस्थसूर्य्यकुजयोःशैलाग्रपाताद्वधः ॥
॥१९॥ अथाल्पायुर्योगाः ॥ गुरुसितेंदुसुतानिधनेथवास्थिरभ-
गाःसततंबहुकष्टदाः ॥ भवतिशैशवदुष्टकृदष्टपोयदिशुभोभवंगोवि-
तौसुखी ॥२०॥ यदिखलोलघुजीवनकृत्तथाशुभयुतोबहुजीवनदः
स्मृतः॥ निधनपः खलुयुग्मयुतो व्ययारिभगतोयदिवानिधनेश्वरः ॥
॥ २१ ॥ सतनुपोद्रुतमृत्युकरोभवेदथषडष्टगतौमृतिदेहपौ ॥
गतबलौहिरणेपरमार्तिदौप्रबलिनौविजयायपरंमतौ ॥२२॥ अथ
यवनजातकेमृत्युयोगाः॥तनौरविःसुतेभौमोह्यष्टमस्थःशनैश्चरः॥
नवमेचंद्रमायस्यलोभान्मृत्युर्नसंशयः ॥ २३ ॥ दशमोंगारके
जीवः सूर्योयदिचसप्तगः ॥ योगेस्मिञ्जायतेमृत्युस्तुरगान्मानव-
स्यच ॥ २४ ॥ तनौशनीरिपौसूर्यश्चास्तेज्ञोदशमेशशी ॥ नवमे
भूसुतोनूनंमृत्युर्वृषभेणवाग्निना ॥२५॥ षष्ठेवादशमेभौमोधनेचंद्रोऽ-
ष्टमेथवा ॥ भगंदरेणकुष्ठेनमृत्युरेवनसंशयः ॥ २६ ॥ तनौरविसु-

तोभौमः सूर्य्यःसप्तमगोभवेत् ॥ योगेस्मिञ्जायतेमृत्युःखड्गेनैवतु निश्चितम् ॥ २७ ॥ रविरंगारकौचैवचतुर्थभवनेगतौ ॥ दशमेरविसूनुश्चगजान्मृत्युर्नसंशयः ॥ २८ ॥ यदिक्रूरग्रहाक्रांतौस्थानावष्टमपंचमौ ॥ तस्यबंधुवशान्मृत्युर्निर्दिष्टोमुनिपुंगवैः ॥ २९ ॥ हिबुकेभास्करोयस्यद्वितीयस्थोनिशाकरः ॥ शूलिकायांभवेत्तस्यमृत्युरेवनसंशयः ॥ ३० ॥ यस्यंजन्मनिजायस्थाश्चंद्रभौमशनैश्चराः ॥ जायतेपरदारार्थेविनाशस्तस्य निश्चितम् ॥ ३१ ॥ धर्मस्थानेगतेचंद्रेकर्कमध्येधनेशनौ ॥ जलोदरेणरोगेणमृत्युरेवनसंशयः ॥ ३२ ॥ मूर्तौगतौतुमंदार्कौभौमचंद्रौतुसप्तमे ॥ द्वितीयेयदिशुक्रस्तुमृत्युःस्त्रीकारणेनतु ॥ ३३ ॥ षष्ठेक्रूरग्रहोयस्यनवमेचाष्टमेयदा ॥ शत्रुमध्येनसंदेहोमृत्युरेवनसंशयः ॥ ॥ ३४ ॥ पातालगोयदाक्रूरोदशमस्थस्तपोधनः ॥ तदातलप्रहारेणमृत्युस्तस्यप्रजायते ॥ ३५ ॥ सुहृत्संस्थोयदाभौमोदशमस्थःप्रजायते ॥ वायुशूलाद्भवेन्मृत्युर्जातकस्यनसंशयः ॥ ३६ ॥ चतुर्थगःशनिर्यस्यदशमस्थोधरात्मजः ॥ अपमृत्युर्भवेत्तस्यनात्रकार्या विचारणा ॥ ३७ ॥ नवमेरजनीनाथोकर्कसंस्थोधनेधनी ॥ जलोदरेणरोगेणमृत्युःस्यात्तस्यनिश्चितम् ॥ ३८ ॥ अन्येयोगाः ॥ सूर्यर्क्षेरविजेकुजर्क्षगगुरौनोपाययुक्तोभुजच्छेदोथोरिगृहेशनिः सितयुतोवैरीक्षितोंघ्र्येकहृत् ॥ ३९ ॥ कर्केगोहरिगेब्जउद्धृतशिराश्छिद्रेद्विनोकर्तकः सदृग्घीनविधौचशत्रुगृहगेपापत्रयाद्व्येक्षिहृत् ॥ ४० ॥ अथब्रह्मघ्नगोघ्नयोगौ ॥ सूर्य्यारेक्षितपापराशिगविधौस्याद्ब्र-

झघातीपुनर्मंदाब्धेखलुगोवधीत्रितयके १ । २ । ३ ऽजा-
त्स्थूलघातःखगैः ॥ सौम्येशत्रुगृहेरवीक्षितयुतेषष्ठाष्टमेंदौकजैर्ना-
शःशत्रुगृहेकुजारिगृहगेछिद्रेद्विजिह्वान्मृतिः ॥ ४१ ॥ सिंहेकर्कि-
णिसप्तमाष्टगविधौसाऽगौविनश्येत्पशोः सागौस्वारिगृहेशनौरिपुदृशा
युक्तेतिपापीस्मृतः ॥ कर्केंदौसशनौशुभग्रहदृशाहीनेतुखंजोभवेत्
भानौधर्मगतेशशीक्षितयुतेशत्रोर्गृहेसर्पतः ॥ ४२ ॥ अन्यत्सा-
रावल्याम् ॥ कन्यास्थयोरिनेंद्वोःपापेक्षितयोर्मृतिःस्वजनात् ॥
उभयोरप्यर्कशशिनोर्यदातदातोयमज्जनतः ॥ ४३ ॥ मृत्युर्जला-
द्विशेन्मंदेकुलीरेमकरेविधौ ॥ सवह्निशस्त्रजश्चंद्रेकुजर्क्षेपापमध्यगे॥
॥ ४४ ॥ कन्यायांपापमध्यस्थेचंद्रेरक्तोत्थशोफजः ॥ शस्त्राग्नि-
पाततोमृत्युः पापांशेसौरभेविधौ ॥ ४५ ॥ सौम्याऽदृष्टौखलौधर्म-
धीस्थौबंधान्मृतिप्रदौ ॥ वधस्त्र्यंशेशपाशादिर्हिमगुश्छिद्रगस्तथा ॥
॥ ४६ ॥ सपापेशीतगौद्यूनेमीनराश्युद्गमेरवौ ॥ मेषेशुक्रेंगनाहेतु-
र्मरणंमंदिरेभवेत् ॥ ४७ ॥ शूलोद्भिन्नमृतिर्भौमेसुखेर्केवायमेंबरे॥
त्रिकोणायगतैःपापैर्युगपत्सक्षशेंदुभिः ॥ ४८ ॥ रुधिरेसुखेथवा-
र्केविपद्यमेक्षीणचंद्रसंयुक्ते ॥ पापैस्त्रिकोणलग्नेशूलप्रोतस्यनिर्दिशे-
न्मरणम् ॥ ४९ ॥ चतुर्थेवांबरेभौमेक्षीणचंद्रसमन्विते ॥ मंददृष्टे
मृतिंयातिदंडकष्टेनताडितः ॥ ५० ॥ क्षीणेंदुमंदार्किकुजैश्चरंध्र-
लग्नांबुखस्थैः ८ । १ । ४ । १० र्लकुडाहतांगः ॥ तैःकर्मल-
ग्नात्मजधर्मसंस्थैर्धूमाग्निमृत्युर्गतिकुंठितांगैः ॥ ५१ ॥ सुखास्त-
खस्थैःकुजसूर्यमंदैर्मृत्युस्तुशस्त्रानलभूपकोपात् ॥ तथाक्षतोत्थ-

क्रमिजोंगपाक्षोमंदेन्दुभौमेधनवंधुखस्थैः २ । ४ । १० । ॥ ५२ ॥ सूर्य्येंबरेसुखेभौमेमृत्युर्यानप्रपाततः ॥ यंत्रोत्पीडनया द्यूनेभोमेखेज्ञेस्तबंधुगे ॥ ५३ ॥ बलान्वितारवीक्षितेक्रशोविधौमृतेशनौ ॥ क्रमिक्षताद्रुदामयान्मृतिश्चशस्त्रदाहजा ॥ ५४ ॥ सभौमेभास्करेद्यूनेरंध्रसंस्थेशनैश्वरे ॥ पातालेशीतगौक्षीणेमृत्युपक्षीकृतोभवेत् ॥ ५५ ॥ लग्नधीमृत्युधर्मेषु सूर्यमंदकुजेंदुभिः ॥ मृत्युर्भवतिशैलांगकुड्याऽशनिनिपाततः ॥ ५६ ॥ अत्रयस्योक्तयोगानांवक्ष्यमाणयोगानांमध्येचान्यतमोनभवतिनचाष्टमंस्थानंग्रहंयुतवीक्षितंभवतितदातस्यद्वाविंशतिद्रेष्काणाधिपाष्टमराश्यधिपयोर्बलवान् तदुक्तंदोषेणवातपित्तकफादिनाप्रागुक्तहुताशतोवायुधादिनांमृत्युर्वाच्यः ॥ ५७ ॥ अथद्रेष्काणफलंहोराप्रदीपात् ॥ उक्तंच॥ द्रेष्काणः कारणंमृत्योर्द्वाविंशेहिविलग्नतः ॥ तस्येश्वरेभ८ नाथोवासूचयेत्स्वगुणैर्मृतिम् ॥५८॥ बादरायण ः॥ मेषाद्रेष्काणेक्रूरवीक्षितेनशुभदृष्टे ॥ वृश्चिककर्कटसर्पैर्द्विपदाद्यैः पित्तरोगैर्वा ॥ ५९ ॥ अद्भिर्नक्राद्यैर्वामृत्युर्जलजैर्द्वितीयद्रेष्काणे ॥ एवंतृतीयभागेतडागवापीप्रपानाद्वा ॥ ६० ॥ वृषभाद्येद्रेष्काणेतुरगखरोष्ट्रैर्मृतिर्भवतिपुंसाम् ॥ वापित्ताग्निचौर्य्यादजाविनोर्वाद्वितीयेत्र वा॥६१॥ यानादिकपातात्संग्रामेवामृतिर्वृषस्यांते ॥ मिथुनाद्येद्रेष्काणेखलरोगैःश्वासकासैर्वा ॥ ६२ ॥ महिषवृषयोर्मिथुनद्विपद्रेष्काणकेनिपाताद्वा ॥ तृतीयेननिपाताच्चतुष्पदोद्वामृतिररण्ये ॥ ६३ ॥ कर्कटकाद्येमृत्युः कंटरुजामांद्यतोथवाऽस्त्रवशात् ॥ तत्रैवमध्यभागे ४ दंडाभिहतस्यमुष्टिघाताद्वा ॥६४॥ तत्रै-

वांत्येभागेमृत्युरतीसारतस्तथाऽजीर्णात् ॥ प्लीहवातगुल्मरोगैः प्रमेहमूर्च्छाभिघाताद्वा ॥६७॥ सिंहाद्येद्रेष्काणेविषदोषाद्वहुचराज्ज्वलाद्वापि ॥ भवतिहिमरणनिमित्तैर्नानाकारैस्तथारोगैः ॥६८॥ जलजहृदयामयकृतोमृत्युः स्यात्सिंहमध्यमेह्यंशे ॥ तस्यांतेगुदरोगैर्विषेणशस्त्रेणवाभवति ॥ ६९ ॥ कन्याद्येचौरानलपक्षिभिरंतोथवाशिरोरोगात् ॥ दुर्गाहिदंष्ट्रितुरगैस्तृषयापिमृतिर्द्वितीयांशे ॥७०॥ करभखरशस्त्रतोयादपिशापात्स्त्रीकृतान्नपानाद्वा॥अंत्येकन्याअंशेनृणांहिमृत्युः समादिष्टः ॥७१॥आद्यतुलाधरअंशेंगनाचतुष्पदनिपातजोमृत्युः ॥ मध्येतुजठररोगैरंत्येप्याला‌बुपातेभ्यः ॥ ॥ ७२ ॥ अलिनः प्रथमेअंशेशस्त्रविषस्त्रीकृतान्नपानैः स्यात् ॥ मध्येश्वादिभिरेणेभोष्ट्रादिघाततोंत्येमृतिर्भवति ॥ ७३ ॥ चापाद्येशकृदनिलाद्विषानलान्मध्यमेत्र्यंशे ॥ भवतिहिजठरामयजैस्तृतीयेजलजेनवामृत्युः ॥ ७४ ॥ हरिशूकरादिराजभिरंतोमकरादिद्रेष्काणेस्यात् ॥ मध्येजलजैः कशया अंतेशस्त्राग्निचौरघातेन ॥ ७५ ॥ कुंभाद्येजलजस्त्रीविषमांतर्मदनगुरुरुजामध्ये ॥ अंत्येमृत्युश्चतुष्पदमुखरोगैर्भवतिद्रेष्काणे ॥ ७६ ॥ मीनाद्येस्त्रीग्रहणात्प्रमेहगुल्मैरथद्वितीयांशे ॥कर्पूराज्जलरोगादर्थविमूत्रोद्भवोंत्येंशे ॥ ७७ ॥ जातकोत्तमेकाश्यपकृते ॥ स्वोच्चेस्वोच्चनवांशेवाशुभवर्गेथनीचभे ॥ नीचांशेक्रूरषड्वर्गेमित्रभेसुहृदंशके ॥ ७८ ॥ वर्गोत्तमेऽरिभेप्यंशेस्वर्क्षेद्वादशधाक्रमात् ॥ फलमष्टमभावोत्थंकथ्यतेयवनोदितम् ॥७९॥ अथरविफलम् ॥ भक्तिजाग्निप्रवेशेन १ जलहीतः २ प्रमादतः ३ दावाग्नितो ४

द्दंभकृतो ५ दीपनेन ६ विषादनात् ७ ॥ ७८ ॥ बंधना ८ चैवलोहाच्च९रक्तकोपात्तथैवच॥ १०॥क्षयकासा११दातपाच्च१२ मृत्युर्मृत्युगतेरवौ ॥ ७९॥ चंद्रफलम् ॥ जलप्रवेशा १ द्धस्ताभिघाता २ दसिनिपाततः ३ ॥ स्त्रीहस्ता ४ त्पित्तकफतो ५ दोषत्रयभवामयात् ६ ॥८०॥ जठरा७द्धुदरोगाच ८ पशुपादाभिघाततः९ ॥ गुदरोगात्१० शृंगघातात् ११ क्षया १२ चंद्रेऽष्टमेमृतिः॥८१॥ भौमफलम्॥ संग्रामा १ द्ग्रहणतः २ स्वहस्ता ३ न्निजशत्रुतः ४॥ द्विजपार्श्वा ५ दश्मपातात् ६ काष्ठा ७ त्कूपप्रपाततः ८॥ भित्तिपाता ९ द्धुतरोगा १०द्विषभक्षणत ११ स्ततः॥चौरप्रहरणा १२ द्भौमेमृत्युः स्यान्मृत्युभावगे ॥ ८२ ॥ बुधफलम्॥ज्वरात्१ कफविकारोत्थं२वातरोगा ३ द्व्रणेनच ४॥ महामयात् ५ प्रियजनवियोगा ६ द्वंदनामयात् ७ ॥ ८३ ॥ नेत्ररोगा ८ द्वायुरोगा९द्वंधनेनो १० दरामयात् ११॥ ८४॥ पादव्रणा १२ द्बुधेमृत्युर्मृत्युभावगतेक्रमात् ॥ गुरुफलम् ॥ नानारोगैः १ शूलरोगैः २ कर्णरोगात्तथैवच ३ ॥ स्वजना ४ द्विषूचिकातोऽ५तीसारा ६ न्निजमृत्युतः ७ ॥८५॥ रक्तकोपा ८ त्तुरगतो ९ निजेशा १० द्राजकोपतः ११ ॥ बहुभक्षणा १२ द्भवेन्मृत्युर्जीवेस्यान्मृत्युभावगे ॥ ८६ ॥ भृगुफलम् ॥ तृष्णया १ मुखरोगाच्च२दंतदोषा३ त्रिदोषतः४ ॥ विषूच्या५वनसत्वेन ६ भुजंगा ७ विषभक्षणात् ८ ॥ ८७॥ द्यूतया ९ विषकंठेन १० सुरतोत्थ ११ प्रकोपतः १२ ॥ बहुदुःखाद्भवेन्मृत्युर्मृत्युभावगतेसिते ॥ ८८ ॥ शनिफलम् ॥

बुभुक्षया १ लंघनेन २ तथाप्रायोपवेशनात् ३॥ बंधुवर्गा ४ दरिकरात् ५ क्षयतः ६ पृथुदद्रुतः ७ ॥ ८९ ॥ चटकै ८ व्रणकोपेन ९ हयपादाभिघाततः १०॥ हस्तितः ११ खरतो १२ मृत्युर्मंदे स्यान्मृत्युभावगे ॥ ९० ॥ होरासारेपि ॥ प्रजातानांहिजंतूनां मरणंयेनकेनचित् ॥ निमित्तपरतोज्ञानंवक्ष्येनिर्याणलक्षणम् ॥ ९१ ॥ लग्नादष्टमराशेःस्वभावदोषोद्भवंविजानीयात् ॥ निधनेशस्यनवांशस्थितराशिनिमित्तदोषजनितंवा ॥ ९२ ॥ मेषांशेमेषेवाज्वरविषजठराग्निपित्तसंभवतः ॥ येनग्रहेणयुक्तेदृष्टेवातस्यधातुदोषेण ॥ ९३ ॥ वृषभेवृषभांशेवात्रिदोषशोकपरास्त्रदाहाद्यैः ॥ ग्रहरहितेप्रोक्तफलंग्रहयुक्तेतत्समानदोषेण ॥ ९४ ॥ मिथुनेमिथुनांशेवाश्वासःकासोद्भवश्वशूलाद्यः ॥ कर्केकर्कांशेवातन्मांद्यादरोचनाद्वापि ॥ ९५ ॥ सिंहेसिंहांशेवाविस्फोटकशस्त्रज्वराद्यैश्च ॥ कन्यायांकन्यांशेजठराग्निगुह्यकलहपातनाद्यैश्च ॥ ९६ ॥ यूकेतदंशकेवास्वबुद्धिदोषेणहन्यतेपुरुषः ॥ ज्वरसन्निपातदोषैर्मरणंब्रूयादशंकितोनूनम् ॥ ॥९७॥ वृश्चिकराशौचांशेपांडुग्रहणीग्रहादिदोषेण ॥ वृक्षजलशस्त्रकाष्ठैश्चापांशकेचापयुतेमृत्युः ॥ ९८ ॥ मकरेमकरांशेवास्थूलान्नाऽरुचिबुद्धिसंभ्रमान्मृत्युः ॥ पापयुतेव्याघ्राद्यैःसर्पाद्यैर्दानसंदेहः ९९ ॥ कुंभेकुंभांशेवाव्याघ्रैः शस्त्रभुजंगमाद्यैर्वा ॥ श्वासज्वरक्षयकृतैर्मरणंब्रूयाद्विशेषेण ॥१००॥ मीनेमीनांशेवासर्पेणहतोऽध्वगस्तत्र ॥ अब्जैर्वाजलमध्येजलधरकोपेनपीडितोमृत्युः ॥ १ ॥ पूर्वोक्तमृत्युभागेशशिनिविलग्नेव्ययेथवानिधने ॥ जलयंत्रकारणैर्वानिधनंनृणांसमुद्दिष्टम् ॥ २ ॥ अर्केंदुलग्नगतौद्विदेहलग्नेषुपाप-

युग्दृष्टौ ॥ कुरुतः प्राणवियोगंजलमध्येनिश्चितंब्रूयात् ॥ ३ ॥
भौमार्कजभवनेऽब्जेपापद्वयमध्यगेनसौम्ययुते ॥ कन्यायांहिमगौवा
ज्वराग्निसन्निपातदोषेण ॥ ४ ॥ सौरेहिमगौव्ययगेरिपुरंध्रगतेसु-
खेवापि ॥ नियतंवारिनिधौस्यान्निधनेशेपापमध्यरंध्रगते ॥ ५॥
चंद्रात्त्रिकोणसंस्थेपापैर्लग्नात्त्रिकोणसंस्थैर्वा ॥ उद्वेजवंधनाद्यैर्नि
धनेभौमेनसंयुक्ते ॥ ६ ॥ राहुध्वजान्वितेर्केयामित्रेरंध्रसंस्थिते
शुक्रे ॥ पापग्रहोदयगश्चेदुद्बंधनेनहन्यतेपुरुषः ॥ ७ ॥ पा-
पद्वयमध्यगतेहोरेशेकेंद्रसंस्थितेयस्य ॥ यःकश्चिन्निधनगतोनिध-
नंस्यादात्मकोपजनितंवा ॥ ८ ॥ अर्कोदयेर्कपुत्रे सुतरंध्र-
कुजेविधौभाग्ये ॥ वृक्षाऽशनिकूटपातैर्योगेजानितस्यनिर्दिशेन्मर-
णम् ॥ ९ ॥ क्षीणेंदौनिधनस्थेसुखगेचशनौचयामित्रे ॥ भौमे
कुटुंबसंस्थेयोगेजातस्यकाष्ठपातेन ॥ १० ॥ क्षीणेंदौदशमं
यातेकुजर्क्षेभास्करेस्थिते ॥ चंद्रेमन्दगृहंयातेविण्मध्येमरणंभवे-
त् ॥ ११ ॥ भौमेसुखेस्तगेवामंदेदशमे १० ष्टमे
ग्रहःकश्चित् ॥ क्षितिपालकोपजनितंनिधनंब्रूयात्स्वशस्त्रदोषाद्वा॥
॥ १२ ॥ सुखदशमस्थैःपापैःक्षीणेंदौरंध्र८षष्ठ६रिःफे १२ वा ॥
मृत्युर्यात्राकालेप्रपतनाच्छस्त्रदोषाद्वा ॥ १३ ॥ अर्ककुजौव्यय-
संस्थौराहुःशशीसप्तमेगुरुःकेंद्रे ॥ जातस्यहिमृतिंविंद्यात्प्रशस्तभू-
मौसुरालयोद्याने ॥ १४ ॥ रंध्रेशेजलभवनेजलसंस्थेशत्रुरिःफभ-
वनेवा ॥ व्यालमृगोरगहेतोर्मृत्युःकूपेथवागृहेभवति ॥ १५ ॥
शिखिसहितेष्टमराशौनिधनेशेकेंद्रगेव्ययेपापे ॥ लग्नेशेहीनबलेम-
रणंदुर्मार्गेरोगजनितंवा ॥ १६ ॥ विषघटिकायांजातोनिधनंक्रूरै-

र्विषाग्निशस्त्रैर्वा॥ निधनेश्वरेविषांशेक्रूरयुतेतन्निमित्तदोषेण॥१७॥ भौमार्कजौयदिपरस्परभागसंस्थौक्षेत्रेथवानिधनभेशयुतेचकेंद्रे ॥ तस्यावसानसमये क्षितिपालकोपाच्छूलादिनायुधशतैर्निधनंसमेति ॥ १८ ॥ लग्नेशशीदिनकरेविबलेष्टमस्थेलग्नाद्व्ययेसुखगतेपिच पापखेटे ॥ जातःस्वहस्तनयनच्युतदेहमृत्युःशस्त्रेणवाविषविषादकृतेनवास्यात् ॥१९॥ लग्नसुतरंध्रभावयोगंस्याद्यत्रतत्रराशौहि ॥ सार्द्धसुतेनमरणंतथैवदारेणसंयुतेतद्वत् ॥ २० ॥ अनुदितनवांशकालेमोहोद्विगुणः शुभग्रहोलग्ने ॥ क्षेत्रोच्चांशकयुक्तेत्रिगुणंनिधने चपापसंयुक्ते ॥ २१ ॥ लग्नेशेजलभांशेजलराशौचंद्रशुक्रयोर्दृष्टे॥ व्ययनिधनेवापापेशवदहनंनास्यजातस्य ॥ २२ ॥ जीवक्षेत्रोदये लग्नेसुरलोकंगमिष्यति ॥ सूर्य्यभौमोदयक्षेत्रेतिर्य्यग्योनिषुसंविशेत् ॥ २३ ॥ मंदराश्युदयेक्षेत्रेक्षीणलोकंगमिष्यति ॥ २४ ॥ अथ मोक्षयोगः ॥अष्टमाधिपतिरेवपुण्यगोजीवशुक्रबुधचंद्रवीक्षितः॥ द्वारिकांप्रतिमृतिंकरोत्यसौतस्यशुद्धमतिसंयुतस्यच ॥ २५ ॥ नैधनेशोयदासौम्यग्रहोभवतियस्यनुः ॥ सौम्यैर्दृष्टंचनिधनंतदातीर्थेसमादिशेत् ॥ २६ ॥ जीवेप्रयागमरणंविधुनाचकाश्यांद्वारावतींबुधसितौयदिधर्मभावे ॥ द्रेष्काणपेप्यथकुजेपरदेशमृत्युंजीवेस्वभूमिमरणंप्रवदंतिसंतः ॥ २७ ॥ धर्मस्थितःकुजोमृत्युंमार्गेकुर्य्याच्चचंद्रजः ॥ शिवालयेमृतिंदत्तेतीर्थेधर्मेश्वरेतथा ॥२८॥ चंद्रोयदानवमभावपतिर्मूर्तिस्थः सन्मृत्युरेवहरितीर्थसमाश्रमेस्यात् ॥एवं भृगुर्भवतिमुक्तिपुरीस्थितस्यजीवेस्वगेहमरणंविधिनाशुभेन ॥२९॥ पुण्यभावपतिरेवमृत्युगोयस्यजन्मनिभवेच्छुभग्रहः ॥ सौम्यखे

दृसंहितः खलुदृष्टस्तस्यमृत्युरुदितः खलुकाश्याम् ॥ ३० ॥ त्रयोग्रहायदैकत्रजन्मराशिविवर्जिताः ॥ हित्वापापसहस्राणिम्रियतेजाह्नवीजले ॥ ३१ ॥ धर्माधिपः पश्यतिधर्मभावंलग्नाधिपःपश्यतिचेद्विलग्नम् ॥ मृत्युंयदापश्यतिमृत्युनाथस्तदासुतीर्थेनियतंचमृत्युः ॥ ३२ ॥ मृतिपतिः खलुकंटकगोयदा भवतिजन्मनियस्यशुभग्रहः ॥ सचसुतीर्थगतिंलभतेपुमान्भवतिमुक्तिरियंहारिनामतः ॥ ३३ ॥ खलखेटोजन्मकालेद्यूनगोनिधनेश्वरः ॥ यदा तदाभवेन्मार्गेमृत्युस्तस्यनसंशयः ॥ ३४ ॥ मृतिपतिस्तुखलोयदि लग्नगस्तनुपतिश्चविलोकयतेयदा ॥ मृतिकरः सहसास्वगृहेभवेन्निजजनैरहितः खलुदुष्टदः ॥ ३५ ॥ शनिःकर्कटकेतिष्ठेन्मकरेभूमिनंदनः ॥ सचौरत्वमिहप्राप्यच्छेदंप्राप्नोतिवैकरे ॥ ३६ ॥ कुंभे धनुषिमीनेवामिथुनेचैवनित्यशः ॥ यदिपापग्रहाः सर्वेवज्रपातेननश्यति ॥ ३७ ॥ मृत्युंकरोतिदूरंचमृत्युस्थानंगतोऽब्जजः ॥ वृथाशत्रुर्महाग्रीवो मरणंकिल्बिषान्वितम् ॥ ३८ ॥ मृत्युभावशुभैर्दृष्टियुतेवास्वामिसंयुते ॥ सुतीर्थेस्वजनाक्रान्तेस्थिरांशेमृत्युमाप्नुयात् ॥ ३९ ॥ अथमरणभूमिज्ञानं वराहमतेन ॥ होरानवांशकपयुक्तसमानभूमौयोगेक्षणादिभिरतः परिकल्प्यमेतत् ॥ मोहस्तुमृत्युसमयेऽनुदितांशतुल्यःस्वेशेक्षितेद्विगुणतस्त्रिगुणः शुभैश्च ॥ ४० ॥ अयमर्थः ॥ जन्मलग्नेयस्यनवांशस्तद्भूमौमृत्युः। यथा मेषेअजभूमौवृषेबलीवर्दभूमौइत्यादि ॥ अथवा होरानवांशकपेन सांकंयोग्रहोयुनक्तिवातंपश्यति तस्यग्रहयोनिभेदाध्यायेयाभूमिरुक्तातस्यांभूमौवामृत्युर्भवति ॥ यत्रचबहुभूमिसंभवस्तत्रबलाधि-

कस्यभूमिर्वाच्या ॥ ४१ ॥ अथमोहज्ञानम् ॥ लग्नेयावंतोभागा अनुदिताऽवशिष्टास्तेषांयावत्कालस्तावत्कालपर्य्यंतंमोहः ॥ लग्नं यदास्वामिनादृष्टंतदाद्विगुणश्चशुभैरपिदृष्टंतदात्रिगुणः अर्थादेवाशुभ-सौम्यदृष्टेषड्गुणः ॥४२॥ अथशवपरिमाणज्ञानंवराहमतेन ॥ दहनजलविमिश्रैर्भस्मसंक्लेदशोषैर्निधनभवनसंस्थैर्व्यालवर्गैर्विडन्तः। इतिशवपरिणामश्चितनीयंयथोक्तं पृथुविरचितशास्त्राद्गत्यनूकादि-चिंत्यम् ॥ ४३ ॥ अयमर्थः॥मृत्युर्भवनेयदिदहनद्रेष्काणः पापग्रहद्रे-ष्काणः पापग्रहयुक्तस्तदाशवस्याग्निसंस्कारोभवति।यदाजलद्रेष्का-णःसौम्यद्रेष्काणस्तदाजलप्रक्षेपोभवति॥ यदाचमिश्रद्रेष्काणःपाप-युक्तसौम्यद्रेष्काणः सौम्ययुक्तपापद्रेष्काणोवाष्टमेभवति-तदाशवस्य नसंस्कारोनवाजलसंस्कारःकिंतुक्रमेणशुष्यति॥ यदाष्टमसूर्यद्रेष्का-णस्तदांतोविष्ठारूपपरिणामः स्वश्टगालादिभिर्भक्ष्यतेइत्यर्थः । क-र्कस्यप्रथमद्वितीयौ वृश्चिकस्यप्रथमद्वितीयौमीनांत्यश्चेत्येवंपंचसर्प्प-द्रेष्काणाः ॥४४॥ अथगत्यनूकादिज्ञानंवराहः॥गुरुरुडुपतिशु-क्रौसूर्यभौमौयमज्ञौविबुधपितृतिरश्चोनारकीयांश्चकुर्युः ॥ दिनकर-शशिवीर्य्याधिष्ठितत्र्यंशनाथाःप्रवरसमनिकृष्टास्तुंगहृत्स्यादनेके ४५ गतिरथरिपुरंध्रत्र्यंशयोस्तत्स्थितोवागुरुरथारिपुरंध्रच्छिद्रगः स्वो-च्चसंस्थः ॥ -उदयतिभवनेंत्येसौम्यभागेचमोक्षोभवतियदिबलेनप्रो-ज्झितास्तत्रशेषाः ॥ ४६ ॥ अयमर्थः ॥ जन्मनिसूर्य्यचंद्रयोर्म-ध्येयोबली सयस्मिन्द्रेष्काणेभवतितदीशस्ययोलोकस्तस्माल्लोका-दागतइतिवक्तव्यम् ॥ तद्यथा ॥ द्रेष्काणेशोयदिगुरुस्तदादेव-लोकादागतः ॥ यदिचन्द्रशुक्रयोरन्यतरस्तदापितृलोकादागतः॥

रविभौमयोरन्यतरस्तदातिर्यग्लोकादागतः ॥ यदिशनिबुधयोरन्यतरस्तदानरकादागतः॥इतिवक्तव्यम् ॥ सचेद्रेष्काणोयदिउच्चेतत्रात्युत्तमलोकादागतःनीचस्तदाऽधमलोकात्।अंतरेणसमाल्लोकादागतःएतदनूकेप्राग्जन्मनिज्ञेयं।गतिरिति।तथाच ॥ षष्ठसप्ताष्टमस्थानानामन्यतरस्थानेकश्चिद्ग्रहोभवति तदातल्लोकगमनं यदिचैतानिस्थानानिशून्यानिभवंति तत्तथाषष्ठाष्टमस्थानेयोद्रेष्काणोभवतितयोर्यौस्वामिनौतयोर्योबलवांस्तदीयलोकगमनम् ॥ अथमोक्षयोगाः ॥ गुरुरथेति । जन्मनिगुरुर्यद्युच्चस्थःसतुलग्नात् षष्ठकेंद्राष्टमान्यतरस्थानेभवतितदामोक्षोभवति इत्येकोयोगः॥ अन्येसर्वेग्रहानिर्बला भवंतितदामोक्षः ॥ इतिद्वितीयः ॥ ४७ ॥ २ ॥ अथमोक्षजन्मलग्नान्मरणलग्नाच्चज्ञेयः तथाचलघुजातके ॥ षष्ठाष्टमकंटकगोगुरुरुच्चैर्वावसानलग्नेवा ॥ शेषैरबलैर्जन्मनिमरणेमोक्षगतिमाहुः ॥ ४८ ॥ अत्रायंविशेषविचारः ॥ लग्नाद्द्वादशोद्रेष्काणोमरणकारणतयानिर्दिष्टस्तदीशोबलीयदिरिपुरंध्रस्थोकेंद्रगोवाभवतितदातीर्थेमरणम् ॥ संहितास्कंधेन ग्रहभक्तिप्रकरणेदेशानिरूपितास्तेषुयानितीर्थानितेषुमृतिर्वक्तव्या ॥ तदुक्तंहोराचिंतामणौ ॥ नस्युर्नैर्याणकायोगाःप्रोक्ता मृत्युद्रकाणजाः ॥ बलिनः केंद्रषष्ठाष्टद्यूनेस्युर्मोक्षहेतवः ॥ ४९ ॥ रविर्मोक्षदृकाणेशोरेवापूर्वतटेमृतिः ॥ शोणस्ययमुनायाश्चकूले दक्षिणकेमृतिः ॥ ५० ॥ चंद्रोमोक्षदृकाणेशस्तदाशोणोत्तरेतटे ॥ अयोध्यायांसरस्वत्यांवेत्रवत्यामथापिवा ॥ ५१ ॥ भौमेचैवतु कृष्णायांगोदावर्यांचनर्मदाम् ॥ तीर्थेमृतिर्भवेत् फल्गुतीर्थेमंदा-

किनीतटे ॥ ५२ ॥ बुधश्चैवदृकाणेशोप्राप्यगंगांचकौशिकीम् ॥ गंभीरांचापिवासिष्ठींसिंधौवालोहितेमृतिः ॥ ५३ ॥ जीवेमोक्षदृकाणेशेसिंधुंवामथुरांपुरीम् ॥ विपाशांप्राप्यमरणंनिश्चितंयदिमानवः ॥ ५४ ॥ काशीमैरावतींकांचींगंगांरामपुरींतथा ॥ गुरुःकेंद्रगतः स्वोच्चेप्राप्यमृत्युंप्रयच्छति ॥ ५५ ॥ शुक्रःशतद्रुंसंप्राप्यचंद्रभागामिरावतीम् ॥ गंगांचदेविकांवापिमृत्युंयच्छतितुंगगः ॥ ५६ ॥ शनौप्रभासेमृत्युःस्यात्कुरुक्षेत्रेवटेश्वरे ॥ सरस्वत्यांदृषद्वत्यामित्याहुःपूर्वसूरयः ॥ ५७ ॥ अथाष्टमस्थानांरव्यादीनामवधिवर्षाणि ॥ हिल्लाजः ॥ छिद्रे ८ स्त्रियामृतिमिनोहिमगुःषडब्देनाशंकुजोविपदिस्वक्षियमे २२ थसौम्यः ॥ मन्वब्दके १४ धनलयंगुरुरिंदुरामे ३१ रोगंसितोभ्र १०समकेस्वपराक्रमंच ॥ ५८ ॥ अथाष्टमभावेराशिफलम् ॥ मेषेष्टमस्थेनिधनंनराणांभवेद्विदेशाद्धजनाश्रितानाम् ॥ कथासुस्मृत्याथहरेः स्थितानांमहाधमानामपिदुष्कृतानाम् ॥ ५९ ॥ वृषेष्टमस्थेचभवेन्नराणांमृत्युर्गृहेश्लेष्मकृताद्विकारात् ॥ हयासनाद्वाथचतुष्पदाद्वारात्रौतथाहृष्टजनादृतानाम् ॥ ६० ॥ तृतीयराशौहिभवेन्नराणांमृतिःस्थितेमृत्युरनिष्टसंगात् ॥ स्त्रेहोद्भवोवासरसंभवोवागुदप्रकोपादथवाप्रमेहात् ॥ ६१ ॥ कर्केष्टमस्थेचजलोपसंगात्कीटात्तथाचैवविभीषणाद्वा ॥ भवेद्विनाशोऽपरहस्ततोवाविदेशसंस्थस्यनरस्यनूनम् ॥ ६२ ॥ सिंहेष्टमस्थेचसरीसृपाचभवेद्विनाशोमनुजस्यसम्यक् ॥ व्यालोद्भवोवापिवनाश्रितस्यचौरोद्भवोवाथचतुष्पदोत्थः ॥ ६३ ॥ कन्यायदाचाष्टमगा विलग्नात् तदास्ववित्तान्मनुजस्यविंद्यात् ॥ स्त्रीणांहिहिंसाद्विष-

प्राशनाद्वाक्षीणांकृतेचस्वगृहाश्रितस्य ॥ ६४ ॥ तुलाधरेचाष्टमगेचमृत्युर्भवेन्नराणांद्विपदोत्थएव ॥ निशागमेसंस्थकृतोपवासाद्विलंबिकोत्थोप्यथवाप्रपातात् ॥ ६५ ॥ स्थानेष्टमस्थेष्टमराशिसंगेनृणांविनाशोवदनोद्भवेन ॥ रोगेणवाकीटसमुद्भवैश्चस्थानेस्यसंस्थश्चविषोद्भवोवा ॥ ६६ ॥ चापेष्टमस्थेप्रभवेन्नराणांमृत्युः स्वसंस्थासारिताश्रितानाम् ॥ गुल्मोद्भवेनाभिगदेनवापिचतुष्पदोत्थस्यविसंस्थलस्य ॥ ६७ ॥ मकरस्तुएवम् ॥ घटेष्टमस्थेतुभवेद्विनाशोवैश्वानरः प्रायगतस्यजंतोः॥ नानाद्रवैर्वाद्रवजैर्विकारैर्मृत्युर्भवेद्ग्रामस्थितस्यनूनम् ॥ ६८ ॥ मीनेष्टमस्थेप्रभवेच्चमृत्युर्नृणामतीसारकृतात्सकष्टात् ॥ पित्तज्वराद्वासलिलामयाद्वारक्तप्रकोपादथवाचशस्त्रात् ॥ ६९ ॥ अथाष्टमेशस्यभावफलंवृद्धयवनः ॥ अष्टमपेलग्नगतेबहुविघ्नैर्दीर्घरोगकृत्स्तेनः ॥ नेष्टानुवादनिरतोलक्ष्मींलभतेनृपतिसंगेन ॥ ७० ॥ निधनपतौधनभवने धनलाभोनैवस्यान्नरश्चौरः ॥ क्रूरे सौम्येतिशुभमतेक्षितिपालतोमरणम् ॥ ७१ ॥ निधनपतिर्यदिसहजेबंधुविरोधात्सुहृद्विरोधीच॥व्यंगोदुर्बलठोलः सोदररहितोभवत्यथवा ॥ ॥ ७२ ॥ निधनेशेतुर्यगतेपितृतोऽन्यायाल्लभेतलक्ष्मीम् ॥ पितृपुत्रयोश्चयुद्धंपिताचरोगान्वितोभवति ॥ ७३ ॥ छिद्रपतौलयस्थेसुतविरहितः शुभेससुतः ॥ जातोपिनैवजीवतिजीवत्यपिकितवकर्मरतः ॥ ७४ ॥ छिद्रेशेरिपुसंस्थितेदिनकरेभूभृद्विरोधीगुरौ स्वांगेसीदतिदृष्टिरोगकलितः शुक्रेसरोगीविधौ ॥ भौमेसकोपयुतोबुधेहिभयभृद्दुःखाभिभूतः शनौ कष्टंराहुबुधेहितत्रश-

शभृत्सौम्येक्षितेनैवकिम् ॥ ७५ ॥ मृत्युपतौसप्तमगेदुष्टकुलस्त्रीप्रि-
योगुदव्याधिः ॥ क्रूरेभार्याद्वेषीकलत्रदोषान्मृतिंलभते ॥ ७६ ॥
निधनपतौनिधनगतेव्यवसायीव्याधिवर्जितोनीरुक् ॥ कितवक-
लाकुलितवपुः कितवकुलेजायतेविदितः ॥ ७७ ॥ मृतिनाथेन-
वमस्थेनिःसंगोजीवघातकः पापी ॥ निर्बंधुर्निःस्नेहीपूज्येविमुखो
मुखेव्यंगः ॥ ७८ ॥ कर्मस्थेनिधनेशेनृपकर्मानीचकर्मनिरतश्च ॥
अलसः क्रूरोऽन्यभवस्तनयवान्नजीवतिमाता ॥ ७९ ॥ लाभस्थे
चाष्टमपेबाल्येदुःखीसुखीभवेत्पश्चात् ॥ दीर्घायुः सौम्यखगेपापेऽ-
ल्पायुर्नरोभवति ॥ ८० ॥ व्ययभवनेष्टमपेक्रूरोवातस्करोनिकृष्ट-
श्च ॥ अनात्मगतिर्व्यंगवपुर्मृतस्तुकाकादिभिर्भक्ष्यः ॥ ८१ ॥ इत्य-
ष्टमभावविचारः ॥८॥ अथनवमभावः ॥ तत्रकिंविचार्यमि-
त्युक्तंजातकाभरणे ॥ धर्मक्रियायां हिमनःप्रवृत्तिर्भाग्योपवर्ती
विमलंच शीलम् ॥ तीर्थप्रयाणंप्रणयः पुराणैः पुण्यालयेसर्वमिदंप्र-
दिष्टम् ॥ १ ॥ विहायसर्वंगणकैर्विचिंत्यंभाग्यालयंकेवलमत्रय-
त्नात् ॥ आयुश्चमाताचपिताचवंशोभाग्यान्वितेनैवभवंतिधन्याः॥
॥ २ ॥ कल्याणकर्मा ॥ लग्नान्निशाकराद्वावन्नवमंगृहंतद्भवेद्भा-
ग्यम् ॥ अनयोर्योबलयुक्तोभाग्यर्क्षंचिंतयेत्तस्मात् ॥ ३ ॥ भा-
ग्यर्क्षपतिःकस्मिन्कोवाभाग्याश्रितोविहगः ॥ बलवान्मंदबलोवा
तस्याधिपतिस्तुकारकोज्ञेयः ॥ ४ ॥ अथविचारः ॥ भाग्येस्व-
भोच्चगखगेशुभभाग्य इज्येवास्वेशदृग्युजिनिजेफलदंपरेन्यैः ॥
केंद्रस्थजीवतनुजन्मभपैःसुभाग्योधीत्र्यंकलग्न ५ । ३ । ९ । १
गखगैर्यदिभाग्यदृग्वा ॥ ५ ॥ चंद्राद्द्यूना ७ ष्टरिपुद६गैःसुग्रहैः

स्सुभाग्यश्चंद्रेस्वकेष्टलवगेऽहनिजीवदृष्टे ॥ लक्ष्मीयुतोनिशितथा चसितेक्षितेऽथकेंद्रादिगेज्यइनतोऽधममध्यसंज्ञः ॥ ६ ॥ नीचारिभांशगखलाः शुभदृष्टिहीना भाग्येस्थितामलिनदुःखितजन्मकुर्युः॥भाग्येखलाः स्वगृहगाः शुभदृष्टियुक्ताः ख्यातं नरं विपुलसौख्यगुणैः समेतम् ॥ ७ ॥ लग्नपेभ्यंतराराशौजन्मकालेगतेसति ॥ भाग्यपेचविशेषेणमहाभाग्योदयोभवेत् ॥ ८ ॥ एकेनमध्यभाग्यः स्यादभावेहीनभाग्यकः ॥ लग्नात्सप्तमभंयावद्राशयोऽभ्यंतराः स्मृताः ॥ ९ ॥ नवमभावपतीरिपुमध्यगोनवमभंरिपुदृष्टयुतंतथा ॥ यदितदापरधर्मरतोनरः शुभखगैरथधर्मरतः स्वके ॥ १० ॥ नीचस्थोवाशत्रुगेहेगतश्चेद्भाग्यस्वामीरिफरंध्रारिगोवा ॥ पापैःखेटैःसंयुतोवाथदृष्टोभाग्यैर्हीनःस्याद्दरिद्रीसदैव ॥ ११ ॥ इतिभाग्याभाग्यविचारः ॥ अथसामान्यविचारेणभाग्यस्थसूर्यादीनां फलं गर्गमतेन ॥ तत्रादौरवेः । हंतिभाग्यंचपुण्यंच सूर्य्यःपुण्यगतोनृणाम् ॥ तुंगस्वर्क्षगृहंजातपुष्कलंधर्ममादिशेत् ॥ १२ ॥ चंद्र० ॥ मध्यभाग्यंभवेद्धर्मपितृपक्षपरायणः ॥ धर्मेपूर्णनिशानाथेक्षीणे सर्वंविनाशयेत् ॥ १३ ॥ भौम० ॥ कुजेरक्तपटानांहिभवेत्पाशुपतिर्वृतिः ॥ भाग्यहीनश्चसततंनरः पुण्यगृहंगते ॥ १४ ॥ बुध० ॥ मंदभाग्योबुधेपापेनरोबुद्धिमतानुगः ॥ भाग्यवान् धार्मिकोवापिशुभेसौम्येतुधर्मगे ॥ १५ ॥ गुरुफ० ॥ विविधतीर्थकरः सुकलेवरः सुरगुरौनवमेसुखवान्गुणी ॥ त्रिदशयज्ञकरः परमार्थवित्प्रचुरकीर्तिकरः कुलवर्द्धनः ॥ १६ ॥ भृगुफ०॥भवतिभाग्यनिधिर्द्धनवल्लभोबहुगुणीद्विजभक्तिपरायणः॥

निजभुजार्जितभाग्यमहोत्सवोभवतिधर्मगतेभृगुनंदने ॥ १७॥ शनि- फ० ॥ दंभप्रधानसुकृतः पितृदैवतवञ्चकः ॥क्षीणभाग्यः सुधर्मोच स्यान्नरोनवमेशनौ ॥ १८॥ स्वोच्चेस्वभेशनौभाग्येवैकुंठादागतोन- रः॥राज्यंकृत्वास्वधर्मेणपुनर्वैकुंठमेष्यति ॥ १९॥ राहुफलम् ॥ नीचधर्मानुरक्तःस्यात्सत्यशौचविवर्जितः ॥भाग्यहीनश्चमंदश्चधर्मगे सिंहिकासुते ॥२०॥ केतु० ॥ नवमस्थानगःकेतुः बालत्वेपितृ- कष्टकृत् ॥ भाग्यहीनोविधर्मश्चम्लेच्छाद्भाग्योदयोभवेत् ॥ २१॥ अथकस्मिन्वयसिभाग्योदयस्तमाह॥भाग्याधिपश्चेद्यदिकेंद्रसं- स्थश्चाद्येवयस्येवसुखोदयःस्यात् ॥ त्रिकोणगः स्वोच्चगतोथवाचे- न्मध्येवयस्यस्यफलप्रदःस्यात्॥ २२॥ भाग्याधिनाथःस्वगृहेथमि- त्रगृहेथवास्याद्वयसोंत्यभागे ॥ भाग्योदयंतस्यवदंतितज्ज्ञाः शुभग्र- हैर्द्रैश्चयुतेक्षितंच ॥ २३ ॥ अथायुःपर्य्यंतसुखयोगः ॥ नवम- भावपतिर्यदिकेंद्रगोनवमपंचमगश्च यदाभवेत् ॥ प्रसवलग्नपतिर्य- दितुंगगः सुखसमृद्धियुतोमरणांतकः ॥ २४ ॥ नवमभावगतः स्वगृहेशनिर्भवतिचेत्समहेश्वरयज्ञकृत् ॥ अतिशयंकुरुतेजयसंयुतं नृपतिवाहनचिह्नसमन्वितम् ॥ २५॥ क्रूराधर्मेधर्महीनंकर्कशंच- पलंतथा ॥ सौम्याःकुर्वंतिभाग्याढ्यंदयालुंप्रियभाषिणम् ॥२६॥ गुरुर्भाग्येभवेन्मंत्रीमहाभाग्योऽखिलेश्वरः ॥ अबलेपिशुभेखेटेभा- ग्यस्थेधार्मिकोनरः ॥ २७ ॥ पूर्णेंदुयुक्तौरविभूमिपुत्रौ भाग्यस्थि- तौ सत्वसमन्वितौच ॥ वंशानुमानात्सचिवंनृपंवा ॥ कुर्वंतिसौ- म्योत्थदृशाविशेषात् ॥२८॥ अथभाग्यस्थितगुरौरव्यादिदृ- ष्टिफलं होराप्रदीपात् ॥ अर्कदृष्टेगुरौभाग्येमंत्रीनृपसमोथवा॥

कांताभोगीशशांकेनभौमेनधनभाग्भवेत् ॥ २९ ॥ धर्मेबुधेनशुक्रेणगोवाहनधनान्वितः ॥ दृष्टेसौरेणमहिषस्थावरसंयुतवित्तकः ॥ ३० ॥ समृद्धोधार्मिकोजातस्तेजोरूपगुणान्वितः ॥ स्यात्समस्तग्रहैर्दृष्टेभाग्यस्थेसुरमंत्रिणि ॥ ३१ ॥ सर्वेराज्यप्रदाज्ञेयाभाग्यर्क्षस्थाःशुभग्रहाः ॥ धनस्थाम्बरधान्यायुर्धर्मसौभाग्यवृद्धिदाः ॥३२॥ स्वस्वराशौस्थिताःपापग्रहा भाग्यर्क्षसंयुताः॥ शुभैर्दृष्टानरंकुर्य्युः प्रभूतगुणमुत्तमम् ॥ ३३ ॥ स्वोच्चगःखचरोभाग्येकरोतिविभवान्वितम् ॥ सर्वेशुभेक्षिताभूपंकुर्वंतिविजितद्विषम् ॥ ३४ ॥ सकलशुभअसौम्याः स्वोच्चगाभाग्यराशौकनकधनसमृद्धिश्रेयउत्पादयंति ॥ अथशुभविहगेंद्रैस्तत्रदृष्टानरेंद्रविहतरिपुसमूहंदिव्यकायंसुकांतिम् ॥ ३५ ॥ त्रिचतुःपंचखगेंद्रास्तथाचषट्सप्तसंस्थिता भाग्ये ॥ प्रत्ययिनंधनवंतंकुर्य्युर्नृपतिंबुद्धिरहितम् ॥ ३६ ॥ जनयंतिभाग्यसंस्थागुरुभौमविवर्जिताग्रहाःपुरुषम् ॥ व्याधिप्रायमकांतंधनहीनंबंधनार्तमतिहीनम् ॥ ३७ ॥ उदयभास्करे ॥ नवमपेतनुगेगुरुवीक्षितेनृपपतिर्यदिवांबुपतिस्तनौ ॥ नवपतिर्द्वितयेस्वगृहेक्षकः सकलसंपदिनोधरणीपतिः ॥ ३८ ॥ यदिमृतौनवपःकुभगोपिवाद्धुतवियोगिकुवाहपतिर्भवेत् ॥ नवपतौभवगेनृपपूजितस्तदनुकोशवपुःसुखपःस्वभे ॥ ३९ ॥ नवपतिस्तनुगोगजवाहनोथनवभावयुतौगुरुभार्गवौ ॥ नवचतुष्टयपंचमगौतदाप्रवरवाहनदौयदिभाग्यपः॥ निजभगोंबुनि४वासितजीवयुग्बहुधनोध्वजिनीपतिरीश्वरः ॥ ४० ॥ अथभाग्यस्थगुरोरुपरिद्विग्रहयोगाः ॥ स्यातोनृपसमःप्राज्ञोबहुदारसमन्वितः ॥पितृमातृप्रियोजीवेसमृद्धे-

कॆंदुवीक्षिते ॥ ४१ ॥ साहसीवाधनीस्वर्क्षैर्थभूत्परधनान्वितः ॥ बलीकुजार्कसंदृष्टेजीवेभाग्यगृहस्थिते ॥ ४२ ॥ सुभगोललितः कांतोधनस्त्रीभूषणान्वितः ॥ जीवेबुधार्कसंदृष्टेभाग्येकाव्यकलाकृतिः ॥ ४३ ॥ सामज्ञोत्सवशीलोगोमहिषाजखरान्वितः॥साहसीकोगुरौभाग्येविमित्रोर्कसितेक्षिते ॥ ४४ ॥ निधीशः संग्रहीप्राज्ञः ख्यातोभाग्येगुरौगुणी ॥ भवेद्देशगुरुश्रेणीनायकोर्कार्किवीक्षिते ॥ ॥ ४५ ॥ इतिरवियोगाः । अथचंद्रयोगाः ॥ सेनाचार्य्योगुरौ भाग्येचंद्रभौमनिरीक्षिते ॥ सौख्यभाक्सुभगः स्फीतोमंत्रीवाजायतेनरः ॥ ४६ ॥ सगेहशयनान्नादिभोगीतेजोन्वितःक्षमी ॥ मतिमाञ्जायतेभाग्येगुरौचंद्रबुधेक्षिते ॥ ४७ ॥ कर्मयुक्तःशुभःशूरःसमृद्धःपरिवारवान् ॥ चंद्रशुक्रेक्षितेजीवेभाग्यस्थेजायतेनरः ॥ ॥ ४८ ॥ विवादशीलः प्रियवाग्व्ययेशेनेक्षितेगुरौ ॥ चिरजीवी चकुमदोभाग्येचंद्रार्किवीक्षिते ॥४९॥ इतिचंद्रयोगाः ॥ अथ भौमयोगाः ॥ तेजस्वीसत्यवान्सेवारतोनिपुणधीर्नरः ॥ जायतेबुधभौमाभ्यांदृष्टेभाग्यस्थितेगुरौ ॥ ५० ॥ धनी निपुणधीर्विद्वान् सात्यकश्चविदेशगः ॥ भौमभार्गवसंदृष्टेभाग्यस्थेसुरमंत्रिणि ॥५१॥ नीचोविदेशगःप्रेष्यःपिशुनो वंचकोनरः॥ भाग्यराशिगतेजीवेभौममंदनिरीक्षिते ॥ ५२ ॥ अथबुधयोगाः॥ शिल्पवित्सुभगोविद्वान्कृतवेषश्चशीलवान् ॥ गृहीतवचनोजीवे भाग्यस्थेज्ञसितेक्षिते ॥ ५३ ॥ सुभगोललितोविद्वान्वक्ताशूरः सुखीगुरौ ॥ विनीतश्चभवेद्भाग्येबुधमंदनिरीक्षिते ॥ ५४ ॥ अथ भृगु० ॥ राष्ट्राध्यक्षोधनीजीवेभाग्येशुक्रार्किवीक्षिते ॥ पंचदृष्टिफ-

लंजीवेभाग्येनान्यैर्निरीक्षिते ॥ ५५ ॥ समृद्धः पार्थिवोजातस्तेजोरूपगुणान्वितः ॥ स्यात्समस्तग्रहैर्दृष्टेभाग्यस्थेसुरमंत्रिणि ॥ ५६ ॥ अथभाग्यस्थरव्यादिद्विग्रहयोगाः ॥ भाग्यर्क्षस्थौदिनेशेंदूकुरुतोऽल्पायुषंनरम् ॥ नेत्ररोगिणमाद्यंचसुभगंकलहप्रियम् ॥ ५७ ॥ सवक्रोभास्करोभाग्येदुःखितंकलहप्रियम् ॥ शूरंप्रचंडंनिपुणंकरोति नृपवल्लभम् ॥ ५८ ॥ सबुधोभास्करोभाग्येनिपुणंबहुविद्विषम् ॥ दुःखान्वितंनरंचैवनानारोगसमन्वितम् ॥ ५९ ॥ सजीवोभास्करोभाग्येरोगिणंकुरुतेनरम् ॥ अलंकरणसद्वस्त्रगंधमाल्यप्रियंसदा ॥ ६० ॥ सरोगंजनकंनेत्ररोगिणंकलहप्रियम् ॥ सभृगुर्भास्करोभाग्येभाग्ययुक् सुमतिंनरम् ॥ ६१ ॥ शठंधूर्त्तंसरोगंचयुद्धप्रियमनर्थभृत् ॥ निर्धनंकुरुतेभाग्येसूर्य्यार्कीस्वल्पजीविनम् ॥ ६२ ॥ अथचंद्रयोगाः ॥ समृद्धः सव्रणोमातुरनिष्टोभाग्यसंस्थिते ॥ शशांकेविकलांगःस्याद्धरणीसुतसंयुते ॥ ६३ ॥ विसुतोविकलांगःस्याद्बहुवागुत्तमोनरः ॥ शास्त्रज्ञः पंडितोभाग्येसज्ञेचंद्रेप्रजायते ॥ ६४ ॥ सौभाग्यधनसपन्नः सुखीगुणसमन्वितः ॥ उत्तमश्चनरोभाग्येसजीवेहिमरोचिषि ॥ ६५ ॥ मातुः सपत्नीकुरुतेव्याधितः कुलटापतिः ॥ समृद्धःपुरुषोभाग्येस्याच्छुक्रेणविधौनरः ॥ ६६ ॥ नरोतिकष्टकर्मा स्यात्समंदे हिमदीधितौ ॥ भाग्यस्थेजननीवाऽस्याजायतेस्वंकुलच्युता ॥ ६७ ॥ अथभौमयोगाः ॥ प्रधानशास्त्रकुशलः सुभगो भोगसंयुतः ॥ नित्योद्विग्नोनरोभाग्येसज्ञेभौमेप्रजायते ॥ ६८ ॥ सजीवेभूमिजेभाग्येपूज्योधान्यधनान्वितः ॥ व्याधितांगोनरोक्लिष्टो जायतेव्रणसंयुतः ॥ ६९ ॥ परदेशगतः क्रूरः प्रचंडः पर-

देशगः ॥ चंडः प्रधानःस्त्रीद्वेषीभाग्येभौमेसभार्गवे ॥ ७० ॥ नष्टसौख्यधनः पापीदुराचारोन्यदारगः ॥ समंदेभूमिजेभाग्येजायतेस्वजनोज्झितः ॥ ७१ ॥ अथबुधयोगाः ॥ शास्त्रज्ञोन्यायवान्भोक्तासर्वसंपत्समन्वितः ॥ सजीवेज्ञेपुण्यगतेसमर्थोजायतेपुमान् ॥ ७२ ॥ प्राज्ञोगीतप्रियःख्यातःसुवाग्धीरःसुपंडितः ॥ समर्थोजायतेभाग्येसशुक्रेसोमनंदने ॥ ७३ ॥ आढ्यप्रियान्वितोरोगीनिपुणोविषमोनरः ॥ द्वेष्योबहुपथोभाग्येसमंदेज्ञेप्रजायते ॥ ७४ ॥ अथगुरुयोगाः ॥ सजीवेभार्गवेभाग्येभाग्यवान्सुभगोनृपः॥ चिरजीवीसुभाग्यः स्यान्नानाविधसुखान्वितः ॥ ७५ ॥ समंदेवाक्पतौभाग्यराशिस्थेधनरत्नभाक् ॥ पूज्यःस्वजनहीनश्चव्याधितः पुरुषोभवेत् ॥ ७६ ॥ अथभृगुयोगः ॥ यशस्वीभूमिपालश्चव्याधितः शीलसंयुतः ॥ ससौरेभार्गवेभाग्येबहुमित्रश्चजायते ॥ ७७ ॥ इतिभाग्येद्विग्रहयोगाः ॥ अथभाग्येत्रिग्रहयोगाः ॥ सारावल्याम् ॥ सव्रणगात्रंरूक्षंमृतपितृकंभ्रातृवर्जितंकुर्य्युः ॥ रुद्रद्वेष्यंहिंस्रंभाग्येरविचंद्रभूपुत्राः ॥ ७८ ॥ रविचंद्रबुधाभाग्येक्लीबाचारंनरंप्रसूयंते ॥ सर्वजनानांद्वेष्यंविक्रांतंसत्यवचनंच ॥ ७९ ॥ भास्करशशांकगुरवोभाग्येयस्यभवंतिपुरुषस्य ॥ सभवत्युत्तमकुलजोवाहनधनसौख्यसंयुक्तः ॥ ८० ॥ रविचंद्रसितौभाग्येस्त्रीकलहान्नष्टधनसौख्यम् ॥ नृपसम्मतंसुधर्मंजनयंतिनरंप्रियालापम् ॥ ८२ ॥ सूर्य्यनिशाकरसौरा भाग्यर्क्षस्थाः सदानरंकुर्य्युः ॥ प्रखलंखंडाकारंपरऋद्धिलोकविद्विष्टम् ॥ ॥ ८२॥ रविभौमबुधा नवमेकुर्वंतिनरंप्रियालापम् ॥ भुजवीर्य्यं

गतिवृद्धंसममपरंनिष्ठुरंपिशाचार्तम् ॥ ८३ ॥ रविकुजजीवा भाग्येजनयंतिनरंसदोद्युक्तम् ॥ देवपितृपूजनरतंसमृद्धदारंगुणसमृद्धंच ॥ ८४ ॥ कलहप्रियंकुलीनंकन्यानांदूषकंचकर्मचपलम् ॥ दिनकरभौमशुक्रा भाग्येद्वेष्यंनरंकुर्य्युः ॥ ८५ ॥ साहसिकंह्यतिक्षुद्रंलोकद्वेष्यंप्रियानृतंक्रूरम् ॥ पित्रारहितंबाल्येकुर्य्युः सूर्य्यारसूर्य्यजाभाग्ये ॥ ८६ ॥ रविबुधगुरवोभाग्येभाग्यसमेतेधनान्वितंसुभगम् ॥ नृपतिप्रियंसुवेषंजनयंतिनरंसुपुत्रंच ॥ ८७ ॥ रविबुधशुक्रा भाग्येजनयंतिनरंप्रकाशितंशांतम् ॥ रिपुपक्षपरिक्षीणंनृपतिसमंसारवचनंच ॥ ८८ ॥ पापंपरदाररतंप्रवासशीलंचनिपुणपरम् ॥ भृतकंमदनपरंरविबुधसौरानरंभाग्ये ॥ ८९ ॥ भाग्येरविगुरुभृगवोमनुजंकुर्य्युः सुपंडितं कांतम् ॥ बहुविषयंत्वतिवीरंजनयंतिसुमेधसंप्राज्ञम् ॥ ९० ॥ रविसुरगुरुरविजाभाग्येपुरुषस्यजन्मजातस्य ॥ सभवत्युत्तमपुरुषो राजागुणवान्धनसमृद्धश्च ॥ ९१ ॥ कांतिविहीनंमलिनंभूपतिपरिदंडितंमतिहीनम् ॥ जनयंतिनरंभाग्येरविशुक्रशनैश्चरामूर्खम् ॥ ९२ ॥ इतिरव्यादित्रययोगाः १५ ॥ अथचन्द्रादित्रययोगाः ॥ ॥ १० ॥ धनकनकरत्नभाग्यंजनयंतिशशांककुजबुधाः पुरुषम् ॥ प्रथमेवयसिसुतमंभाग्यगृहेसर्वनाशंच ॥ ९३ ॥ चंद्रधरासुतगुरवः कुर्वंतिनरंजितेंद्रियंप्राज्ञम् ॥ गुरुदेवसाधुनिरतंविद्याधरम्भोगिनंसुभगम् ॥ ९४ ॥ सव्रणगात्रमरूपंप्रभाक्षीणंस्त्रीप्रियंयुवतिवश्यम् ॥ युवतिविनाशितसारंशशिकुजभृगुनंदनाभाग्ये ॥ ॥ ९५ ॥ व्यापन्नमातृवंशंक्षुद्रंबाल्येनिराकृतंमात्रा ॥ शशिभूमिजर

विपुत्रा जनयंतिनराधिपंभाग्ये ॥ ९६ ॥ शशिबुधजीवा भाग्ये कुलवंशविवर्द्धनंकुर्य्युः ॥ आचार्य्यंविभवमित्रंनृपतिंबहुसाधनोपेतम् ॥ ९७ ॥ मातृसपत्नीजनकंमुदितंमानान्वितंप्रचुरपितरम् ॥ कुर्वंतिसौम्यशीलंशशिबुधशुक्रानरंभाग्ये ॥ ९८ ॥ शशिबुधसौरानवमेक्लीबाचारंसुविह्वलंमलिनम् ॥ जनयंतिकुत्सितधियं संग्रामपराङ्मुखंदीनम् ॥ ९९ ॥ चंद्रबृहस्पतिशुक्रा भाग्येजातस्ययस्यपुरुषस्य ॥ सभवतिनरपतितुल्योनृपतिकुलेभूपतिश्चैव ॥ ॥ १०० ॥ शशिगुरुसौराभाग्येकुर्वंतिनरंप्रियालापम् ॥ तत्पर वृतंसुशीलंविख्यातंसर्वशास्त्रकुशलंच ॥ १०१ ॥ शशिशुक्रयमा भाग्येकृषिवृत्तिमरिपोषणानुरतम् ॥ कुर्य्युर्मनुजमपापंशूरातिथिगुरुस्वजनभक्तम् ॥ १०२ ॥ इतिचंद्रादित्रययोगाः ॥ १० ॥ अथ भौमादित्रययोगाः ॥ कुजबुधगुरवोभाग्येकुर्वंतिनरंसदासत्यम् ॥ जनवल्लभंसुशीलंह्यतिनिपुणंभाग्यसंयुक्तम् ॥ ३ ॥ कुजबुधशुक्रा भाग्येकुर्वंतिनरंमहोत्साहम् ॥ बहुविषयपतिंख्यातंनरेंद्रसत्कारसत्कृतंचंडम् ॥ ४ ॥ कुजसौम्ययमाभाग्येकुर्य्युःपरतर्ककंवचन गूढम् ॥ मलिनंखंडाकारंपरकार्य्यनाशकंनरंनूनम् ॥ ५ ॥ अथ बुधादित्रययोगाः ॥ बुधगुरुशुक्राभाग्येजनयंतिनरंसुरोपमंसुशीलंच ॥ विख्यातंनरनाथंविद्वांसंधर्मशीलंच ॥ ६ ॥ पुष्टंपुरगुणमुख्यंप्राज्ञंनृपतिसचिवंप्रकाश्यंच ॥ धनिनंविधेयभृत्यंबुधगुरुशनयो नरंभाग्ये ॥ ७ ॥ बुधशुक्रसूर्यपुत्रानवमस्थानस्थिताःप्रकुर्वंति ॥ मेधाविनंप्रकाश्यंसुरुचिरवाक्यंसुखोपेतम् ॥ ८ ॥ अथगुर्वादित्रययोगः ॥ त्रिदशगुरुशुक्रसौराभाग्यग्रहस्थानरंप्रकुर्वंति ॥ प्रचु-

रान्नपानविभवंसुस्थितसुभगंसुरूपंच ॥ ९ ॥ अथरव्यादिचतुर्ग्रहयोगाः ॥ रविचंद्रभौमशशिजा जन्मनिभाग्यर्क्षमाश्रितायस्य ॥ सभवत्युत्तमपुरुषोविदेशगोनित्यसंहृष्टः ॥ १० ॥ सूर्य्यशशिभौमगुरवो भाग्यगृहस्थानरंकुर्य्युः ॥ धनिनंविद्याकुशलंसुभगंनृपसमंचैव ॥ ११ ॥ रविचंद्रभौमशुक्रा मायाचतुरंस्वदारसंतुष्टम् ॥ जनयंतिनरंसुभगंसमस्तजनवल्लभंख्यातम् ॥ १२ ॥ रविचंद्रभौमसौराः पिशुनंमायाविनंसुशीलंच ॥ जनयंतिसदाभाग्येपुरुषंबहुनीचकर्माणम् ॥ १३ ॥ रविशशिबुधसुरगुरवोजन्मनिभाग्यर्क्षमाश्रितायस्य ॥ पुरुषंप्रधानमखिलंनरेंद्रपूज्यंसदाहृष्टम् ॥ १४ ॥ रविचंद्रसौम्यशुक्रानरेश्वरंधार्मिकंसमृद्धंच ॥ जनयंतिभाग्यसंस्थाःपुरुषंप्रियवादिनंशांतम् ॥ १५॥ तरणिशशिसौम्यसौराजन्मनिभाग्यस्थितानरंकुर्य्युः ॥नीचाचारंदीनंपरस्वहरणेसदासक्तम् ॥ १६ ॥ रविचंद्रगुरुसिताश्चेज्जन्मनिभाग्येनरंसुधियम् ॥उत्पादयंतिहृष्टंधर्मज्ञंसात्विकंसदाधीरम् ॥ १७॥ धर्मपरंसुरभक्तंविद्वांसंपरगृहेषुभोक्तारम् ॥ रविचंद्रजीवसौराभाग्यर्क्षस्थानरंकुर्य्युः ॥ १८॥ रविभूसुतबुधजीवाजन्मनिभाग्येनरंप्रकुर्वंति॥देवपितृपूजनपरंवृद्धाचारंगुणोपेतम्॥ १९॥रविभौमसौम्यशुक्रा भाग्येजनयंतिनिष्ठुरंसुभगम् ॥ साहसनिरतंधूर्तंरिपुपक्षमर्दनंचैव ॥ २० ॥ रविभौमचंद्रसौराभाग्येयस्येहजायमानस्य ॥ सभवतिपरवादरतोविनष्टकोषःसदादीनः ॥ २१ ॥ रमिभौमजीवशुक्रा लोकद्वेषंनरंपिपासार्तम् ॥ जनयंतिभाग्यसंस्थाःकन्यानांदूषकंबाल्ये ॥२२॥ रविंभौमजीवसौरा भाग्येसुखवर्जितंसदोद्युक्तम् ॥ जनयंतिनरंच-

डंविक्रमयुक्तंसदासत्वम् ॥ २३ ॥ रविभौमशुक्रशनयोरिपुक्षयाद्विगतशोकम् ॥ कुर्वंतिनरंवृषलंभाग्यंगताशत्रुवर्जितंचैव ॥२४॥ रविबुधजीवसिताःस्युर्भाग्येजन्मनियस्येहपुरुषस्य ॥ सभवत्युत्तमपुरुषोधनकनकैश्वर्य्यसंपन्नः ॥ २५ ॥ रविबुधगुरुरविपुत्राभाग्येजनयंतिमानिनंधन्यम् ॥ पापंपरदाररतंविद्विष्टंनीचकर्माणम् ॥ ॥ २६ ॥ रविबुधसितसौराःस्युर्भाग्यस्थामानिनंसुभगम् ॥ जनयंतिधनसमेतंसत्यरतंलोकविख्यातम् ॥२७॥ रविगुरुसितभानुसुता भाग्यर्क्षेसंस्थिता नरंकुर्य्युः ॥ सत्यव्रतंसुवाक्यंगुरुदेवतातिथिषुभक्तम् ॥२८॥ इतिरव्यादि४ग्रहयोगाः ॥अथचंद्रादि४ग्रहयोगाः॥चंद्रकुजज्ञसुरेज्या जनयंतिनरंपरिच्छदसमृद्धंच ॥ बाल्येमातृवियुक्तंधनान्वितंसंस्थिताभाग्ये ॥ २९ ॥ चंद्रकुजसौम्यशुक्रा भाग्येजनयंतितापसंख्यातम् ॥ वाग्मिप्रणयसमेतंपरलोकपरंमहाप्राज्ञम् ॥ ३० ॥ चंद्रकुजसौम्यसौराः जनयंतिनरंपराङ्मुखंदीनम् ॥ क्षुद्रंमायाचतुरंपरदाररतंस्थिता भाग्ये॥ ३१ ॥ चंद्रकुजजीवशुक्राः नृपवंशकरंप्रधानमतिशूरम् ॥ विद्याधनसुसमृद्धंविख्यातंलोकसंमतंभाग्ये ॥ ३२ ॥ शशिबुधसुरगुरुशुक्रा जन्मनिभाग्यर्क्षमाश्रितायस्य ॥ जनयंतिधर्मसंस्थंनरंकलासुनिपुणंच ॥ ३३ ॥ शशिबुधसितरविपुत्रा जन्मनिभाग्यस्थिता नरंकुर्य्युः ॥ मायाविनंप्रचंडंकिंचिन्नयविशारदंधन्यम् ॥ ३४ ॥ चंद्रगुरुशुक्रसौरा जनयंतिनरंसुमेधसंप्राज्ञम् ॥ धनकनकरत्नसमेतंसुभगंसदासंस्थिता भाग्ये ॥ ३५ ॥ इतिचन्द्रादियोगाः ॥ अथभौमादि ४ ग्रहयोगाः ॥ भौमबुधजीवशुक्राजन्मनिभाग्यस्थिताःप्रकुर्वन्ति॥

मायाविनंप्रचंडंरणेषुपूज्यंनरंधीरम् ।३६॥ भौमज्ञसूरिशनयोभाग्य-स्थानोपगाः प्रकुर्वंति॥ रिपुपक्षपरिक्षीणंरणेप्रचंडंसुधीरंच ॥३७॥ भौमज्ञशुक्रशनयोनरंविदेशंधनैः परित्यक्तम्॥ क्षुद्रंदयाविहीनंदुःस-त्वंसंस्थिताभाग्ये ॥ ३८ ॥ अथबुधादि४योगाः ॥ बुधगुरुसित-रविपुत्राजन्मनिभाग्यस्थितानरंकुर्य्युः ॥ परवादविवादरतंपर-दारप्रीतिमन्तंच ॥ ३९ ॥ इतिचतुर्ग्रहयोगाः ॥ त्रिचतुःपंच-खगेंद्रास्तथाचषट्संस्थिता भाग्ये ॥ प्रत्यर्पितधनवित्तंकुर्य्यु-र्नृपतिंचबुधरहिताः ॥ ४० ॥ जनयंतिभाग्यसंस्था गुरुभौम-वर्जिताग्रहाः पुरुषम् ॥ व्याधिप्रायमकांतंधनरहितंबंधनार्त्तमति-हीनम् ॥ ४१ ॥ एवंबहुप्रकारैर्भाग्यगृहेबादरायणादिभिरुक्तम् ॥ गृहयोगैः सद्भवनैर्विचिंत्यबुधोवदेदन्यत् ॥ ४२ ॥ अथभाग्य-स्थरव्यादीनामवधयः॥हिल्लाजः॥तीर्थंचधर्मंकदिनोनवमेथचंद्र-स्तीर्थंनखे २० ऽसृगिहवातभयंचशक्रे १४ ॥ गोक्ष्यब्द२९ मा-तृमृतिमिंदुसुतोथजीवस्तिथ्यब्दके १२ पितृमृतिंचसितोत्रलक्ष्मीम् ॥ ४३ ॥ अथभाग्येराशिफलम् ॥ धर्मस्थितेत्रैवहिमेषराशौच-तुष्पदोत्थंप्रकरोतिधर्मम्॥ तेषांप्रदानेनचपोषणेनदयाविपाके पशु-पालनेन ॥४४ ॥ वृषेचधर्मप्रगतेमनुष्योधर्मंकरोत्येवधनप्रभूतम् ॥ विचित्रदानैर्बहुगोप्रदानैर्विभूषणाच्छादनभोजनैश्च ॥ ४५ ॥ तृ-तीयराशौप्रकरोतिधर्मंधर्मस्थितेधर्मकृतंसदैव ॥ अभ्यागतोत्थ-द्विजभोजनाद्यादीनानुकंपाश्रयमानसेन ॥ ४६ ॥ व्रतोपवासैर्विष-मैर्विचित्रैर्धनंनरैःसंकुरुतेसदैव ॥ धर्माश्रितेचैवचतुर्थराशौतीर्था-श्रयाद्याधनसेवयाच ॥ ४७ ॥ तत्रस्थितेचाथहिसिंहराशौधर्मप-

रेषां प्रकरोतिमर्त्यः ॥ स्वधर्महीनोपिक्रियाभिरेवसुतीर्थरूपंविनयेनहीनम् ॥ ४८ ॥ धर्माश्रितःस्याद्यदिषष्ठराशिः स्त्रीधर्मसेवांकुरुते सदैव ॥ विहीनभक्तिर्बहुजन्मनाचपाखंडमाश्रित्यतथान्यपक्षम् ॥ ॥ ४९ ॥ तुलाधरेधर्मगतेमनुष्योधर्मंकरोत्येवसुसिद्धधर्मः ॥ देवद्विजानांपरितोषणेनजनानुरागेणतथार्भकाणाम् ॥ ५० ॥ चापेतथाधर्मगतेमनुष्यःकरोतिधर्मंद्विजतोषणोत्थम् ॥ स्वात्मप्रियंशास्त्रविनिर्मितंच प्रभूततोषंप्रथितंनृलोके ॥ ५१ ॥ धर्माश्रितेवैमकरेमनुष्योचापोत्थधर्मं कुरुतेप्रतापम् ॥ पश्चाद्विरंत्येवसमांगनाभिःकौल्यंसमाश्रित्यसदास्वपक्षम् ॥ ५२ ॥ कुंभश्चधर्मोपगतश्चधर्मंपुंसांविधत्तेसुरसंघजातम् ॥ वृक्षाश्रयोत्थंचतथाग्निजातं आरामवापीप्रभवंसदैव ॥ ५३ ॥ धर्माश्रितेचैवहिमीनराशौकरोतिधर्मंविविधंनृलोके ॥ सत्रप्रपारामतडागजातंतीर्थार्जनेनोत्थमखैर्विचित्रैः ॥ ५४ ॥ अथभाग्यभावपतिफलम् ॥ जन्मप्रदीपात् ॥ लग्नगतेनवमपतौदेवान्गुरून्मन्यते शूरः ॥ कृपणः क्षितिपतिकर्मास्वल्पग्राहीभवतिमतिमान् ॥ ५५ ॥ नवमाधिपेतुधनगेवृषलोविदितःसुशीलवान्सत्यः ॥ सुकृतीवदनव्यंगः चतुष्पदोत्पन्नपीडातः ॥ ५६ ॥ सहजगतेसुकृतपतौरूपःस्त्रीबंधुवत्सलः पुरुषः ॥ बंधुस्त्रीरक्षणकृद्यदिजीवतिबंधुभिः सहितः ॥ ५७ ॥ सुकृतेशेहिबुकंगतेपितृभक्तः पितृपूजकोविदितः ॥ सुकृतिर्मित्रसुवर्गेउत्तमकर्मणिरतिर्भवति ॥ ५८ ॥ सुकृतेशेसुतसंस्थेसुकृतीगुरुदेवपूजनेनिरतः ॥ वपुषासुंदरमूर्तिःसुकृतिसमेता भवंतिसुताः ॥ ५९ ॥ शत्रुप्रणतपरायणधर्मंकलितंकलाविकलदेहम् ॥ दर्शननिद्रानिरतं सुकृतपतिः षष्ठगः कुरुते ॥ ६० ॥

नवमपतौसप्तमगेसत्यवतीसुवचनासुरूपाच ॥ शीलश्रीयुतदयिता सुकृतयुताजायतेनियतम् ॥ ६१ ॥ दुष्टोजंतुविघातीगृहबंधुविवर्जितः सुकृतरहितः ॥ नवमेशेमृत्युगतेक्रूरः खंडस्तुविज्ञेयः॥६२॥ सुकृतपतिः सुकृतगतः सुबंधुभिः प्रीतिमतुलितंसत्वम् ॥ दातारंदेवगुरुस्वजनकलत्रादिषुचभक्तम् ॥ ६३ ॥ नृपकर्माणंशूरंमातापित्रोश्चपूजकंपुरुषम् ॥ धर्मख्यातंकुरुतेसुकृतपतिर्गगनगृहलीनः ॥ ६४ ॥ दीर्घायुर्धर्मपरोधनेश्वरः स्नेहलोनृपतिलाभी ॥ सुकृतेख्यातः सततंसुकृतपतौलाभभवनस्थे ॥ ६५ ॥ द्वादशगेसुकृतेशेमानीदेशांतरे सुरूपश्च ॥ विद्यावाञ्छुभखेटेक्रूरेखेटेभवेत्कुमतिधूर्तः॥६६॥इतिभाग्यभावविचारः ॥९॥ अथकर्मभावः ॥ तत्रकिंविचार्य्यमित्युक्तंजातकाभरणे ॥ व्यापारमुद्रानृपमानराज्यंवियोजनंचापिपितुस्तथैव ॥ महत्पदाप्तिःखलुसर्वमेतद्राज्याभिधानेभवनेविचार्य्यम् ॥ १ ॥ समुदितंमृषिवर्यैर्मानवानांप्रयत्नादिहहिदशमभावेसर्वकर्मप्रकाशम् ॥ गगनगपरिदृष्टचाराशिखेटस्वभावैः सकलमपिविचिंत्यंसत्त्वयोगात्सुधीभिः ॥ २ ॥ यद्यप्यनेकानिवदंतितज्ज्ञा नानाविधार्थानिफलानिकोष्ठ्यः॥तथापिसंसारसमुद्रमध्येभुंक्तेनरः कर्मफलानिचैव ॥ ३ ॥ अथसामान्यविचारेणकर्मस्थरव्यादीनांफलानि । तत्ररविफलम् ॥ शूरोवाहनधीवीर्य्यविभवात्मजवान्रवौ ॥ प्रसह्यकर्मगेधृष्यः सिद्धारंभश्चजायते ॥ ४ ॥ चंद्रफलम् ॥ सिद्धारंभः शुचिःकर्मपरः शूरोधनान्वितः॥धर्मवांश्चविवादीचविलग्नात्कर्मगेविधौ ॥ ५ ॥ भौमफलम् ॥प्रधानसेवकः शूरः प्रतापीधनपुत्रवान् ॥ कर्मोद्युक्तः कु-

जेधृष्योनरः स्याद्दशमस्थिते ॥ ६ ॥ धीमान्धीरोधर्मचेष्टः धर्मवृत्तियुतः सदा ॥ सात्विकः कर्मगेसौम्येनानालंकारवान्नरः ॥७॥ यशवाहनसौख्यार्थगुणसत्यसमन्वितः ॥ सिद्धारंभोतिचतुरोभव्यकर्मस्थितेगुरौ ॥ ८ ॥ विवादार्जितमानार्थरतिकीर्तिसमन्वितः ॥ मतिमांश्चधनीख्यातोनरः स्यात्कर्मगेसिते ॥ ९ ॥ भवेद्बृन्दपुरग्रामपतिर्वादंडनायकः ॥ प्राज्ञः शूरोधनीमंत्रीनरः कर्मस्थितेशनौ ॥१०॥ सेवार्जितधनः क्रूरः कृपणः पक्षघातकः ॥ जंघारोगीनीचशत्रूराशिस्थेकर्मगेशनौ ॥ ११ ॥ भवेद्बृंदपुरग्रामयतिर्वादंडनायकः ॥ कर्मस्थितेतमेप्राज्ञः शूरोमंत्रीधनान्वितः ॥ १२ ॥ गुदामयोश्लेष्मवृत्तिर्म्लेच्छकर्माचमानवः ॥ परदाररतोनित्यंकेतौदशमगेगृहे ॥ १३ ॥ गर्गमतेन ॥ कर्मस्थानंगृहैर्युक्तंयदिवादृष्टिवर्जितः ॥ तदादारिद्रदोषेणपरिभ्रमतिमेदिनीम् ॥ १४ ॥ अथ विशेषविचारः॥ कल्याणवर्म्मा॥ लग्नाद्दशमेराशौकर्मनृणांयत्प्रकीर्तितंमुनिभिः ॥ राशिग्रहस्वभावैर्ग्रहदृष्टचांतत्प्रवक्ष्यामि ॥ ॥१५॥ होरेंद्वोर्बलयोर्यद्दशमस्तत्स्वभावजंकर्म ॥ तस्याधिपतिविवृद्ध्यावृद्धिर्ज्ञेयाऽन्यथाहानिः ॥ १६ ॥ जांगलमथवारूपंतथोभयंवागृहंनिरीक्षंते ॥ ग्राम्यमरण्यभवंवासौम्यर्क्षेपापभवनेवा ॥ १७॥ द्विपदचतुष्पदरूपंसरीसृपंचतथोभयंरूपम् ॥ यद्रूपंतद्भवनंप्रसवेबुधैर्वदेतयत्नेन। १८ ।तनोःसकाशाद्दशमेशशांकेवृत्तिर्भवेत्तस्यनरस्यनित्यम् ॥ नानाकलाकौशलवाग्विलासैःसर्वोद्यमैःसाहसकर्मभिश्च । १९॥ अथकर्मचिंता ॥लग्नाद्विधोर्बलयुताद्दशमंचकर्मस्वेशाढ्यदृष्टमथवाशुभदृष्टयुक्तम् ॥ तत्सौख्यवृत्तिदमथोखलखेटयुक्तंदृष्टंप्रयासभव-

वृत्तिकरंवदंति ॥ २० ॥ख १० स्थेस्वपेंगविधुतःख १० नवांशपे वास्वोच्चांशकेस्वालवभेसुखवृत्तयःस्युः ॥ नीचारिभागगृहगेऽल्पसुखाल्पपुण्योदासोपचारभृतकानुचराश्वदासाः ॥ २१ ॥ खे १० वितिसितादथशशीचख १० गोथजीवः खे १० स्यान्नृपातविभवोऽखिलकर्मसिद्धिः ॥ कर्मण्यगुःस्वगृहगःकुजशुक्रसौम्यैर्युक्तेक्षितःक्षणधनर्द्धिधनक्षयौस्तः ॥ २२ ॥ अर्थाप्तिरंग १ विधुतो दशमेर्कमुख्यैस्ताताविकाऽरिहितबंधुकलत्रभृत्यैः ॥ तैर्वायलाभधनगैःस्वसुहृद्रिपुभ्यःस्वेष्टारिगैर्बहुविधावलिभिः शुभैस्तैः ॥ २३ ॥ अन्यच्च ॥ सूर्य्यादिभिर्व्योम्निगतैर्विलग्नार्दिदोःस्वपाकेक्रमशःप्रकल्प्याः ॥ अर्थोपलब्धिर्जनकाज्जनन्याःशत्रोर्हिताद्भ्रातृकलत्रपुत्रात् ॥ २४ ॥ रवीन्दुलग्नास्पदसंस्थितांशपतेस्तुवृत्त्यापरिकल्पनीयम् ॥ सदोषधौर्णतृणयुक्सुवर्णैर्दिवामणिर्वृत्तिविधिंविधत्ते ॥ २५ ॥ नक्षत्रनाथोत्रकलत्रतश्चजलाश्रयोत्पन्नकृतिःक्रियादेः ॥ कुजोग्निसात्साहसधातुशस्त्रैः सोमात्मजःकाव्यकलाकलापैः ॥ २६ ॥ जीवोद्विजन्माकरदेवधर्मैः शुक्रोमहिष्यादिकरौप्यरत्नैः ॥ शनैश्चरोनीचतरप्रकारैः कुर्य्यान्नराणांखलुकर्मवृत्तिम् ॥ २७ ॥ अन्यच्च ॥ कर्मस्वामीग्रहोयस्यनवांशेपरिवर्तते ॥ तत्तुल्यकर्मणावृत्तिंनिर्दिशंतिमानीषिणः ॥ २८ ॥ मित्रारिगेहापगतैर्नभोगैस्ततस्ततोर्थः परिकल्पनीयः ॥ तुंगेतंगेस्वगृहेत्रिकोणेस्यादर्थसिद्धिर्निजबाहुवीर्य्यात् ॥ २९ ॥

अथकर्मस्थमेषादिवर्गफलम् ॥ आरामपात्रलिपिभिर्वणिजाचदूतसेवादिवृत्तिकृषिभिर्दशमेऽजवर्गे ॥ गंधान्यादिभिर्गत्रिचतुष्पदाद्यैर्वागोत्रकर्मणिवृषस्यविहंगवृत्तिः ॥ ३० ॥ मुक्तादिविद्रु-

मजलोत्थवणिक्क्रियाभिर्लिप्यादिशंखधवलैर्मिथुनस्यवर्गे ॥ श-स्त्राग्नियोनिपरिपोषणशंखमुक्ताविद्यादिकाव्यकृतिभिःखलुकीटवर्गे ॥ ३१ ॥ अन्नादिकाष्ठविपणेनसुवर्णरौप्यवीर्य्यादिकर्मकृषि-धान्यमयैश्वसिंहे ॥ गंधर्वशिल्पिकरिरामयकर्मकृत्यैःकन्या-गणेसुगणितःशकटैर्नभस्थे ॥३२॥ हैरण्यगोमहिषधान्यवणिग्वि-पण्यमूलैःफलैर्नृपतितोधटजेंबरस्थे ॥ स्त्रीसंगमात्तविभवैःकृषिका-लचौर्य्याच्चैकित्सकान्नृपभृतोदशमाभिवर्गे ॥ ३३ ॥ भैषज्यगोऽ-श्वरसकाष्ठजयंत्रविद्याभूपादिमंत्रगिरिदुर्गभृतश्वचापे ॥ पण्यांगना-वणिजवारिविपंचिवित्ताःश्रेष्ठारसायनरताश्वमृगोत्थवर्गे ॥ ३४ ॥श-स्त्राग्निभेदखननादिकचौर्य्यभारस्कंधोपवृत्तिरतिबाहुबलाद्धटोत्थे ॥ शस्त्राज्जलाद्योनिप्रमोषणाद्दास्वविक्रमादंबरगेझषोत्थे ॥ ३५ ॥ खस्थेखपेखदृक्काणेखलवेभेखभांशगे ॥ चापांशेतुगतंकर्मस्वोच्चां-शर्क्षेखिलंशुभम् ॥ ३६ ॥ शत्रुनीचलवर्क्षस्थेदास्यंश्रेष्ठाधमं पुनः ॥ सदसद्दक्षसौम्योग्रयुग्वातत्स्वदशासुच ॥ ३७ ॥ सूर्य्या-न्यदेशांतरविक्रमेण चंद्रस्सुधर्मस्थितदासभावम् ॥ जीवस्तुभ-द्राक्षतमर्थतोथवाबुधस्तुवाक्योपचयापराधैः ॥ ३८ ॥ नियो-गभुग्धंवनितार्थतोवाशुक्रः कुजःसैन्यबलावकष्टम् ॥ अनाथदुः-खोपहतंचसौरस्तथातथैतेषुचयोविपाकः ॥ ३९ ॥ अथकर्म-भावेद्विग्रहयोगा होराप्रदीपे ॥ सुदेहोनिर्जितारातिर्निर्दयो-बलनायकः ॥ दुःशीलोराजसोलग्नात्सूर्य्येन्द्वोःकर्मसंस्थयोः ॥ ॥ ४० ॥ भृतकोविफलारंभःप्रधाननृपसेवकः ॥ नित्योद्विग्नश्चवि-कलःकर्मण्यादित्यभौमयोः ॥ ४१ ॥ गजाश्वमेदिनीनाथोवि-

ख्यातोजायतेनरः॥ कर्मणिज्ञार्कयोरेवंननीचगृहसंस्थयोः ॥४२॥ निंद्येकुलेपिसंभूतोनृपःस्यादर्कजीवयोः ॥ कर्मस्थयोर्यशः सौख्य-सन्मानविभवान्वितः ॥ ४३ ॥ नरेंद्रचरितेशास्त्रेनिपुणः कर्म-संस्थयोः ॥ सख्यर्थवाहनैर्युक्तोबह्वारंभोर्कशुक्रयोः ॥४४ ॥ न-रोविदेशगःप्रेष्यःस्याद्व्योम्निरविमंदयोः ॥ किंचिद्भूयात्समाप्नो-तिचौरामुष्णंतितत्कचित् ॥ ४५ ॥ अथचंद्रादियोगाः ॥ ग-जाश्वकोशसंपत्तिर्मतियुक्तंशशीनरम् ॥ कुरुतेभौमसंयुक्तोगगने विक्रमान्वितम् ॥ ४६ ॥ ख्यातोमानीधनीभूपोमंत्रीव्योम्नींदुसौ-म्ययोः ॥ वयसोंत्येभवेद्दुःखीबंधुस्वजनवर्जितः ॥ ४७ ॥ व्यो-म्नींदुजीवयोर्विद्याद्दातामानार्थकीर्तिमान् ॥ स्फीतोलंबभुजःसर्व-नमस्योजायतेनरः ॥ ४८ ॥ मंत्रीबहुजनःख्यातःक्षमायुक्तोनृपोऽथवा ॥ मानज्ञोविभवैर्युक्तोव्योम्निशीतांशुशुक्रयोः ॥ ४९ ॥ ख्यातोविनिर्जितारातिर्नृपतिःस्याद्धियोषितः ॥ सूर्यपुत्रयुतेचं-द्रेविलग्नात्कर्मणिस्थिते ॥ ५० ॥ अथभौमादियोगाः ॥ शूरः समतितेजस्वीभूमिपाभिमतोनरः ॥ क्रूरःसेनापतिर्धीरःकर्मणिक्षि-तिजज्ञयोः ॥ ५१ ॥ प्रभूतपरिवारार्थःपार्थिवःकीर्तिमान्भवेत् ॥ व्योम्निकर्मसमर्थश्चसंस्थयोर्भौमजीवयोः ॥ ५२ ॥ शस्त्राचार्य्यो माल्यवस्त्रविद्यार्थमतिसंयुतः॥ सितारयोर्भूपमंत्रीस्त्रीतुल्यतनुरंबरे॥ ॥ ५३ ॥ अप्राप्तार्थोनृपात्तेनदंडितश्चापराधतः ॥ कुजसूर्य्यज-योर्व्योम्निभवेद्विभववर्जितः ॥ ५४ ॥ अथबुधादियोगाः ॥ भूपो विनीतोमंत्रीवामानाज्ञाख्यातिसंयुतः।सुताभिचारोदशमेसंस्थयोर्बु-धजीवयोः॥ ५५॥ नीतिवित्सकलारंभःसाधुर्नीचानुगोनृपः ॥ समर्थ-

श्चनृपाढ्यश्चकर्मणींदुजशुक्रयोः ॥ ५६ ॥ असाधुर्मलिनोमूर्खःप्रेष्य-श्चासत्यवाग्भवेत् ॥ परोपकारीमनुजोव्योम्निबोधनमंदयोः ॥ ५७ ॥ अथगुर्वादियोगाः ॥ जीवभार्गवयोर्भूयोमानाज्ञाविभवान्वितः ॥ बहुभृत्यः सुशीलश्चजायतेकर्मसंस्थयोः ॥ ५८ ॥ अथभृगुश-न्योर्योगः ॥ विशिष्टकर्माविख्यातः सर्वद्वंद्वविवर्जितः ॥ नृपमं-त्रीभवेद्वयोम्निसंस्थयोः शुक्रमंदयोः ॥ ५९ ॥ मेषूरणस्थितै-स्त्र्याद्यैरेवमेवनभश्चरैः ॥ द्वियोगकल्पनायुक्त्याफलंवाच्यंमनीषि-भिः ॥ ६० ॥ अथचंद्रात्कर्मचिंता ॥ चंद्रात्कर्मस्थितेसूर्य्येसिद्धारं-भोधनान्वितः ॥ सात्विकोनृपतुल्योवाभवेद्दुष्टजनाश्रयः ॥ ६१ ॥ प्रत्यंतवासीविषमोलुब्धः क्रूरोतिसाहसी ॥ निषादचरितश्चैवभौमे कर्मणिसंस्थिते ॥ ६२ ॥ बहुपुत्रोधर्मविद्वाञ्छिल्पविद्धननायु-कः ॥ प्राज्ञःख्यातोभवेचंद्राचंद्रजेकर्मसंस्थिते ॥ ६३ ॥ शुभा-चारोविशुद्धार्थः समृद्धोधार्मिकोभवेत् ॥ शशांकात्कर्मगेभूपोमं-त्रीवासुरमंत्रिणि ॥ ६४ ॥ सिद्धारंभः सुललितःसुभगोनृपपूजि-तः ॥ वित्तवाञ्जायतेचंद्राद्भार्गवेकर्मसंस्थिते ॥ ६५ ॥ व्या-धितोदुःखितोनिःस्वोनित्योद्विग्नश्चकर्मसु ॥ प्रज्ञाहीनोनरश्चंद्रात्कर्म-भावस्थितेशनौ ॥ ६६ ॥ अथरवियोगाः ॥ सूर्य्याच्चंद्रादयो व्योम्निहिंस्रःक्षुद्रः कुकर्मकृत् ॥ कामरुक्शोकबहुलोभवेद्रक्षण-कर्मकृत् ॥ ६७ ॥ अथचंद्राद्बुद्धिग्रहयोगाः ॥ अलंकरणव-स्त्रादिद्रव्यवाणिज्यकोनरः ॥ शूरस्तीक्ष्णोऽतिहिंस्रश्चविधोर्व्योम्निचंद्र-भौमयोः ॥ ६८ ॥ वस्त्रवाहनभूषादिभोक्तावाणिज्यकर्मकृत् ॥ जलजीवीभवेचंद्रात्कर्मण्यादित्यसौम्ययोः ॥ ६९ ॥ वीरःशूर-

पुमान्ख्यातोनृपमान्यश्चजायते ॥ सिद्धारंभोविधोर्व्योम्निसंस्थयोर-विजीवयोः ॥७०॥ स्त्रीसंश्रयः समृद्धश्चसुभगोनृपवल्लभः ॥ सशु-क्रेभास्करेचंद्रात्कर्मगेस्वजनाश्रितः ॥ ७१ ॥ भृतकः कृपणोदी-नोवधबंधनभाग्भवेत् ॥ प्रवासीचोरमुख्यश्चचंद्राद्वयोम्न्यर्कमंद-योः ॥ ७२ ॥ अथभौमादिद्विग्रहयोगाः ॥ भूभृतोरिर्महाशूरः शशांकाद्भौमसौम्ययोः ॥ भवेच्चसुकलादक्षः सजीवीकर्मसंस्थ-योः ॥ ७३ ॥ मित्रेभ्योलब्धविभवः स्यात्तदाश्रयजीवितः ॥ बलिनोश्चेद्भवेचंद्राद्वयोम्निभूसुतजीवयोः ॥ ७४ ॥ विदेशगोव-णिग्वृत्त्याहेममुक्तादिभिर्युतः ॥ जीवतिस्त्र्याश्रयोचेंदोर्व्योम्निं भूसुतशुक्रयोः ॥ ७५ ॥ साहसीजायतेमर्त्योकर्मयुक्तोऽनृतोर्जि-तः ॥ चंद्रात्कर्मस्थयोर्भौममंदयोर्जायतेनरः ॥ ७६ ॥ अथबु-धादियोगाः ॥ धर्मिष्ठोनायकःख्यातोनृपपूज्योधनान्वितः॥लिपि-विच्छास्त्रसूत्रज्ञश्चंद्राद्व्योम्निबुधेज्ययोः ॥ ७७ ॥ मित्रार्थवनि-तासौख्यभाक्सुधीः सचिवोभवेत् ॥ देशाधीशोथवाचंद्रात्खमध्ये बुधशुक्रयोः ॥ ७८ ॥ मृद्भांडकृन्नरोलेख्यलिपिकृच्चप्रजायते ॥ विद्याचार्य्योतिविख्यातश्चंद्राद्वयोम्निज्ञमंदयोः ॥७९॥अथगुर्वा-दियोगाः ॥ नृपभृत्योद्विजपतिः समर्थःशोकवर्जितः ॥ विद्या-चार्य्योभवेचंद्राद्वयोम्निदेवेज्यशुक्रयोः ॥८०॥ परोपतापकृन्नीच-सिद्धारंभःप्रजायते ॥ प्रसिद्धचेष्टितश्चंद्राद्दशमेजीवमंदयोः॥८१॥ तैलीसुवर्णकारश्चनाट्यंचित्रकरोभवेत् ॥ गंधोपजीविकश्चंद्राद्दशमे जीवशुक्रयोः ॥८२॥ अथचंद्रात्त्रिग्रहयोगाः सारावल्याम् ॥ रविभौमचंद्रपुत्राश्चंद्राद्दशमस्थिता नरंधन्यम् ॥ जनयंत्युत्तम-

पुरुषंनृपतिजनपूज्यंसर्वजनपूज्यम् ॥ ८३ ॥ रविभौमदेवपूज्या दशमस्थानोपगानरंसुभगम् ॥ शत्रूणांजेतारंजनयंतिसमृद्धिसंयुक्तम् ॥ ८४ ॥ चंद्राद्दशमेभास्करभूसुतभृगुनंदनाश्चजनयंति ॥ क्रूरं साहसनिरतंपरस्वापहारिणंचैव।८५॥ रविभूसुतरविपुत्रादशमस्थाः क्रूरकर्मनिरतंच ॥ उत्पादयंतिमनुजंनिगूढपापंदुराचारम् ॥८६॥ रविबुधगुरवोदशमेविद्वांसंरूपसंयुतंसुभगम् ॥ उत्पादयंतिपुरुषंधर्मिष्ठंवल्लभंचैव॥८७॥रविशशिसुतभृगुपुत्रा यशस्विनंधार्मिकंविगतरोषम्॥जनयंत्यपराभूतंसौभाग्यपरिच्छदंसमृद्धंच॥८८॥रीवबुधशनयोदशमेक्रूरंचपलंनरंविशीलंच॥ उत्पादयंतिनियतंशस्त्राग्निपरिक्षतांगंच ॥ ८९ ॥ रविसुरगुरुभृगुपुत्रा दशमस्थानोपगानरंकुर्य्युः ॥ सुभगंविद्यांसधनंधर्मरतिंभोगभागिनंनित्यम् ॥ ९० ॥ रविसुरगुरुरविपुत्रादशमस्थानोपगा नरंकुर्य्युः॥रोमान्वितमतिचपलंसमस्तजनविप्रयुक्तंच ॥ ९१ ॥ अथभौमादियोगाः ॥ भौमेंदुजसुरपूज्या धर्मिष्ठान्बहुकुटुंबपरिवारान् ॥ जनयंतिदशमसंस्था विविधधनभाजनान्पुरुषान् ॥ ९२ ॥ शोभनशिल्पाभिरतान् मालाकारान्सुवर्णकारांश्च ॥ कुर्य्युःकुजबुधशुक्रा दशमस्थाःसर्वलोकहानिरतान् ॥ ९३ ॥ भौमबुधसूर्यपुत्राजनयंतिनरान्धर्मशीलांश्च॥ निद्रानिरतान्सरलान्दशमस्थानोपगास्तुसत्यांश्च ॥ ९४ ॥ भौमसुरमंत्रिशुक्राश्चंद्राद्दशमाश्रिता नरंकुर्य्युः ॥ धनसंयुक्तं सनयंदेवद्विजजनानुरक्तंच ॥ ९५ ॥ भौमभृगुभानुपुत्रा दशमस्थानोपगा नरंमलिनम् ॥ उत्पादयंत्यसत्यंवधबंधविवादनिरतंच ॥ ९६ ॥ अथबुधादियोगाः॥ बुधगुरुशुक्रादशमेजनयंतिसदैष-

संयुतंपुरुषम् ॥ धनिनमतिसौख्ययुक्तंधर्मज्ञंसात्विकंधीरम् ॥९७॥ बुधदेवपूज्यशनयोजनयंतिनरंसदादशमसंस्थाः ॥ धनधर्मयुक्तप्रज्ञंदयान्वितंसत्यनिष्ठंच ॥ ९८ ॥ अथगुर्वादियोगाः ॥ सुरगुरुभार्गवशनयोजनयंतिनरंत्वनेककर्मरतम् ॥ दशमेविज्ञानयुतंसुजनंपरदेशनिरतंच ॥ ९९ ॥ अथचंद्राद्दशमस्थैस्तुर्य्यग्रहैःफलम् ॥ प्रदीप्तांगोनरः क्रूरोदातासकलकर्मकृत् ॥ रविभौमज्ञदेवेज्यैश्चंद्राद्दशमगैर्भवेत् ॥ १०० ॥ मालाकारोलेख्यचित्ररतःकर्मरतस्तथा ॥ चंद्राद्दशमगैः सूर्य्यभौमचंद्रजभार्गवैः ॥१॥ चंद्राद्दशमगैः सूर्य्यभौमचंद्रात्मजार्किभिः ॥ जायतेपुरुषोनीचरतोधर्मसमन्वितः ॥२॥ कृषिकृद्धर्मशीलश्चबहुधान्यधनान्वितः ॥ सदोद्यमीभवेच्चंद्रात्सूर्य्यारेज्यसितैःखगैः ॥ ३ ॥ परस्वहरणेसक्तः क्रूरकर्मरतोभवेत् ॥ अर्कारजीवशनिभिश्चन्द्राद्दशमसंस्थितैः ॥ ४ ॥ शक्ताचारोप्रकाश्यश्चजायतेनिपुणोनरः ॥ चंद्राद्दशमगैः सूर्य्यभौमास्फुजिदिनात्मजैः ॥ ५ ॥ वाचकोमधुरोमल्लवृत्तिकर्षणकृन्नरः ॥ चंद्राद्दशमगैः सूर्य्यबुधेज्यभृगुजैर्भवेत् ॥ ६ ॥ परेषांवचनासक्तोमेधावीक्रूरचेष्टितः ॥ रविसौम्येज्यरविजैश्चंद्राद्दशसंस्थितैः ॥ ७ ॥ कर्षणानुरतंदक्षंवाग्मिनंकठिनंनरम् ॥ चंद्राद्दशमगैः सूर्य्यबुधभार्गवभानुजैः ॥ ८ ॥ रविजीवास्फुजिन्मंदैश्चंद्रान्मेषूरणस्थितैः ॥ प्रवाससक्तोमनुजोभवेद्विविधचेष्टितः ॥ ९ ॥ अथभौमादयः ४ ॥ प्रधृष्यसमरेश्वरः पंडितोनिपुणोभवेत् ॥ चंद्रात्कर्मस्थितैर्भौमबुधदेवेज्यभार्गवैः ॥ १० ॥ वैरिहाकठिनः शूरःसदोद्युक्तश्चसंगरे ॥ चंद्रात्कर्मस्थितैर्भौमबुधदेवेज्यभानुजैः ॥ १११ ॥ सुविद्वान्बहुलःशूरो

विशालांगोनरोभवेत् ॥ चंद्रात्कर्मस्थितैर्भौमबुधशुक्रशनैश्चरैः ॥ १२ ॥ धीरोधनसमृद्धश्चपुमान्बहुकुटुंबभाक् ॥ इंदोर्दशमगैर्भौमजीवशुक्रशनैश्चरैः ॥ १३ ॥ मेधावीलोकविदितः शांतात्मापुरुषोभवेत् ॥ कर्मसंस्थैर्विधोः सौम्यजीवभार्गवभानुजैः ॥ १४ ॥ इमेयोगाः प्रशस्यंतेसौम्यग्रहनिरीक्षिताः ॥ अभद्राःप्रायशः प्रोक्ताःपापग्रहनिरीक्षिताः ॥ १५ ॥ वैद्याःपुरोहिताः शास्त्रगणकावंचकानराः ॥ जायंतेकर्मगैः पापैःसौम्यग्रहनिरीक्षितैः ॥ ॥ १६ ॥ अवधिवर्षाणिहिल्लाजेनोक्तानि ॥ एकोनविंशतिवियोगमिनोंबरस्थ १० श्चंद्रस्त्रिवेद ४३ धनकृत्क्षितिजोभ २७ वर्षे ॥ शस्त्राद्भयंविदिहिगोकु १९ शरद्धनंचजीवोर्के १२ के धनमथोभृगुजोत्रसौख्यम् ॥ १७ ॥ इत्यवधिः ॥ अथकर्मभावेराशिफलम् ॥ कर्मस्थितेसुख्यतमेचराशौकरोतिकामप्रवरंसुहृष्टम् ॥ पैशुन्यरूपंविनयातिरिक्तंसुनिंदितंसाधुजनस्यलोके ॥ १८ ॥ वृषेंबरस्थेप्रकरोतिकर्मव्ययात्मकंसाधुजनानुतापम् ॥ द्विजेंद्रदेवातिथिभिर्विधिज्ञः कार्य्यात्मकंप्रीतिकरंसतांच ॥ १९ ॥ युग्मेंबरस्थेप्रकरोतिमर्त्यः कर्मप्रधानंगुरुभिः प्रदिष्टम् ॥ कीर्त्यन्वितंप्रीतिकरंद्विजानांप्रभासमेतंकृषिजंसदैव ॥ २० ॥ कर्केंबरस्थेप्रकरोतिमर्त्यः कर्मप्रपारामतडागजातम् ॥ विचित्रवापीतरुघट्टजंवाकूपादिनित्यंतमकल्पनं च ॥ २१ ॥ सिंहेंबरस्थे कुरुतेमनुष्योऽधर्मंसपापंविकृतंचकर्म ॥ सपौरुषंप्राणिवधंचोग्र्यं बंधात्मकंनिंदितमेवपुंसाम् ॥ २२ ॥ नभःस्थलस्थेत्वथषष्ठराशौ करोतिकर्मत्वमितोमनुष्यः ॥ स्त्रीराजभाजीजनताविरुद्धंकामा-

त्मकंनिंद्यतमंनृलोके ॥ २३ ॥ तुलाधरेव्योमगतेमनुष्योवाणिज्य-कर्मप्रचुरंकरोति ॥ धर्मात्मकंचापिनयेनयुक्तंसतामभीष्टंपरसंमतं च ॥ २४ ॥ कीटेंबरस्थेप्रकरोतिकर्मपुमान्सुदुष्टंजननिंदितंच ॥ व्यथाकरंदेवगुरुद्विजानांसुनिर्दयंनीतिविवर्जितं च ॥ २५ ॥ चापेंऽबरस्थेप्रकरोतिकर्मसेवात्मकंचौर्य्ययुतंमनुष्यः ॥ परोपकारात्मकभोजनाद्यंनृपात्मकंभूरियशःसमेतम् ॥ २६ ॥ मृगेंबरस्थेचपरोपतापीकर्मप्रधानंकुरुतेमनुष्यः ॥ सुनिर्दयंबंधुवधैः समेतंधर्मेण हीनंखलसंमतं च ॥ २७ ॥ घटेंबरस्थेचकरोतिमर्त्यः कुलोचितंकर्मगुरुप्रदिष्टम् ॥ कीर्त्यात्मकंसुस्थिरमादरेणनानाद्विजाराधनसम्मतं च ॥ २८ ॥ मीनेंबरस्थेप्रकरोतिकर्मप्रायेणमर्त्यः परवंचनोत्थम् ॥ पाखंडधर्मान्वितमिष्टलोभाद्विश्वासहीनंजनताविरुद्धम् ॥ २९ ॥ अथकर्मेशभावफलम् ॥ गगनपतौलग्नगतेमातरिवैरीपितरिभवतिभक्तः ॥ दुःखीगतोपिबाल्येपरपुरुषरताभवतिमाता ॥ ३० ॥ वित्तस्थेगगनपतौमात्रापालितसुतोभवति ॥ लोभीमातरिदुष्टोस्वल्पप्रासःसुतनुकर्मा ॥ ३१ ॥ मातरिस्वजनविरोधीसेवाभिरतोनकर्मणिसमर्थः ॥ मातुलपरिपालितःस्याद्दशमपतौसहजभावगते ॥ ३२ ॥ दशमपेंबुगतेनिरतःसुखेपितरिमातरिपोषणपूजने ॥ सकललोकदशामृतायतेनृपतिसंभवलाभविभूषितः ॥ ३३ ॥ शुभकर्मकोविडंबीनृपलाभीगीतवाद्यनिरतःस्यात् ॥ गगनपतौतनयगतेपालयतिचतत्सुतंमाता ॥ ३४ ॥ अंबरपेरिपुसंस्थेक्रूरेबाल्येतिकष्टभाग्भवति ॥ पुरुषःपश्चादीशःपरपुरुषरतातथामाता ॥ ॥ ३५ ॥ सुतवतीशुभरूपसमन्वितारमणमातरिपालनलालसा ॥

भवतितस्यनरस्यनिरंतरंप्रियतमांबरपेदयितागते॥ ३६ ॥ पुष्कर-पतिरष्टमगःक्रूरश्चौरंमृषान्वितंदुष्टम् ॥ मातरिसंतापकरंजनयतिल-घुजीवितंकितवम् ॥ ३७ ॥ शुभशीलःसद्बंधुःसन्मित्रोदशमपेनव-मलीने ॥ तन्मातापिसुशीलासुकृतवतीसत्यवचनरता ॥ ३८ ॥ गगनपतिर्गगनगतोजनयतिजननीसुखप्रदंपुरुषम् ॥ जननीकुलविपुल-सुखंप्रकटघटीनांपटीयांसम् ॥ ३९ ॥ मानोर्जितभर्तृजननीतथा चसुतरक्षिणीभवेत्सुखिनी ॥ दीर्घायुर्मातृसुखःपुरुषोलाभाश्रितो-बरपे॥ ४० ॥ मात्रोज्झितोनिजवलःशुभकर्मानृपतिकर्मरतिचेताः॥ व्योमपतौव्ययसंस्थेदेशभ्रमणश्चपापखगे॥ ४१ ॥ इत्येवंकर्मभा-वविचारः ॥ १० ॥ अथलाभभावः॥ तत्रकिंविचार्य्यमित्युक्तं जातकाभरणे ॥ गजाश्वहेमांवररत्नजातमांदोलिकामंगलमंडला-नि।लाभःकिलेषामखिलंविचार्य्यमेतत्तुलाभस्यगृहेग्रहज्ञैः॥ १ ॥ हो-राप्रदीपे॥स्वस्वामिसद्ग्रहयुतेक्षितलाभगेहेसद्वर्गकेभवतियस्तुविशे-षलाभः ॥ क्रूरैस्तुदुष्टसहितेनचतत्रलाभस्तद्वर्गगेप्यथचमिश्रफलंच-मिश्रे॥ २ ॥ अन्यत्॥यथाग्रहैः पंचमगैःफलंतथाऽऽयनायकेसद्बलि-निध्रुवंशुभम् ॥ ग्रहैःसमस्तैररिनीचदुर्भगेतरैःश्रियोनंतसुखावहानृ-णाम् ॥ ३ ॥ लाभेकुजार्कयगुयुतेगजवाजिराजिः शय्यासुखं विधु-सुतेभृगुजे नृयानम् ॥ चंद्रेज्ययोः स्ववनितासुखमिष्टविद्याज्ञेब्जे सितेत्रतनयातनयः सुरेज्ये ॥ ४ ॥ सर्वे भावाः सन्तआयेधिवीर्ये ज्ञेस्याच्चंद्रे कूपयज्ञादिसिद्धिः ॥ चेदर्कारौस्त्रीग्रहैर्ज्ञेनचाढ्यो ब्र-ह्वयोजीवंत्यस्य पुत्र्यो नपुत्राः ॥ ५ ॥ राहुःशनिश्च यदिदारुशि-लाहतिस्तत्रांगेखले क्षणवशाच्छुनकादिभीतिः ॥ राहाविहास्थि-

रसुतः स्थविरे यदि स्याज्जीवेच्छनावपिचसन्धिगतेऽप्रजाःस्यात् ॥ ६ ॥ वामलग्नभुजपादजव्यथोलग्नजंघइहवाकुजार्कयोः ॥ चेद्रवावधिबलेस्ववर्गगेभूपचौरपशुभिर्धनाप्तयः ॥ ७ ॥ एवमत्रसकलैर्ग्रहैः फलंस्वस्ववर्गबलयुग्भिरायगैः ॥ स्वस्वभाववशतःपुरोक्तवत्तारतम्यमुदितंपुरातनैः ॥ ८ ॥ आयस्थानेसद्ग्रहैर्दृष्टयुक्तेसत्खेटानां वर्गगेऽनल्पलाभः ॥ स्याच्चेदेकोपिस्वषड्वर्गशुद्धःसर्वैर्दृष्टस्तत्रजातोनृपः स्यात् ॥ ९ ॥ अथसामान्यविचारेणलाभस्थरव्यादीनांफलं गर्गमतेन ॥ धनधान्यहिरण्याद्यैरूपवांश्चकलान्वितः ॥ लाभगेहे रवौज्ञानीविनीतोगीतकोविदः ॥ १० ॥ विख्यातोगुणवान्प्राज्ञोभोगलक्ष्मीसमन्वितः ॥ लाभस्थानगतेचंद्रेगौरोमानववत्सलः ॥ ११ ॥ प्रभूतधनवान्मानीसत्यवादीदृढव्रतः ॥ अश्वाढ्योगीतसंयुक्तोलाभस्थे भूमिनंदने ॥ १२ ॥ विधेयप्रियवाक्शूरोधनधान्यसमन्वितः ॥ लाभे कुजेमृतोमानीहतचित्तोग्नितस्करैः ॥ १३ ॥ स्त्रीवल्लभोतिगुणवान् मतिमान्स्वजनप्रियः ॥ लाभगेसोमतनयेमंदाग्निःसमपद्यते ॥ १४ ॥ नीरोगीदृढवीर्य्यश्चमंत्रवित्परशास्त्रवित् ॥ नातिविद्याल्पतनयःसाधुरेकादशेगुरौ ॥ १५ ॥ स्त्रीरत्नवररत्नाढ्योस्वस्थःशोकविवर्जितः ॥ संपन्नधनभृत्यश्चमर्त्योलाभगतेसिते ॥ १६ ॥ स्थिरसंपत्तिभूलाभीशूरःशिल्पान्वितःसुखी ॥ निर्लाभश्चशनैश्चिस्मृतःप्रथमजीवकः ॥ १७ ॥ यस्यलाभगतोराहुर्लाभोभवतिनिश्चयात् ॥ म्लेच्छादिपतितैर्नूनंगजवाजिरथादिकम् ॥ १८ ॥ अथविशेषविचारेणरव्यादिफलम् ॥ लाभेरवीक्षितयुतेरविवर्गयुक्तेचौर्य्याच्चतुष्पदमुखैर्नृपतेर्हिलाभः ॥ तद्वद्विधौयुवतितोथगजा-

दिविन्नंक्षीणेक्षयोभवतिपूर्णविधौचवृद्धिः ॥ १९ ॥ आयेकुजेक्षितयुतेस्यगणेतुकष्टंवित्तंसुवर्णमणिपावकशस्त्रजातम् ॥ ज्ञोद्वीक्षितेज्यगुणआयगृहेधनंस्याच्छिल्पादिकाव्यलिखनैस्तुरगैः सकांस्यैः ॥ २० ॥ जीवेक्षितेचगुरुवर्गयुतायगेहेयज्ञादिहेमहयनागगवादिमुख्यैः॥ शुक्रेक्षितेथयुतवर्गयुतायभेस्त्रीवेश्यांगनागमजरत्नसरौप्यवित्तम् ॥ २१ ॥ मंदेक्षितेथशनिवर्गयुतेमाहिष्यालोहादिकैः कृषिबलैश्चवरायुधैश्च ॥ २२ ॥ नीचारिभागभगतोत्रफलंनदद्यात्क्रूरिग्रहोद्भवभवेत्फलवीर्य्यवंतः ॥ २३ ॥ अथबालाद्यवस्थासु कुत्रस्थाग्रहाःफलदास्तदाह ॥ उदयात्पंचमभंयावज्जन्मपत्र्यां शुभग्रहाः ॥ वयसिप्रथमेसौख्यंप्रष्ठुर्वाच्यंनवंनवम् ॥ २४ ॥ पंचमान्नवमंयावत्तत्रसंस्थैःशुभग्रहैः॥ वृद्धित्वेपिहिसंप्राप्तेसर्वसौख्यंप्रवर्तते ॥ २५ ॥ नवमाद्व्ययभंयावत्स्थितैः सर्वशुभग्रहैः।।वृद्धत्वेऽपिहिसंप्राप्तेसर्वसौख्यंप्रवर्तते ॥ २६ ॥ यस्मिन्वयसितुंगाश्चमुदिताः स्वगृहेस्थिताः ॥ तत्रराज्यसुखंलक्ष्मीस्तेजोभवतिनिश्चितम् ॥ २७ ॥ यस्मिन्वयसिमंदाश्चेत्क्रूरदृष्टविरस्मिकाः ॥ तत्रहानिंरुजंविंद्यात्पदभ्रंशःखलागमः ॥ २८ ॥ यादृग्वर्णोभवेल्लाभेतद्वर्णसमवस्तुनः।।लाभोभवतितद्वर्णैर्नरैर्मैत्रैर्धनंसुखम्॥ २९॥ भानुभानुजभौमैश्चयुक्तोलाभोयदाभवेत् ॥ तदासंतानजंदुःखंजायतेनात्र संशयः ॥ ३० ॥ चंद्रचांद्रिसमायोगात्कन्यास्यात्सुखदायिनी ॥ जीवशुक्रसमायोगेपुत्रःस्यात्सुखकारकः ॥३१॥ कन्यापत्यंमृतापत्यंपुत्रनाशोऽनपत्यता ॥ ग्रहभावविचारेणवक्तव्यंतत्र निश्चयात् ॥ ३२ ॥ अथराशिफलम् ॥ लाभाश्रितेमुख्यतमेचरा-

शौचतुष्पदेभ्यः प्रकरोतिलाभम् ॥ तथानराणांनृपसेवनाच्चदेशांतराराधनतस्तथैव ॥ ३३ ॥ आयस्थितेवैवृषभेत्रलाभोभवेन्मनुष्यस्ययथेष्टजातः ॥ स्त्रीणांसकाशादथसज्जनानांकृषीवलाद्वापिभवेच्चलाभः ॥ ३४ ॥ तृतीयराशौकुरुतेत्रलाभंलाभाश्रितेस्त्रीदयितासकाशात् ॥ वस्त्रार्थमुख्यासनयानमानात्सदानराणांविविधैः प्रकारैः ॥ ३५ ॥ लाभोभवेल्लाभगतेचराशौसदाचतुर्थेवरभांडजातः ॥ वणिक्कृषिभ्यांजनताप्रभूतः शास्त्रेणवासाधुजनस्यसंगात् ॥ ३६ ॥ लाभाश्रितेपंचममेवलाभोभवेन्मनुष्यस्यनिगर्हणाभिः ॥ नानाजनानांवधबंधनैश्चव्यायामदेशांतरसंश्रयाच ॥ ३७ ॥ कन्यात्मकेलाभगतेमनुष्योप्राप्नोतिलाभंविविधैरुपायैः ॥ शास्त्रागमाभ्यांविनयेनसाधुशुद्धंविवेकेनतथाद्भुतेन ॥ ३८ ॥ तुलाधरेलाभगतेमनुष्यः प्राप्नोतिलाभंवनजैर्विचित्रैः ॥ सुसाधयेद्वाविनयेन नित्यंसुसंस्थितंमुख्यतमंप्रभूतम् ॥ ३९ ॥ लाभाश्रितेचाष्टमकेच राशौप्राप्नोतिलाभंमनुजोतिनित्यम् ॥ छलेनपापेनच वंचनैश्चपरस्य पैशुन्यकृतैर्विचारैः ॥ ४० ॥ लाभाश्रितेचैवधनुर्द्धरेचनृपार्थलाभंभजतेमनुष्यः ॥ सुसेवयाशस्त्रकृतैरुपायैः पुष्पांबरासधनतोर्थलाभः ॥ ४१ ॥ लाभाश्रितेचेन्मकरोर्थलाभोभवेन्नराणांजलपानयोगात् ॥ विदेशवासान्नृपसेवनाद्वा व्ययात्मकंभूरितरंसदैव ॥ ४२ ॥ आयस्थितेकुंभधरेहिराशौ लाभोमनुष्यस्यकुकर्मसंगात् ॥ न्यायेनधर्मेणपराक्रमेण विद्याप्रभावात्सुसमागमेन ॥ ४३ ॥ लाभाश्रितेचांत्यतमेचराशौप्राप्नोतिलाभंविविधंमनुष्यः ॥ मित्रोद्भवं पार्थिवमानजातं विचित्रवाक्यप्रणयेननित्यम् ॥ ४४ ॥ अथलाभे-

शभावफलम् ॥ अल्पायुर्बहुकलितः शूरोदाताजनप्रियःसुभगः ॥ लाभपतौलग्नगतेतृष्णादोषान्मृतिंलभते ॥ ४५ ॥ वित्तगतेलाभपतावुत्पन्नभुगल्पभाजनोल्पायुः ॥ अष्टकपालीचौरःक्रूरेसौम्येच धनकलितः ॥ ४६ ॥ बंधुश्रीपालनकः सुबांधवोबंधुवत्सलस्तु शुभे ॥ लाभेशेसहजगते बंधूनांशत्रुवत्क्षेता ॥४७॥ तूर्य्यस्थेलाभेशेदीर्घायुः पितरिभक्तिभाग्भवति ॥ समवायिकारणरतः सुकर्मतोलाभवान्मनुजः ॥ ४८ ॥ तनयगतोलाभपतिः पितृपुत्रौ स्नेहलौमिथः कुरुते ॥ तुल्यगुणौचपरस्परतृष्णाजीवीचभवतिसुतः ॥ ४९ ॥ लाभाधिपेषष्ठगतेसुवैरंसुदीर्घरोगंचतुरंगसंग्रहम् ॥ मृतिंसमाप्नोतिचचौरहस्तात्क्रूरेचदेशांतरसंगतोनरः ॥ ॥ ५० ॥ सप्तमगेलाभेशेतेजस्वीशीलसंपदःपदवी॥दीर्घायुर्भवति नरस्तथैकदयितापतिर्नियतम् ॥ ५१ ॥ एकादशपेष्टमगेक्रूरेल्पायुः सुदीर्घरोगीवा ॥ जीवनमृतश्चदुःखीरोगीनचसौम्यगगनचरैः ॥ ॥५२॥ एकादशेशेसुकथाश्रयस्थेबहुश्रुतःशास्त्रविशारदःस्यात्॥ धर्मेप्रसिद्धोगुरुदेवभक्तः क्रूरेचबंधुव्रतवर्जितःस्यात्॥५३॥ मातरि भक्तःसुकृतीपितरिद्वेषीसुदीर्घतरजीवी ॥ धनवान्जननीपालननिरतोलाभाधिपेख १० गते॥५४॥ लाभाधिपोलाभगतः करोतिदीर्घायुषंपुष्कलपुत्रयुक्तम् ॥ सकर्मकंरूपयुतंसुशीलंजनप्रमोदप्रवणं पुमांसम् ॥ ५५ ॥ द्वादशगेलाभेशेउत्पन्नभुगस्थिरोभवतिभोगी॥ उत्पातरतोमानीदांतोदुःखीसदापुरुषः ॥ ५६॥ अन्यच्च ॥लाभेशोयदिसमवाप्तिगेहयातोवाग्मीस्यात्पुरुषवरःसुखीसमृद्धः ॥ पाण्डित्यंसकलविधंचसत्कवित्वंसत्प्रीत्यैप्रतिदिनमस्यवृद्धिमेति १ ॥

॥ ५७ ॥ रिःफस्थोयदिसमवाप्तिगेहनाथः संसर्गोयवनजनैस्तदा सदास्यात् ॥ कान्ताभीरमणपरः स्मरोत्थभावैः कामार्त्तः क्षणधिषणोतिलंपटश्च २ ॥ ५८ ॥ लग्नस्थोयदिसमवाप्तिभावनाथः स्याद्वक्ताधनसहितः कुतूहलात्मा ॥ सर्वत्राविषममतिः प्रसन्नचेता विख्यातः खलवियुतश्चसात्विकात्मा ३ ॥ ५९ ॥ लाभेशेसहजगतेऽथवित्तयातेतीर्थेषुप्रगुणधिया कृतार्थभूतः ॥ सत्कार्येष्वपि कुशलोतिलोलचित्तः स्वल्पस्वोऽनवरतशूलरोगदुःखी ४ ॥ ६० ॥ लाभेशेसुखसुतभावगामिनिस्यान्नानार्थो बहुविधसौख्यभाङ्मनुष्यः ॥ धर्मात्माशुभपुमपत्यवीर्यसंपत्संयुक्तः शुफलसिद्धिभूषितश्च ५ ॥ ६१ ॥ लाभेशेरिपुभवनस्थितेनरोसौस्यादेडोविविधरुजार्दितः सदैव ॥ सार्वात्म्येनचसुखवानपिप्रवासी गच्छेदस्युतुपरसेवयैवकालः ६ ॥ ६२ ॥ लाभेशेमदगृहगेथरंध्रयाते नोजीवेदिहवनितानरस्यकापि ॥ कामार्त्तोधनसहितः प्रकृत्युदारः कौलीनेप्यनभिमतव्ययोऽप्रबुद्धः ७ ॥ ६३ ॥ लाभेशेनवमगतेथवांबरस्थेभूपालैरपिपरिपूजितांघ्रिपद्मः ॥ धर्मात्माकृतिकुशलश्चसत्यवादीविख्यातोधनसहितोऽपरोपकर्ता ८ ॥ ६४ ॥ अथलाभस्थरव्यादीनामवधिवर्षाणिहिल्लाजः ॥ लाभेरविर्जिन २४ समामितलाभमिंदौभूपाचलाभमसृजिर्जिन २४ वर्षलक्ष्मीम् ॥ ज्ञःपंचवेद ४५ धनमीज्यइनाब्द १२ लक्ष्मींशुक्रःकरोतिधनमार्किफलंकुजोक्तम् ॥ ६५ ॥ इतिलाभभावः ॥ ११ ॥

अथव्ययभावः ॥ तत्रकिंविचार्य्यमित्युक्तंजातकाभरणे ॥ हानिर्दानंव्ययश्चापिदंभोनिर्बंधएवच ॥ सर्वमेवव्ययस्थानाच्चिंतनीयंप्र-

यत्नतः॥ १ ॥पादद्वयंस्थानमिदंव्ययाख्यंनिर्बंधदानोद्वहनव्ययादेः।
जलाशयादेःसदसत्क्रियादेर्दंडस्यहानेश्चविचार्यतात्र ॥ २ ॥ अथ-
सामान्यविचारेणव्ययस्थखव्यादीनांफलंगर्गमतेन ॥ व्यय-
स्थानगतेसूर्येव्ययशीलोभवेन्नरः ॥ परस्त्रीव्यसनाढ्यश्चकुरुते
व्ययमद्भुतम् ॥ ३ ॥ व्ययेशशिनिकार्पण्यमविश्वासःपदेपदे ॥
कृष्णपक्षेविशेषेणकार्पण्यमभिवर्धते ॥ ४ ॥ कोपनोबहुकामाढ्यो
व्यंगोधर्मस्यदूषकः ॥ भूमिजेद्वादशस्थेतुविद्वेषोमित्रबंधुषु ॥ ५॥
नृपपीडनसंतप्तंपरवादेनपीडितम् ॥ नृशंसंपुरुषंचांद्रिःकुरुतेव्यय-
राशिगः ॥६॥ उच्छ्रितव्ययकारीचरिःफगेदेवतागुरौ ॥ सेवावि-
ज्ञोमहाक्रोधीसालसोलोकविग्रही ॥ ७ ॥ श्रद्धाहीनोघृणाहीनःप-
रदाररतःसदा ॥ व्ययस्थानगतेशुक्रेरोगार्तःस्थूलदेहकः ॥ ८ ॥
नीचकर्माश्रितः पापोहीनांगोभोगलालसः ॥ व्यवस्थानगतेमंदेक्रू-
रेषुकुरुतेरुचिः ॥ ९ ॥ व्यवस्थानगतेराहौनीचकर्मरतःसदा ॥
असद्व्ययीपापबुद्धिःकपटीकुलदूषकः ॥ १० ॥ व्ययभावेस्वा-
मियुक्तेशुभदृष्टेचसद्व्ययी ॥ कीर्तिमाञ्जायते मर्त्योविपरीतेविपर्य-
यः॥११॥अथविशेषफलम्॥भानौव्ययेहरतिभूपतिरत्रद्रव्यंक्षी-
णेथवाशशिनिसद्व्ययकृच्छुभेस्यात्॥पुष्णंतिवित्तमिहसत्वचरास्तु
केचित्पूर्णेत्त्रिधावपितथैवशुभैश्चदृष्टे ॥ १२ ॥ दृष्टेकुजेबुधेनैववित्त-
नाशोभवेद्ध्रुवम् ॥ पुष्टंस्वर्क्षादिगैः खेटैस्तुच्छंनीचार्कगैः फलम्॥
॥ १३ ॥ अन्यत् ॥ व्ययेसूर्य्येराजपुत्रचौरेभ्योविगतंधनम् ॥
लकुटाघातस्तेषांहिचिह्नंचचरणेभवेत् ॥१४॥ चंद्रेचजलकार्य्येच
विवाहेचधनव्ययम् ॥ कुटुंबैर्भ्रातृभिर्वापिधनंभुक्तंनिगद्यते॥१५॥

शुक्रेजीवेव्यये ॥ वित्तंदानंदत्तंद्विजातये ॥ तीर्थेदेवालयेदीनभिक्षुकेषुव्ययंभवेत् ॥ १६ ॥ क्रूरक्षेत्रेक्रूरयुतेगतंचाऽसद्व्ययैर्धनम् ॥ जीविकार्थैधनंयस्मैदत्तंतेनार्पितंनतत् ॥ १७ ॥ अन्यत् ॥ व्ययालयेक्षीणबलः कलावान्सूर्य्योथवाद्वावपितत्रसंस्थौ ॥ द्रव्यंहरेद्भूमिपतिस्तुतस्य व्ययालयेवाकुजदृष्टयुक्ते ॥ १८ ॥ यादृशागगनगाव्ययस्थितास्तादृशंव्ययमिहाचरत्ययम् ॥ उष्णगौव्ययगतेयदर्जितंयातिभूपसदनेहितद्धनम् ॥ १९ ॥ कुजेऽम्बुजेशेचधनेव्ययेवासन्नीग्रहेज्ञेत्रधनव्ययःस्यात् ॥ वेश्यानिषादैश्वसगीतनृत्यैःसाक्षैत्वगैर्म्लेच्छविरोधिदुष्टैः ॥ २० ॥ कुजेव्ययेक्षत्रियवर्गतोव्ययः क्षतंचकटयामपिदक्षवामयोः ॥ दृशिश्रुतौवामतनौ रुजास्त्रियोधिकांगतादुष्कृतितोव्रणादिभीः ॥ २१ ॥ यमादिभिःसेंदुभिरंभसोव्ययोहुताशतोर्कारयुतैःपरस्त्रियाः ॥ सभार्गवैः सेंदुसुतैश्वशत्रुतोश्मदार्वयःशृंग्यनिलादिबाधनम् ॥ २२ ॥ पितृमातृसहोदरक्षयोरविसौरिक्षितिजाव्ययेयदा ॥ यदिवित्सितसूरिसंगमः सुखिनः संतिसहोदरास्तयोः ॥ २३ ॥ व्ययेन्नदाताधिषणोथसेन्दुजेकृषिक्रियाकृत्ससितेमखादिकृत् ॥ तडागवाप्यादिकृदिन्दुसंयुतेव्ययेसशुक्रोहिरधिव्रणादिकृत् ॥ २४ ॥ क्षीणेंदूरविरथवाव्ययेथवाद्वौचेत्तस्याखिलधनसंहृतिर्नृपात्स्यात् ॥ दुःस्थारेपिफलमिदंव्ययेथवित्तंसत्स्यात्सद्बुधसितजीवपूर्णचन्द्रैः ॥ २५॥ व्ययगेऽसृजिविद्युतेक्षितेधननाशोथगुरुर्व्ययेयदा ॥ पटुगेधनहेमसम्पदोभृगुजेऽश्वाविदिशोभनामही ॥ २६ ॥ पूर्णेविधौव्ययगतेविपुलागृहाःस्युःस्वंसेवकेऽर्पयतिसज्जरवौसमस्तम् ॥ सेज्येसिते

व्ययगतेसधनीसुकर्म्मासाम्बे शिवे यदुपतौ चरतोनरः स्यात् ॥ ॥ २७ ॥ सद्व्ययोभवतिकेंद्रगैः शुभैः पंचपूरुषशुभव्यवस्थया ॥ नारयोथबलिभिः खलैर्व्ययेऽव्यापदोधिखलुसूतिपृच्छयोः ॥ २८॥ अन्यश्चावधिर्हिल्लाजमतेन ॥ अष्टाग्नि २८ केहानिमिनोव्य-येऽब्जःपीडांत्रिके ३ क्षितिभवेक्षयुगे ४५ र्थहानिः ॥ सौम्योऽ-र्थहानिकृदिने १२ गुरुरक्षयुग्मे २५ द्रव्यव्ययंभृगुसुतोऽर्क १२ मितेक्षिपीडा ॥ २९॥ अथव्ययभावेराशिफलम्॥ मेषेव्ययस्थे प्रभवेन्नराणां व्ययंसदाछादनभोजनैश्च ॥ चक्षुष्मदानेकविवर्द्धनेन लाभेननानाविधपौरुषेण ॥ ३० ॥ वृषेव्ययस्थेथलदेवपुंसांभवेद्वि-चित्रांबरयोषितानाम् ॥ लाभेनरोषेणचविक्रमेणश्रुतानुचेष्टैर्विवि-धैः प्रकारैः ॥ ३१ ॥ तृतीयराशौव्ययगेनराणांपापोभवेत्स्त्रीव्य-सनात्मकश्च ॥ भूतोद्भवंवासुतसंभूतःकुशीलतः पापजनाश्रयाच्च॥ ॥ ३२ ॥ कर्केव्ययस्थेद्विजदेवतानांव्ययोभवेद्दैवतयज्ञतश्च ॥ धर्मक्रियाभिर्विविधाभिरेवसुसंस्थितः साधुजनैर्नृलोके ॥ ३३ ॥ सिंहेव्ययस्थेतुभवेन्नराणामसद्व्ययोभूरितरः सदैव॥ कुपात्रसंगाच्च कुकर्मणाचनिंद्यः सतांपार्थिवचौरतोवा ॥ ३४ ॥ कन्याभिधेचां-त्यगतेव्ययश्चभवेन्मनुष्यस्यहिचांगनोत्थः ॥विवाहमांगल्यमखैर्वि-चित्रैःसत्रैः प्रभाभिर्बहुसाधुसंगात् ॥ ३५ ॥ तुलेव्ययस्थेसुरवि-प्रबंधुश्रुतिस्मृतिभ्यश्चकृतोव्ययश्च ॥ भवेन्नराणांनियमैर्यमैश्चसुती-र्थसेवाजनितः प्रसिद्धः ॥ ३६ ॥ अलौव्ययस्थेचभवेद्व्ययस्तुपुं-सांप्रमादेनविडंबनाभिः ॥ कुमित्रसेवाजनितःसुनिंद्यःकुबुद्धितश्चौ-रकृताद्विकारात् ॥ ३७ ॥ चापेव्ययस्थेगरवंचनाभिः व्ययोभ-

वेत्पापजनप्रसंगात् ॥ सेवाकृतोवित्तधियाचपुंसांकृषिप्रसंगात्पर-
वञ्चनाद्वा ॥ ३८ ॥ मृगेव्ययस्थेचभवेन्नराणांव्ययस्तुपानासव-
सस्यजातः ॥ स्ववर्गपूजाजनितोन्यतस्तथाकृषिक्रियाभिश्चधन-
व्ययोप्यथ ॥ ३९ ॥ कुंभेव्ययस्थेसुरसिद्धिविप्रतपस्विनोवं-
दिभवोव्ययश्च ॥ पुंसांभवेत्साधुजनावरोधाच्छास्त्रप्रसिद्धैः प्रथि-
तश्चभूरि ॥ ४० ॥ मीनेव्ययस्थेजलयानतोवाकुसंगमा-
द्वाप्रभवेद्व्ययश्च ॥ पुंसांतुपुत्रासनयानजातस्तथाविवादेननिरंत-
रेण ॥ ४१ ॥ येज्ञानचिंतासुपुराप्रतिष्ठायोगा मयातत्परिहृत्यचै-
ते॥ योगाविचिंत्याःसुधियाततस्तुवाच्यानराणांहिशुभैः शुभास्ते ॥
॥ ४२ ॥ अथव्ययेशभावफलम् । वृद्धयवनः॥ व्ययनाथेलग्नगते
विदेशगः सुवचनः सुरूपश्च ॥ असंगवाददोषीभवतिकुमारोथवा
खंजः ॥ ४३ ॥ द्वादशपेवित्तगतेकृपणः पटुवागनिष्टलाभलयः॥
भौमेतुगच्छतिधनंनृपतस्करवह्निभवभयतः ॥ ४४ ॥ सहजगतेद्वा-
दशपेक्रूरेगतबांधवःशुभेचधनी॥ तनुसोदरः कृपणश्चबंधुषुदूरेसदाभ-
वति ॥ ४५ ॥ तुर्यगतेव्ययनाथेकृपणोरोगोज्झितः सुकर्माच ॥
मृतिमाप्नोतिहिसुततः सततंमनुजोमहादुःखी ॥ ४६ ॥ द्वादशप-
तौसुतस्थेक्रूरेसुतवर्जितः शुभेसुतयुक् ॥ जनककमलाविलासीसम-
र्थतारहितः सदापुरुषः ॥ ४७ ॥ षष्ठगतेव्ययनाथेक्रूरेकृपणोक्षि-
दूषणः पुरुषः॥ लभतेमृतिंनितांतंभृगुतनयेनेत्रहीनःस्यात् ॥ ४८॥
द्वादशपेसप्तमगेदुष्टोदुश्चरितः कपटवचनः ॥ क्रूरेस्त्रीरहितःस्यात्
सौम्येक्षयमेतिगणिकातः ॥ ४९ ॥ द्वादशपेनिधनगतेअष्टकपा-
लीकार्यसाधनांतरहितः ॥ द्रोहमतिः सौम्यखगेधनसंग्रहतत्परोभ-

वति ॥ ५० ॥ व्ययनाथेसुकृतगतेतीर्थावलोकतोव्ययेवृत्तिः ॥ क्रूरेखगेचपापीनिरर्थकंयातितद्द्रव्यम् ॥ ५१ ॥ व्ययगेगगनगृहस्थेपररमणीपराङ्मुखःपवित्रांगः ॥ सुतधनसंग्रहनिरतोदुर्वचनपराभवतिमाताच ॥ ५२ ॥ लाभस्थेद्वादशपेसुकुमारोदीर्घजीवितोभवति ॥ स्थानप्रवरोदाताविख्यातः सत्यवचनपरः ॥ ५३ ॥ विभूतिमान्ग्रामनिवासचित्तः कार्पण्यबुद्धिःपशुसंग्रही च ॥ चेज्जीवतिग्रामयुतः सदास्याद्व्ययाधिनाथेव्ययगेहलीने ॥ ५४ ॥ अन्यत्रच ॥ व्ययभावपतौव्ययगेरिपुगेवापापकृद्भवेन्मनुजः ॥ मातृविरोधीक्रोधीसन्ततिदुःखीपराबलाभोगी १ ॥ ५५ ॥ व्ययभावपतौमदगेतनुगेवादुर्बलोतिकफरोगी ॥ धनविद्याविधुरोसौ भार्यासुखवर्जितोनित्यम् २ ॥ ५६ ॥ व्ययनाथेधनरन्ध्रस्थितेऽच्युतेऽस्याच्युताभक्तिः ॥ संपन्नःसकलगुणैः प्रियवादीधार्मिकोभवेत्पुरुषः ३ ॥ ५७ ॥ व्ययनाथेधर्मस्थे सहजस्थेवाशरीरपोषणकृत् ॥ नित्यंद्वेष्टिज्येष्ठान्प्रजांश्चभार्यांगुरुंचापि ४ ॥ ५८ ॥ व्ययनाथेसुखगेवाखेवासुततातमातृसुखहानिः ॥ परगृहवाणिज्याद्यैः क्षेत्राद्यैश्चक्वचिज्जीवेत् ५ ॥ ५९ ॥ व्ययनाथेसुतभेवालाभेवापत्यसौख्यविधुरःस्यात् ॥ दत्तक्रीतसुताद्यैर्मणिमुक्ताद्यैश्चनिर्वाही ६ ॥ ६० ॥ इतिव्ययाख्योद्वादशभावः ॥

॥ अथपंचमहापुरुषलक्षणानिनिरूप्यंते ॥ येमहापुरुषसंज्ञकाः पंचपूर्वमुनिभिःप्रकीर्त्तिताः ॥ वच्मितान्सरलामलोक्तिभीरांजयोगविधिदर्शनेच्छया ॥ १ ॥ स्वगेहतुंगाश्रयकेंद्रसंस्थैरुच्चोपगैर्वाचनसूनुमुख्यैः ॥ क्रमेणयोगारुचकाख्यभद्रहंसाख्यमालव्यशशाभि-

धानाः ॥ २ ॥ दीर्घास्यःस्वच्छकांतिर्बहुरुधिरबलःसाहसाचाम-
सिद्धिश्चारुभ्रूनीलकेशःसमकरचरणोमंत्रविच्चारुकीर्तिः ॥ रक्तः
श्यामोतिशूरोरिपुबलमथनःकंजकंठोमहौजाः क्रूरोभक्तोनराणांद्वि-
जगुरुविनितःक्षामजानूरुजंघः ॥ ३ ॥ खट्वांगपाशमुपकार्मुकचक्र-
वीणाविज्ञांकहस्तचरणःसरलांगुलिःस्यात् ॥ मंत्राभिचारकुशल-
स्तुलयेत्सहस्रंमध्यंचतस्यगदितंसुखदैर्घ्यतुल्यम् ॥ ४ ॥ सह्यस्य
विंध्यस्यतथोज्जयिन्याःप्रभुःक्षरत्संप्रतिरायुरस्मात् ॥ शस्त्राग्निचिं-
ह्नोरुचकाभिधानेदेवालयांतेनिधनंकरोति ॥ इतिरुचकः ॥ शा-
र्दूलप्रतिमानभोद्विपगतिः पीनोरुवक्षःस्थलोलंबापीनसुवृत्तबाहुयु-
गलस्तत्तुल्यमानोच्छ्रयः ॥ कामीकोमलसूक्ष्मरोमनिचयैःसंरुद्धगंड
स्थलःप्राज्ञःपंकजगर्भपाणिचरणःसत्वाधिकोयोगवित् ॥ १ ॥
शंखासिकुंजरगदाकुसुमेषुकेतुचक्राब्जलांगलचिह्नितपाणिपादः ॥
यात्रागजेंद्रमदवारिकृतार्द्रभूमसत्कुंकुमःप्रतिमगंधतनुःसुघोषः ॥
॥ २ ॥ सभ्रूयुगोतिमतिमान्खलुशास्त्रवेत्तामानोपभोगसहितोपि
निगूढगूहः ॥ सत्कुक्षिधर्मनिरतःसललाटपट्टोधीरोभवेद्धसितकुंचि-
तकेशपाशः ॥ ३ ॥ स्वतंत्रःसर्वकार्येषुस्वजनंप्रतिनक्षमी ॥ भु-
ज्यतेविभवस्तस्यनित्यमर्थिजनैःपरैः ॥ ४ ॥ भारंतुलायांतुलये-
त्प्रयत्नैःश्रीकान्यकुब्जोधिपतिर्भवेत्सः ॥ भद्रोद्भवःपुत्रकलत्रसौ-
ख्योजीवेन्नृपालःशरदामशीतिः ॥ ५॥ इतिभद्रफलम् ॥ रक्ता-
स्योन्नतनासिकासुचरणोहंसप्रसन्नेंद्रियोगौरः पीनकपालरक्तकर-
णोहंसस्वनःश्लेष्मतः ॥ शंखाब्जांकुशमत्स्यदामयुगकैःखट्वांगमा-
लाघटैश्चंचत्पादकरस्थतोमधुनिभनेत्रेसुवृत्तंशिरः ॥ १ ॥ जला-

शयप्रीतिरतीवकामीनयातितृप्तिंवनितासुनूनम् ॥ उच्चोंगुलैर्व्यर्यैः षडशीतितुल्यैरायुर्भवेत्षष्टचवधिःसमानम् ॥ २ ॥ बाह्लीकदेशादरशूरसेनगंधर्वगंगायमुनांतरालान् ॥ भुक्त्वावनांतेनिधनंप्रयाति हंसोयमुक्तोमुनिभिःप्रमाणैः ॥ ३ ॥ इतिहंसः ॥ अस्थूलोष्ठोप्यविषमवपुर्नैवरक्तांगसंधिर्मध्येक्षामःशशिधररुचिर्हस्तिनासःसुगंडः॥ सद्दीप्ताक्षःसमितिशितरहोजानुदेशाप्तपाणिर्मालव्योयंविलसतिनृपः सप्ततिर्वत्सराणाम् ॥ १ ॥ वक्त्रंत्रयोदशमितांगुलमस्यदीर्घंतिर्यग्दशांगुलमितंश्रवणांतरालम् ॥ मालव्यसंज्ञनृपतिःससुतूक्तिनूनं लाटांश्चमालवसिंधुमुपारियात्राम् ॥ २ ॥ इतिमालव्यः ॥ लघुद्विजास्योद्विगतःसकोपःशठोतिशूरोविजनप्रचारः ॥ वनाद्रिदुर्गेषुनदीषुसक्तःप्रियातिथिर्नातिलघुप्रसिद्धः ॥ १ ॥ नानासेनानिचयनिरतोदंतुरश्चापिकिंचिद्धातुर्वादेभवतिकुशलश्चंचलोलोलनेत्रः ॥ स्त्रीसंसक्तःपरधनहरोमातृभक्तोसुजंघोमध्येक्षामःसुललितमतीरंध्रवेदीपरेषाम् ॥ २ ॥ पर्यंकशंखशरशस्त्रमृदंगमालावीणोपमाः खलुकरेचरणेचरेखा ॥ वर्षाणिसप्ततिमितानिकरोतिराज्यंप्राप्तं शशाख्यनृपतिःकथितोमुनींद्रैः ॥ ३ ॥ इतिशशकाः ॥ केंद्रोच्चगायद्यपिभूसुताद्यामार्तंडशीतांशुवशाभवंति ॥ शार्वंतिनोर्वीपतिमात्मपाकेयच्छंतिलोकेबलसत्फलानि ॥ ४ ॥ इतिपंचमहापुरुषलक्षणानि ॥ अथसुनफायोगफलंलिख्यते ॥ भौमादीनां फलंयत्स्याज्जाताःकस्यतुलंबुधः ॥ प्राज्ञायप्रवदेत्सम्यक्सुनफादिकृतंफलम् ॥ १ ॥ विक्रोवित्तप्रायोनिष्ठुरवचनश्चभूपतिश्चंड्रः ॥ हिंस्रोनित्यविरोधीसुनफायांसोमसंयोगे ॥ २ ॥ अतिशस्त्रगतः

कुशलोधर्मरतोकाव्यकृन्मनस्वीच ॥ सर्वहितोरुचिरतनुःसुनफायां सोमजोभवति ॥ ३ ॥ नानाविद्याचार्यःख्यातिंनृपतिंवृषप्रियंचापि ॥ सकुटुंबधनसंमृद्धंसुनफायांसुरगुरुः कुरुते ॥ ४ ॥ स्त्रीक्षेत्रगृहपश्चतुष्पदाद्यःसविक्रमोभवति ॥ नृपसुकृतःसुषेवोदक्षःशुक्रेण सुनफायाम् ॥ ५ ॥ निपुणमतिर्ग्रामपुरैर्नित्यंसंत्याजितोधनसमृद्धः ॥ सुनफायांरवितनयेक्रियासुगुप्तोभवेन्मलिनः ॥ ६ ॥
॥ इतिसुनफायोगफलम् ॥ ॥ अथअनफाफलम् ॥
चोरःस्वामीद्दग्भ्यःस्ववशीमानीरणोत्कंठः ॥ क्रोधात्संपत्साध्यःस्वतनुःकुजोऽनफायांप्रगल्भश्च ॥ १ ॥ गंधर्वोलेख्यपटुःकविःप्रसक्तानृपाप्तसत्कारः ॥ रुचिरसुभगोऽनफायांप्रसिद्धकर्माविबुधश्चभवेत् ॥ २ ॥ गांभीर्यःसन्मेधाचान्नानुयुतोबुद्धिमान्नृपाप्तवशगः ॥ अनफायांत्रिदशगुरौयातःशक्तोविर्भवति ॥ ३ ॥ युवतीनामतिसुभगःप्रणयाक्षितपस्यगोपिताकुंतः ॥ कनकसमृद्धश्चपुमाननफायांभार्गवेभवति ॥ ४ ॥ निस्तीर्णभूज्जनेशोगृहीतवाक्यश्चतुष्पदसमृद्धः ॥ दुर्बलतायाभोगाद्गुणसहितःपुत्रवान्रविजे ॥ ५ ॥ इतिअनफायोगफलम् ॥ ॥ आमृतकोबहुवित्तोनिपुणोनिशठोगुणाधिकोलुब्धः ॥ वृद्धस्त्रीप्रसक्तःकुलाग्रणीःशशिनिभौमबुधमध्ये ॥ १ ॥ ख्यातःकर्मसुकितवोबहुधनवैरस्त्वमर्षणोधृष्टः ॥ आरक्तकःशुक्रगुर्वोर्मध्यगतेशशिंनिसंग्राही ॥ २ ॥ उत्तमसुरतोबहुसंचयकारकोव्यसनसक्तः ॥ क्रोधीपिशुनोरिपुमान्यमादयोःस्यादुरधरायाम् ॥ ३ ॥ धर्मरतःशास्त्रज्ञोवाक्यपटुःसर्ववर्द्धनसमृद्धः ॥ त्यागयुतोविख्यातोगुरुबुधमध्यस्थितेचंद्रे ॥ ४ ॥ देशेदे-

शेगच्छतितत्रतपोनास्तिविद्ययासहितः ॥ चंद्रेन्येषांपूज्यःस्वजन-विरोधीज्ञमंदयोर्मध्ये ॥ ५ ॥ प्रियवाक्सुभगःकांतःप्रवृत्तगोयदि सुकृतवान्नृपतिः ॥ सौख्यः शूरोमंत्रीबुधसितयोर्मध्यगेचहिमकिरणे ॥ ६ ॥ धृतमेधास्थैर्ययुतोनीतिज्ञःकनकरत्नपरिपूर्णः ॥ ख्यातोनृपकृत्यकरोगुरुसितयोर्दुर्धरायोगे ॥ ७ ॥ सुखनयविज्ञानयुतःप्रियवाग्विद्वान्धुरंधरोमर्त्यः ॥ ससुतोधनीसुरूपश्चंद्रोगुरुभार्गवेतुलांतरगे ॥ ८ ॥ वृद्धचरितःखलाढ्योनिपुणःस्त्रीवल्लभोधनसमृद्धः ॥ नृपसत्कृतंबहुज्ञंकुरुतेचंद्रःशनिसितयोः ॥ ९ ॥

॥ इतिदुर्धरायोगफलम् ॥ ॥ अथकेमद्रुमफलम् ॥ केमद्रुमेभवतिपुत्रकलत्रहीनोदेशांतरेव्रजतिदुःखसदाभितप्तः ॥ ज्ञातिप्रदोदनिरतोमुखरःकुचैलोनीचःसदाभवतिभीतियुतश्चिरायुः ॥ १ ॥ यथारत्नकोशेउक्तम् ॥ कुलेनित्यभोगधनभुग्धनसहनाढ्यरसागान्वितोधुरंधरांभवेत्सुभृत्यः ॥ केमद्रुमेमलिनदुःखितनीचतेक्षोनिस्वश्चतत्रनृपतेरपिवंशजातः ॥ २ ॥ अथकेमद्रुमेभंगमाह ॥ हित्वार्कंसुनफायुजीदुरधरास्वांत्योभवेस्थैर्ग्रहैःशीतांशोःकथितोन्यथातुबहुभिःकेमद्रुमोत्थैःपरैः ॥ केंद्रेशीतकरेथवाग्रहयुतेकेमद्रुमोनेपितेकेचित्केंद्रनवांशकेष्विवतिवदंत्युक्तिः प्रसिद्धानते ॥ १ ॥ इतिरत्नकोशे ॥ पुनःकेमद्रुमभंगः ॥ कुमुदगहनबंधुर्वीक्षमाण समस्तैर्गगनगृहनिवासैर्दीर्घजीवीचिरायुः ॥ फलमशुभसमुत्थंयस्यकेमद्रुमोत्थंसभवतिनरनाथःसार्वभौमोजितारिः ॥ १ ॥ पूर्णःशशी यदिभवेच्छुभसंस्थितोवासौम्येमरेज्यभृगुनंदनसंयुतश्च ॥ पुत्रार्थसौख्यजनकःकथितोमुनींद्रैःकेमद्रुमेभवतिमंगलसुप्रसिद्धिः ॥ २ ॥

अथसुनफादयोयोगास्तेकथमुत्पद्यंतेतदाह श्रीलघुजातकात् ॥ रविवर्ज्यंद्वादशगैःसुनफाचंद्राद्द्वितीयगैः ॥ सुनफाया उभयस्थितैर्दुर्द्धराकेमद्रुमसंज्ञिताबाच्याः ॥ १ ॥ एतेयोगाश्चंद्रादुत्पद्यंते ॥ अथसूर्य्याद्वेशिवोशियोगमाह ॥ सूर्याद्व्ययगेवोशिर्द्वितीयगैश्चंद्रवर्जितैर्वेशिः ॥ उभयस्थितैर्ग्रहगणैरुभयचरीनामतःप्रोक्तः ॥ १ ॥ मंददृक्स्थिरवचनंपरिभूरिश्रमंनतोर्द्धतनुम् ॥ कथयतिगणिताधिपतिर्वेशिंसमुत्थंत्वधोदृष्टिम् ॥ २ ॥ बहुसंचयंयदिनुसदृग्वोशौपुरुषोभवेद्धुरोर्जातः ॥ भीरुःकायाद्विलग्नोलघुचेष्टोभृगुसुतोपरमधीनः ॥ ३ ॥ परतर्किंतोदरिद्रोमृदुर्विनीतोबुधोविगतलज्जः ॥ मातृघ्नःक्षितिपुत्रोपरोपकारीनरोवोशौ ॥ ४ ॥ परदारश्चंद्रेचवृद्धाकारोघृणीभवेन्मनुजः ॥ संजातनरोवोशौयोगेशनैश्चरेणसंयुक्ते ॥ ५ ॥ इतिवोशियोगफलम् ॥ उच्चेष्टवचाः स्मृतिमान्योगयुतोनिरीक्षतेतिर्यक् ॥ पूर्वशरीरेपृथुलोतुच्छगतिः सात्विकोवेशौ ॥ १ ॥ धृतिसत्यबुद्धियुक्तोभवतिगुरुर्वेशिगोवने शूरः ॥ ख्यातोगुणवानार्यःशूरोभार्गवेपुरुषः ॥ २ ॥ प्रियभाषां रुचिरतनुर्वेशः स्याद्वाबुधेपराज्ञकृत ॥ संग्रामेविख्यातोभूमिसुते सूतगुणवानतिख्यातः ॥ ३ ॥ वणिकलास्वभावःस्यात्परद्रव्यापहारकः ॥ गुरुद्वेषीशनिःसूर्योसोमेवेशिशनैश्चरे ॥ ४ ॥ इतिवेशियोगफलम् ॥ सर्वसहःसुसमदृक्समकायासुस्थितोनिपुणसत्वः ॥ नसत्युच्चःपरिपूर्णग्रीवोभवेदुभयचर्याणाम् ॥ १ ॥ सुभगो बहुभृत्यजनोबंधूनामाश्रयोनृपतितुल्यः ॥ नित्योत्साहीहृष्टोसुनक्तिभोगानुभयचर्यायाम् ॥ २ ॥ इतिसूर्ययोगाः अथान्येऽ

पियोगालिख्यंते ॥ षष्ठाष्टमेद्वादशेचद्वितीयेचयदाग्रहाः ॥ सिंहासनाख्योयोगोयंराजसिंहासनंविशेत् ॥ १ ॥ इतिसिंहासनयोगः ॥ अष्टमस्थायदाक्रूराःसौम्यालग्नेस्थिताग्रहाः ॥ ध्वजयोगेत्रजातस्तुसपुमान्नायकोभवेत् ॥ २ ॥ इतिध्वजयोगः ॥ त्रिःकोणेसप्तमेलग्नेभवंतिचयदाग्रहाः ॥ हंसयोगंविजानीयात्स्ववंशस्यैवपालकः ॥ ३ ॥ इतिहंसः ॥ एकादशेयदासर्वेग्रहाःस्युर्दशमेपिच ॥ लग्नस्यसंमुखेवापिकारिकापरिकीर्तिता ॥ ४ ॥ उत्पन्नःकारिकायोगेनीचेपिनृपतिर्भवेत् ॥ राजवंशसमुत्पन्नोराजात्रनसंशयः ॥ ५ ॥ लग्नतश्चान्यतोवापिक्रमेणपतिताग्रहाः ॥ एकावलीसमाख्यातामहाराजोभवेन्नरः ॥ ६ ॥ इत्येकावली ॥ चतुर्थकेंद्रसंज्ञेषुसौम्याःपापग्रहस्थितौ ॥ चतुःसागरयोगोयंराज्यदोधनदोभवेत् ॥ १ ॥ अथापरःप्रकारः ॥ कर्कटेमकरेमेषेतुलायांचग्रहेस्थिते ॥ चतुःसागरयोगःस्यात्सर्वारिष्टनिषूदनः ॥ १ ॥ चतुःसंधौनरोजातोबहुरत्नसमन्वितः ॥ गजवाजिधनैःपूर्णोधरणीशोभवेन्नरः ॥ १८ ॥ इतिचतुःसागरयोगः ॥ चतुर्थेष्वपिकेंद्रेषुक्रूराःसौम्यायदाग्रहाः ॥ क्रूरैःपृथ्वीपतिर्विद्यात्सौम्यैर्लक्ष्मीपतिर्भवेत् ॥ १ ॥ मृगपतिअजलग्नेभानुकेंद्रेत्रिकोणेव्ययनिधनसुसंस्थे ८ चंद्रकर्केवृषेभाः ॥ उभययदिचदृष्टचाजीवशुक्रोथवास्याद्भवतिअमरयोगेसर्वरिष्टोविनाशः ॥ १२ ॥ इत्यमरयोगः ॥ शुक्रेघटे ११ कुजेमेषेसुस्थोदेवपुरोहितः ॥ तदाराजाभवेन्नूनंचापःसौध्यतिदिङ्मुखः ॥ १३ ॥ इतिचापयोगः ॥ कर्कटेमिथुनेमीनेकन्यायांचापगेग्रहे ॥ दंडयोगःसमाख्यातोराज्ञामास्पदकारकः ॥ ४ ॥

दंडेचजातःपृथुपुण्यभागीएकातपत्रीभवतिक्षितीशः ॥ तेजोमयः सिंहपराक्रमश्चसंसेव्यमानोगुरुपात्रवृंदैः ॥१५॥ अथापरप्रकारेणहंसयोगः ॥ मेषेघटेचापतुलामृगालौमध्यग्रहेहंसइतिप्रसिद्धः ॥ शवैश्वपूर्णोनृपतेश्वपूज्योहंसोद्भवोराजसमोमनुष्यः॥१॥ इतिजातकचंद्रिकायांहंसः। धनेव्ययेतथालग्नेशेषस्थानेषुसंस्थिताः॥ वापीयोगोभवेदेवमुदितःपूर्वसूरिभिः ॥५९॥ दीर्घायुःस्यादात्मवंशप्रधानःसौख्योपेतोत्यंतधीरोनरोहि ॥ चंचद्वाक्यस्तन्मनःपुण्यवापी वापीयोगेयःप्रसूतःप्रतापी ॥६०॥ इतिवापीयोगः॥ ३६ ॥ लग्नाच्चतुर्थात्स्मरतःखमध्याच्चतुर्ग्रहस्थैर्गगनेंबरेंद्रैः ॥ क्रमेणयूपश्च शरश्चशक्तिर्दंडःप्रदिष्टःखलुजातकज्ञैः ॥ ६१ ॥ धीरोदारोयज्ञकर्मानुसारोनानाविद्यासद्विचारोनरोचः ॥ यस्योत्पत्तौवर्ततेयूपयोगोयागोलक्ष्म्याजायतेतस्यनित्यम् ॥६२॥ इतियूपयोगः॥३७॥ हिंस्रोत्यंततुल्यदुःखैःप्रतप्तःप्राप्तानंदःकाननांतेशरज्ञः ॥ मर्त्योयोगेयःशरेजातजन्मास्त्रीरंभाख्यातस्यनक्वापिसौख्यम् ॥६३॥ इतिशरयोगः॥ ३८ ॥ नीचैरुच्चैःप्रीतकृत्सालसश्चसौख्यैरर्थैर्वर्जितोदुर्बलश्च ॥ वादेयुद्धेतस्यबुद्धिर्विशालाशालासौख्यस्यालपताशक्तियोगे ॥६४॥ इतिशक्तियोगः॥३९॥दीनोहीनोन्मत्तसंजातसौख्योद्वेष्योद्वेगीगोत्रजैर्जातवेदः॥ कांतापुत्रैरर्थपुत्रैर्विहीनोहीनोबुद्ध्यादंडयोगेतुजन्मा ॥ ६५ ॥ इतिदंडयोगः ॥ ४० ॥ लग्नाच्चतुर्थात्स्मरतःखमध्यात्सप्तर्क्षगैर्नैरथकूटसंज्ञः ॥ छत्रंधनुश्चापगृहप्रवृत्तानौपूर्वकैर्योगइहार्द्धचंद्रः ॥ ६६ ॥ ख्यातोलुब्धोभोगसौख्यैर्विहीनःस्यान्नौयोगेलब्धजन्मामनुष्यः ॥ क्लेशीशश्वचंचलःस्वांतवृ-

त्तिस्तोयोद्भूतेधनधान्येनतस्य ॥ ६७ ॥ इतिनौयोगः ॥ ४१ ॥
दुर्गारण्यावासशीलश्चमज्ञोभिल्लप्रीतिर्निर्धनोनिंद्यकर्मा ॥ धर्माधर्म-
ज्ञानहीनश्चदुष्टःकूटप्राप्तोत्पत्तिरेवंमनुष्यः ॥ ६८ ॥ इतिकूटयो-
गः ॥ ४२ ॥ प्राज्ञोराज्ञांकार्यकर्तादयालुःपूर्वेपश्चात्सर्वसौख्यैरुपे-
तः ॥ यस्योत्पत्तौछत्रयोगोपलब्धिर्लब्धिःस्याच्चेच्छत्रसच्चामराद्यैः
॥ ६९ ॥ इतिच्छत्रयोगः ॥ श्रीजातकाभरणे ॥ आद्येभागेचां-
तिमेजीवितस्यसांख्योपेतःकनकाद्रिप्रचारः ॥ योगेजातःकार्मुके
सोतिदुष्टोगर्वोन्मत्तोत्पत्तिकृत्कार्मुकाख्यः ॥ ७० ॥ इतिकार्मुकयो-
गः ॥ ४३ ॥ भूमीपालप्राप्तचंचत्प्रतिष्ठःश्रेष्ठःसेनाभूषणार्थांबरा-
द्यैः ॥ चेदुत्पत्तौयस्ययोगोर्द्धचंद्रश्चंद्रःसस्यादुत्सवार्थंजनानाम् ७१ ॥
इतिअर्द्धचंद्रयोगफलम् ॥ ४४ ॥ ततोर्द्धनाडयैकग्रहांतरेणस्युः
स्थानषट्केगगनेचरेंद्राः ॥ चक्राभिधानश्चसमुद्रनामायोगाविती-
हाकृतिजाश्चविंशत् ॥ ७२ ॥ श्रीमद्भूपोत्यंतजातप्रतापोभूपो-
भूपोपायनैरर्चितःस्यात् ॥ योगेजातःपूरुषोयस्तुचक्रेचक्रेपृथ्व्याः
शालिनीतस्यकीर्तिः ॥ ७३ ॥ इतिचक्रयोगः ॥ ४५ ॥ दाताधीर-
श्चारुशीलोदयालुःपृथ्वीपालप्राप्तसाम्यप्रकामम् ॥ योगेजातोयःसमु-
द्रेसधन्योधन्योवंशस्तेननूनंनरेण ॥ ७४ ॥ इतिसमुद्रयोगः ॥ ४६ ॥
येयोगाःकथिताःपुरावहुतरास्तेषामभावेभवेद्गोलस्त्वेकगतिर्युगंद्विग्र-
हगैःशूलस्त्रिगेहोपगैः ॥ केदारश्चचतुर्षुसर्वखचरैःपाशस्तुपंचस्थितैः
षट्संस्थैर्कदामनिकाचसप्तगृहगैर्वीणेतिसंख्याइमे ॥ ७५ ॥ विद्या-
सदौदार्यसामर्थ्यहीनानानायासानित्यजातप्रयासाः ॥ एषांयोगः
संभवेद्गोलनामानामासत्यप्रीतयोऽनीतयस्ते ॥ ७६ ॥ इतिगोल-

नामायोगः॥४७॥पाखंडेनाखंडितप्रीतिभाजोनिर्लज्जाःस्युर्धर्मकर्मप्रयुक्ताः॥पुत्रैरर्थैःसर्वथातेवियुक्तायुक्तायुक्तज्ञानशून्यायुगाख्ये७७ इतियुगयोगः ॥ ४८ ॥ युद्धेवादेतत्पराःक्रूरचेष्टाःक्रूराःस्वांतेनिष्ठुरानिर्धनाश्च ॥ योगोयेषांसूतिकालेहिशूलःशूलप्रायास्तेजनानां भवंति ॥ ७८ ॥ इतिशूलयोगः ॥ ४९ ॥ चापोपेताश्चार्यवंतोविनीताःकृशौत्सौक्याश्चोपकारादराश्च ॥ योगेकेदारेस्थनरास्तेनधीराचाराश्चापरितेषांविशेषात् ॥ ७९ ॥ इतिकेदारयोगः ॥ ५० ॥ दीनाकारास्तत्पराश्चापकारेबंधेनार्त्ताभूरिजल्पाःसदंभाः॥नानानर्थापाशयोगप्रजाताजातारण्यप्रीतयःस्युर्मनुष्याः८० इतिपाशयोगः ॥५१॥ जातानंदोनंदनाढ्यैःसुधीरोविद्वान्भूपःकोपसंजाततोषः ॥ चंचच्छीलौदार्यबुद्धिःप्रशस्तःशस्तःसूतौदामिनीयस्ययोगः॥८१॥ इतिदामिनीयोगः॥५२॥अर्थोपेताःशास्त्रपारंगताश्चसंगीतज्ञाःपोषकाःस्युर्बहूनाम्॥नानासौख्यैरन्वितास्तुप्रवीणावीणायोगेप्राणिनांजन्मयेषाम् ॥ ८२ ॥ इतिवीणायोगः ॥५३॥ प्रोक्तैरेतैर्नामसौख्यैश्चयोगाःस्यात्सर्वेषांप्राणिनांजन्मकामम्॥ तस्मादेतेत्यंतयंत्रादपूर्वाःपूर्वाचार्यैर्जातकेसंप्रदिष्टाः ॥ ८३ ॥ उत्पातकेकृशतनुर्निशिवाथदृश्येदृश्येदिवासिरिगर्भयशोदकश्च ॥ए॰ स्थितःसमफलःपृथिवीपतित्वंजातोन्ययायःकुरुतेपरिपूर्णमूर्तिः ॥ ॥१॥ ॥इतिचन्द्रयोगः ॥५४॥ इतिश्रीजातकाभरणोक्तनाभसयोगाःप्रोक्ताः॥ ॥ वामवामेग्रहाःसर्वेसूर्यादीनांमुनिस्तथा॥ दरिद्रयोगंजानीयान्नात्रकार्याविचारणा ॥ ८४ ॥ इतिदरिद्रयोगः ॥ ५६ ॥ ऋतुरेतश्चसंपर्काज्जायतेविषमागतिः ॥ करसंपुट-

मादायवंध्याभवतिनिश्चितम् ॥८५॥ ॥ इतिकरसंपुटयोगः ॥
॥ ६७ ॥ इतिश्रीपंचमहापुरुषादियोगामिलित्वाअष्टषष्टि-
६८ योगाउक्ता अग्रेन्येपि ॥ मूलत्रिकोणस्वगृहोच्चसंस्थान-
भश्वराःकेंद्रगतामिथःस्युः ॥ तेकारकाख्याःकथितामुनींद्रैर्विज्ञेय-
प्राज्ञांभुवनेविशेषाः ॥ ८६ ॥ प्रालेयरश्मिर्यदिमूर्तिवर्तीस्वमंदिर-
स्थोनिजतुंगजातः ॥ कुजार्कजार्कामरराज्यपूज्याःपरस्परंकारक-
संज्ञिताश्च ॥ ८७ ॥ शुभग्रहेलग्नगतेबरांबु १० । ४ स्थितोग्रहः
कारकसंज्ञकःस्यात् ॥ तुंगत्रिकोणस्वगृहांशयातास्तेपोहमानेतप-
नोविशेषात् ॥ ८८ ॥ नीचान्वयेयद्यपिजातजन्मामंत्रीभवेत्कार-
कखेचराढ्यैः ॥ राजान्वयेयस्ययदिप्रसूतिर्भूमीपतित्वंसकथंनया-
ति ॥ ८९ ॥ वेशिस्थितोयस्यशुभोनवेगोलग्नंविलग्नंचलवेस्वकी-
ये ॥ केंद्राणिसर्वाणिचसंग्रहाणितस्यालयेश्रीःकुरुतेंविलासम् ॥
॥ ९० ॥ केंद्रस्थितागुरुविलग्नकजन्मनाथामध्येचयस्यनितरां
वितरंतिभाग्यम् ॥ शीर्षोदयोभ्युदयभेषुगताभवेयुरारंतमध्यमवि-
रामफलप्रदास्ते ॥ ९१ ॥ इतिकारकयोगः ॥ ६९ ॥ संस्था
विलग्नेप्यथसप्तमेचपतंगमुख्यास्तुग्रहानितांतम् ॥ वदंतियोगंशक-
टाख्यसंज्ञंजातोनरःस्याच्छकटोपजीवी॥९२॥ इतिशकटयोगः
॥७०॥ युग्मेयुग्मेभवेत्त्रीणिएकैकंचात्रिषुस्थितम् ॥ नंदायोगः
सविज्ञेयश्चिरायुश्चसुखप्रदः ॥ ९३ ॥ इतिनंदायोगः ॥ ७१॥
लग्नेचजीवोयुगगेभृगुश्चयूनेचसौम्योदशमेमहीजः ॥ केंद्रेत्वमीचा-
रुफलप्रदाःस्युःसर्वार्थदातारइतिप्रसिद्धः ॥ ९४ ॥ इतिदातार-
योगः ॥ ७२ ॥ घटेमेषेनरे ३ चापेतुलायांसिंहगेग्रहे ॥ राजहं-

सोऽभवेद्योगोराज्यास्पदसुखप्रदः ॥ ९५ ॥ इतिराजहंसयोगः ॥ ॥७३॥सिंहासनेचहंसेचदंडेयोगेमरुग्ध्वजे ॥ चतुःसागरयोगेचचिह्निपुच्छोमहाफलम् ॥९६॥ तुलामकरमेषाद्यलग्नेवाह्यथवाक्वचित् ॥ सिंहासनेचडमरौचिह्निपुच्छःसशस्यते ॥ ९७ ॥ मृगेकर्केचपुच्छःस्याद्राजहंसोसुखप्रदः ॥ कुंभेचमन्मथेचैवचिह्निपुच्छोऽभिधीयते ॥ ९८ ॥ मृगेकर्कध्वजेपुच्छःकन्यालौवृषभेझषः ॥ चिह्निपुच्छोभवेद्योगश्चतुःसागरगोचरे ॥ ९९ ॥ योगोदितफलंपुच्छः करोतिद्विगुणंफलम् ॥ तेनयोगाधियोगोयंलग्नेपिकस्यचिन्मते ॥ ॥ १०० ॥ घटशून्येनृपसचिवोगोमहिषीहयगजैर्युक्तः ॥ नीतिज्ञोबहुपुत्रोलग्नेपिचसम्मतंकेषु ॥ १०१ ॥ इतिचिह्निपुच्छयोगः ॥ ७४ ॥ चन्द्राष्टमेचक्रसंज्ञार्कार्किशुक्रागृहेविधौ ॥ केमद्रुमेचसंपूर्णेयोगोलालाटिकोमतः ॥१०२॥ आजन्मतोभवतिकारग्रहैःप्रसिद्धःशिल्पादिकर्मकुशलाकुशलाकृतिश्च॥ भूर्यात्मजोपिलभतेविविधामलब्धिजन्मांतरेपिनजहातिललाटयोगे ॥ १०३ ॥ इतिललाटीयोगः ॥ ७५ ॥ राहुणासहितश्चंद्रःसपापोगुरुवीक्षितः॥ महापातकयोगोयंयदिशुक्रसमोभवेत् ॥ १०४ ॥इतिमहापातकयोगः ॥७६॥भौमेनदृश्यतेलग्नंलग्नंपश्यतिभास्करः ॥गुरुशुक्रौनदृश्येतेबलीवर्दैनहन्यते॥ १०५॥इतिबलीवर्दहंतायोगः॥७७॥ आयस्थानगतेचन्द्रेचन्द्रस्थानगतेरवौ॥हठेननशोविज्ञेयःपंचरात्रौविशेषतः ॥ १०६ ॥ इतिहठहंतायोगः ॥ ७८ ॥ मदनयोर्यदायोगोलग्नेचराहुदर्शने ॥ वृक्षस्थंमरणंतस्ययदिशुक्रसमोभवेत् ॥ १०७ ॥ इतिवृक्षहंतायोगः॥७९॥ षष्ठस्थानगतेशुक्रेतनुस्था-

नगतेकुजे ॥ नासाच्छेदकरंयोगंवदामिमुनिसत्तम ॥ १०८ ॥ इ-
तिनासाच्छेदयोगः॥ ८० ॥ मंदेचदृश्यतेचंद्रोलग्नेचरविभार्गवौ॥
शुभग्रहानपश्यंतिकर्णच्छेदोनसंशयः ॥ १०९ ॥ इतिकर्णच्छेद-
योगः ॥८१॥ कविनासहितोमंदोगुरुणासहितःकविः ॥ शुभग्रहा
नपश्यंतिपादखंजोभवेन्नरः॥ ११० ॥इतिपादखंजयोगः ॥८२॥
लग्नाच्चसप्तमस्थानेशन्यर्केराहुसंस्थिते ॥ सर्पेणपीडिकास्योक्ताश-
य्यायांस्वपतोपिच ॥ १११ ॥ इतिसर्पहंतायोगः ॥८३॥ गुरु-
स्थानेगतेसौम्येशनिस्थानगतेकुजे ॥ पंचविंशेचवर्षेचवनेव्याघ्रेण
हन्यते ॥ ११२ ॥इतिव्याघ्रहंतायोगः ॥८४॥ शुक्रस्थानेगतेचंद्रे
शुक्रस्थानेगतेशनौ ॥ अष्टाविंशतिवर्षेचअसिघातेनमृत्युदः ॥
॥ ११३ ॥इतिअसिघातयोगः॥८५॥धर्मस्थानगतेभौमेशन्यर्के-
राहुसंयुते ॥ शुभग्रहानपश्यंतिशरक्षेपेणहन्यते ॥ ११४ ॥
इतिशरक्षेपहंतायोगः ॥८६॥ रविणासहितोभौमःशनिर्वाजीवा
संस्तुतः ॥ अष्टाविंशतिवर्षेचब्रह्मघातिनसंशयः ॥ ११५ ॥ इति
ब्रह्मघातीयोगः ॥ ८७ ॥ रविस्थानगतेचंद्रेगुरुस्थानसमायुतः ॥
सागरेचस्थितेलग्नेपंचापत्यविनाशकृत् ॥ ११६ ॥ इतिपंचाप-
त्यविनाशयोगः॥८८॥अथदोलायोगः॥ मीनेमेषेचचापेचस्थि
तेस्थानत्रयेगृहे।दोलासंज्ञकयोगःस्याद्राज्यदोग्रमुदाहृतः॥ ११७॥
सन्मानदानगुणपात्रपरीक्षितोवाकलानिधिःकौशलगीतनृत्यः ॥
मंत्रीश्वरोराजसंभाविवेकीकेंद्रस्थितेपापविवर्जितेगुरौ ॥ ११८ ॥
इतिदोलायोगः॥८९॥ ॥अथपदकविच्छेदयोगः॥ ॥ लग्न-
स्थानगतेभौमःशन्यर्कराहुवीक्षितः॥ योगःपदकविच्छेदोयदिशुक्र-